Bill No. 3 /07-08

171

2008-0331

रसेन्द्रसार संग्रह : by श्री गोपाल कृष्ण
- Edited by श्री. जीवानन्द विद्यासागर
-भट्टाचार्य - Revised with the commentary
by पं. आशुबोध विद्याभूषण.
with several रसयंत्र illustrations.
5/e, Calcutta, 1932.

65

रसेन्द्र सार संग्रह

[रसयन्त्रचित्रसंवलितः]

रसेन्द्रसारसंग्रहः ।

श्रीगोपालकृष्णसङ्कलितः ।

पण्डितकुलपतिना, वि, ए, उपाधिधारिणा,

श्रीमज्जीवानन्दविद्यासागरभट्टाचार्य्येण

सङ्कलितया

तदात्मजेन

पण्डित-श्रीआशुबोध-विद्याभूषणेन प्रतिसंस्कृतया

टीकया समलङ्कृतः प्रकाशितश्च ।

पञ्चमसंस्करणम् ।

कलिकातामहानगर्य्याम्

सिद्धेश्वरयन्त्रे

मुद्रितः ।

—००—


ई १९३२ ।

—००—

प्रकाशक—पण्डित-श्रीआशुबोध-विद्याभूषण।

प्राप्तिस्थान— २नं०, रमानाथ मजुमदार ष्ट्रीट्, आम्हार्ष्ट-ष्ट्रीट् पोष्ट-अफिस। कलिकाता।

Printed by---ABINASH CHANDRA MANDAL,
SIDDHESWAR PRESS.
39-2, Shibnarain Dass Lane, Calcutta.



श्रीआशुबोध-विद्याभूषण ।

सूचीपत्रम् ।

प्रथमोऽध्याय: ।

द्वितीयोऽध्यायः ।

विरेकाधिकारः ।

ज्वर-चिकित्सा ।

सोमरोग-चिकित्सा।

स्थौल्य-चिकित्सा।

उदररोग-चिकित्सा।

प्लीहरोग-चिकित्सा।

तृतीयोऽध्यायः ।

—००—

बालरोग-चिकित्सा ।

चतुर्थोऽध्यायः ।

—००—

विष-चिकित्सा ।

पञ्चमोऽध्यायः ।


—००—

रसायन-वाजीकरणाधिकारः ।

ध्यापकस्य श्रीमतः स्यर प्रफुल्लचन्द्ररायस्य अनुमत्यनुसारेणैव तदीय —"हिष्ट्री अफ् हिन्दुकेमिष्ट्रि" नामकग्रन्थस्थितानि चित्राणि अस्माभिरन्तेवासिनां बोधसौकर्य्याय अत्र सन्निवेश्यन्ते ।

सम्पादकैः ।


दोलायन्त्रम् ।



द्रवद्रव्येण भाण्डस्य पूरितार्द्धोदरस्य च ।
मुखमुभयतो द्वार-द्वयं कृत्वा प्रयत्नतः ॥
तयोस्तु निक्षिपेद्दण्डं तन्मध्ये रसपोट्टलीम् ।
बद्ध्वा तु स्वेदयेदेतद्दोलायन्त्रमिति स्मृतम् ॥

रसरत्नसमुच्चयः ।

बालुकायन्त्रं लवणयन्त्रञ्च ।




सरसां गूढ़वक्त्रां मृद्वस्त्राङ्गुलघनावृताम् ।
शोषितां काचकलसीं त्रिषु भागेषु पूरयेत् ॥
भाण्डे वितस्तिगम्भीरे बालुकासु प्रतिष्ठितम् ।
तद्भाण्डं पूरयेत् त्रिभिरन्याभिरवगुण्ठयेत् ॥
भाण्डवक्त्रं मणिकया सन्धिं लिम्पेन्मृदा पचेत् ।
चुल्ल्यां तृणस्य चाऽऽदाहान्मणिकापृष्ठवर्त्तिनः ॥
एतद्धि बालुकायन्त्रं तद्यन्त्रं लवणाश्रयम् ।
पश्चाद्बालुकापूर्ण-भाण्डे निक्षिप्य यत्नतः ॥

पच्यते रसगोलाद्यं वालुकायन्त्रमीरितम् ।
एवं लवणनिक्षेपात् प्रोक्तं लवणयन्त्रकम् ॥

अन्तःकृतरसालेप-ताम्रपात्रमुखस्य च ।
लिप्त्वा मृल्लवणेनैव सन्धिं भाण्डतलस्य च ॥
तद्भाण्डं पटुनाऽऽपूर्य्य-च्चारैर्वा पूर्व्ववत् पचेत् ।
एवं लवणयन्त्रं स्यात् रसकर्म्मणि शस्यते ॥

रसरत्नसमुच्चयः ।

भूधरयन्त्रम् ।




यन्त्रं डमरुवद्वाऽथ वाऽधःपातनयन्त्रवत् ।
भूगर्त्ते तत् समाधाय चोर्द्ध्वमाकीर्य्य वह्निना ॥
अधःस्थाल्यां जलं क्षिप्त्वा सूतकं तत्र पातयेत् ।
एतद्भूधरयन्त्रं स्यात् सूतसंस्कारकर्म्मणि ॥ *
अत्रिसंहितायाम् ।

---

* तन्त्रान्तरेऽस्य "अधःपातनयन्त्रम्" इति संज्ञान्तरं, यतः भूधरयन्त्रे अधःपातनमपि क्रियते ; तत्र प्रमाणं भावप्रकाशे रसशोधनविधौ यथा—
"त्रिफलाशिग्रुशिखिभिर्लवणासुरिसंयुतैः ।
नष्टपिष्टं रसं कृत्वा लेपयेदूर्द्ध्वभाजनम् ॥
ततः दीप्तैरधःपातमुपलैस्तस्य कारयेत् ।
यन्त्रे भूधरसंज्ञे तु ततः सूतो विशुध्यति ॥" इति ।


तिर्य्यक्पातनयन्त्रम् ।



क्षिपेद्रसं घटे दीर्घ-नताधोनालसंयुते ।
तन्नालं निक्षिपेदन्य-घटकुक्ष्यन्तरे खलु ॥
तत्र रुद्ध्वा मृदा सम्यग्वदने घटयोरधः ।
अधस्ताद्रसकुम्भस्य ज्वालयेत् तीव्रपावकम् ॥
इतरस्मिन् घटे तोयं प्रक्षिपेत् स्वादु शीतलम् ।
तिर्य्यक्पातनमेतद्धि वार्त्तिकैरभिधीयते ॥

रसरत्नसमुच्चयः ।]


पातनायन्त्रम् ।



अष्टाङ्गुलपरीणाहमानाहेन दशाङ्गुलम् ।
चतुरङ्गुलकोत्सेधं तोयाधारं गलादधः ॥
अधोभाण्डमुखं तस्य भाण्डस्योपरिवर्त्तिनः ।
षोड़शाङ्गुलविस्तीर्ण-पृष्ठस्याऽऽस्ये प्रवेशयेत् ॥
पार्श्वयोर्महिषीक्षीर-चूर्णमण्डूरफाणितैः ।
लिप्त्वा विशोषयेत् सन्धिं जलाधारे जलं क्षिपेत् ।
चुल्ल्यामारोपयेदेतत् पातनायन्त्रमीरितम् ॥

रसरत्नसमुच्चयः ।


अधःपातनयन्त्रम् ।



अयोर्द्धभाजने लिप्त-स्थापितस्य जले सुधीः ।
दीप्तैर्वनोपलैः कुर्य्यादधःपातं प्रयत्नतः ॥

रसरत्नसमुच्चय ।

विद्याधर-(ऊर्द्धपातन)-यन्त्रम् ।



अधःस्थाल्यां रसं क्षिप्त्वा निदध्यात् तन्मुखोपरि ।
स्थालीमूर्द्धमुखीं सम्यङ्निरुध्य मृदुमृत्स्नया ॥
ऊर्द्धस्थाल्यां जलं क्षिप्त्वा चुल्ल्यामारोप्य यत्नतः ।
अधस्तात् ज्वालयेदग्निं यावत्प्रहरपञ्चकम् ॥
स्वाङ्गशीतं ततो यन्त्रात् गृह्णीयाद्रसमुत्तमम् ।
विद्याधराभिधं यन्त्रमेतत् तज्ज्ञैरुदाहृतम् ॥

भावप्रकाशे ।


स्वेदन-(कन्दुक)-यन्त्रम् ।



साम्बुस्थालीमुखे बद्धे वस्त्रे स्वेद्यं निधाय च ।
पिधाय पच्यते यत्र तद् यन्त्रं स्वेदनं स्मृतम् ॥

भावप्रकाशे ।

धूपयन्त्रम् ।




विधायाष्टाङ्गुलं पात्रं लौहमष्टाङ्गुलोच्छ्रयम् ।
कण्ठाधो द्व्यङ्गुले देशे गलाधारे हि तत्र च ॥
तिर्य्यक्लौहशलाकाश्च तन्वीस्तिर्य्यग्विनिक्षिपेत् ।
तनूनि स्वर्णपत्राणि तासामुपरि विन्यसेत् ।
पत्राधो निक्षिपेद्धूमं वक्ष्यमाणमिहैव हि ।
तत्पात्रं न्युब्जपात्रेण छादयेदपरेण हि ॥

मृदा विलिप्य सन्धिञ्च वह्निं प्रज्वालयेदधः ।
तेन पत्राणि कृत्स्नानि हतान्युक्तविधानतः ॥
गन्धालकशिलानां हि कज्जल्या वा मृताहिना ।
धूपनं स्वर्णपत्राणां प्रथमं परिकीर्त्तितम् ॥
तारार्थं तारपत्राणि मृतवङ्गेन धूपयेत् ।
धूपयेच्च यथायोग्यैरन्यैरुपरसैरपि ।
धूपयन्त्रमिदं प्रोक्तं जारणाद्रव्यसाधने ॥

रसरत्नसमुच्चयः ।


तप्तखल्लयन्त्रम् ।



अजाशकृत् तुषाग्निञ्च भूगर्त्ते वितयं क्षिपेत् ।
तस्योपरि स्थितः खल्लः तप्तखल्ल इति स्मृतः ॥

अत्रिसंहितायाम ।

कोष्ठिकयन्त्रम् ।



षोड़शाङ्गुलविस्तीर्णं हस्तमात्रायतं समम् ।
धातुसत्त्वनिपातार्थं कोष्ठिकं परिकीर्त्तितम् ॥
परिपूर्णं दृढ़ाङ्गारैरधोवातेन कोष्ठके ।
मात्रया ज्वालमार्गेण ज्वालयेच्च हुताशनम् ॥

अत्रिसंहितायाम् ।

रसेन्द्रसारसंग्रहः ।

प्रथमोऽध्यायः ।

रसेन्द्रमिव निःशेष-जराव्याधिविनाशनम् ।
प्रणमामि गुरुं भक्त्या शङ्करं योगसाधनम् ॥ १ ॥

इह खलु सकलजनमण्डलसमुपकारकसुसिद्धशास्त्रार्थप्रकाशनार्थक-विवृतिप्रतिरोधकविघ्नपटलनिरासार्थं प्रथमतः स्वेष्टदेवतानमस्कारस्याव-श्यकत्वमित्यवधाय तदेव निबध्नाति, रसेन्द्रमित्यादि ।—तत्रापि शङ्कर-नामोत्कीर्त्तनं मङ्गलार्थं, शङ्करस्य श्रेयःसाधनत्वेन सर्वोत्कर्षत्वात् । न च गुरुपदार्थाविशेषितशङ्करनमस्कारेणैव इष्टसिद्धौ विशेषणवैयर्थ्यापत्ति-रिति वाच्यम्, यत्किञ्चित् संज्ञोपलब्धशङ्करधीनिरासकत्वेन ज्योतिः-स्वरूपार्थकगुरुपदार्थस्य सार्थक्यात् । प्रपूर्वकनमधात्वर्थश्च स्वापकर्ष-बोधानुकूलव्यापारः ; उद्देश्यरूपं कर्म्मत्वं तत्त्वञ्च नमस्कारजन्यफल-जनकप्रीत्याश्रयत्वम् । भक्त्येति विशेषणे तृतीया । आख्यातेनास्मत्पदा-र्थोपस्थितिः, ततश्च भक्तिविशिष्टोऽस्मत्त्वावच्छिन्नः कर्त्ता परब्रह्मस्वरू-पशङ्करत्वावच्छिन्नकर्म्मतानिरूपकस्वापकर्षबोधजनकव्यापारवानित्यर्थः । ये तु स्वोत्कर्षबोधानुकूलव्यापार एव नमधात्वर्थ इति ब्रुवते, तेषां मते—विषयत्वरूपं कर्म्मत्वम्, अन्यत् समानम् । अन्ये तु—भक्त्येति तृतीया प्रयोजकतायां तस्य तादृशबोधे चान्वयः, ततश्च भक्तिप्रयोज्य-स्तादृशबोध इत्यर्थमवतारयन्ति । ननु "वाङ्मनसयोर्वर्त्मातिक्रमस्य तस्य ज्ञानाविषयत्वेन प्रणामः कथं सङ्गच्छते ?" इत्याह योगसाधनमिति ।—

नत्वा गुरुपदद्वन्द्वं दृष्ट्वा तन्त्राण्यनेकशः ।
श्रील-गोपालकृष्णेन क्रियते रससंग्रहः ॥ २ ॥
सिद्धयोगाश्च ये केचित् कृतिसाध्या भवन्ति हि ।
एकीकृत्य तु ते सर्वे लिख्यन्ते यत्नतो मया ॥ ३ ॥

तत्र रसप्राधान्यमाह ।—

अल्पमात्रोपयोगित्वादरुचेरप्रसङ्गतः ।
क्षिप्रमारोग्यदायित्वादौषधेभ्योऽधिको रसः ॥ ४ ॥

योगेन साधनं प्राप्तिर्यस्येति बहुव्रीहिः । रसेन्द्रमिति योगसाधनं रसेन्द्रं निःशेषेण जराव्याधिविनाशनं, तथा योगसाधनं योगगम्यं शङ्करं प्रणमामीति दृष्टान्तसहितार्थः । रसेन्द्रस्य योगसाधनत्वेन शङ्करस्य स्वधर्म्मवस्तुनः प्रतिविम्बनरूपदृष्टान्तावगतिरिति ध्येयम् ॥ १ ॥

नत्वा इत्यादौ पदद्वन्द्वमिति ।—परमार्थतत्त्वदर्शकत्वात् अशेषशास्त्रार्थप्रकाशकत्वाच्च पदद्वन्द्वमित्युक्तम् । तन्त्राण्यनेकश इति ।—अन्यानि बहूनि रसतन्त्राणि । सिद्धयोगाश्चेति ।—तस्मिन् रसग्रन्थे सिद्धयोगाः सिद्धफलदा ये योगा उक्तास्तान् एकीकृत्येति ॥ २ ॥ ३ ॥

रसप्राधान्यमाह,—अल्पमात्रेति । औषधेभ्योऽधिको रस इति — अस्मात् कारणात् सर्वेभ्यः औषधेभ्योऽधिकगुणकर इत्यर्थः । न केवलमौषधेभ्योऽधिकः योगसाधनत्वात् तथा बहुकार्य्यकरत्वात् मुक्तिप्रदत्वाच्च सर्वेभ्योऽधिक इति । उक्तञ्च—"अचिराज्जायते देवि ! शरीरमजरामरम् । मनसश्च समाधानं रसयोगादवाप्यते ॥ सत्त्वञ्च लभते देवि ! विज्ञानं ज्ञानपूर्व्वकम् । सत्यं मन्त्राश्च सिध्यन्ति योऽश्नाति मृतसूतकम् ॥ यावन्न शक्तिपातस्तु न यावत् पाशकृन्तनम् । तावत् तस्य कुतः शुद्धिर्जायते भस्मसूतके ॥ यावन्न हरबीजन्तु भक्षयेत् पारदं रसम् । तावत्

साध्येषु भेषजं सर्वमीरितं तत्त्ववेदिना।
असाध्येष्वपि दातव्यो रसोऽतः श्रेष्ठ उच्यते ॥ ५ ॥

तस्य कुतो मुक्तिः कुतः पिण्डस्य धारणम्। स्वदेहे खेचरत्वञ्च शिवत्वं येन लभ्यते ॥" इति। अन्यच्च—"दोषहीनो रसो ब्रह्मा मूर्च्छितस्तु जनार्दनः। मारितो रुद्ररूपी स्यात् बद्धः साक्षात् सदाशिवः ॥" इति। तस्य दर्शनात् स्पर्शनात् भक्षणात् स्मरणात् पूजनात् दानाच्च षड्विधं फलं लभ्यते। यथा—"केदारादीनि लिङ्गानि पृथिव्यां यानि कानिचित्। तानि दृष्ट्वा च यत् पुण्यं तत् पुण्यं रसदर्शनात् ॥ चन्दनागुरु-कर्पूर-कुङ्कुमान्तर्गतो रसः। मूर्च्छितः शिवपूजा सा शिवसान्निध्यसिद्धये ॥ भक्षणात् परमेशानि! हन्ति तापत्रयं रसः ; दुर्लभं ब्रह्मविष्णाद्यैः प्राप्यते परमं पदम् ॥ हृद्रोमकर्णिकान्तःस्थं रसेन्द्रं परमेश्वरि!। स्मरन् विमुच्यते पापैः सद्यो जन्मान्तरार्जितैः ॥ स्वयम्भूलिङ्गसाहस्रैर्यत् फलं सम्यगर्च्चनात्। तत् फलं कोटिगुणितं रसलिङ्गार्च्चनाद्भवेत् ॥ रसविद्या परा विद्या त्रैलोक्येऽपि च दुर्लभा। भुक्तिमुक्तिकरी यस्मात् तस्मात् ज्ञेया गुणान्वितैः ॥" इति ॥ ४ ॥

हेत्वन्तरमाह, साध्येष्वित्यादि।—साध्येषु रोगेषु सर्वं भेषजमुक्तम्, असाध्येषु भेषज नोक्तं, रसश्च साध्येषु असाध्येषु अपि दातव्य इति। यदौषधैर्न सिध्यति तत् असाध्यमिति, तत्रौषधं निष्प्रयोजनम् ; यच्च सूतेरपि सिध्यति तत्कथमसाध्यम्? इति। नैवम् ; असाध्येषु सर्वमौषधं निष्प्रयोजनं, न च सूतमिति। असाध्यं हि द्विविधम्,—अप्रतिक्रियं, याप्यञ्च ; अप्रतिक्रियेषु तथा याप्येषु च औषधं निष्प्रयोजनं, सूतश्चाप्रतिक्रियेषु तथा याप्येषु प्रयोक्तव्यं यापनार्थमिति, न तु व्याधिनिःशेषकरणार्थञ्च ॥ ५ ॥

हतो हन्ति जराव्याधिं मूर्च्छितो व्याधिघातकः ।
बद्धः खेचरतां धत्ते कोऽन्यः सूतात् कृपाकरः ॥ ६ ॥

अथ रसपर्य्यायमाह ।—

रसेन्द्रः पारदः सूतः सूतराजश्च सूतकः ।
शिवतेजो रसः सप्त नामान्येवं रसस्य तु ॥ ७ ॥

मतान्तरम् ।—

शिववीजं रसः सूतः पारदश्च रसेन्द्रकः ।
एतानि रसनामानि तथाऽन्यानि यथा शिवे ॥ ८ ॥

अथ रसलक्षणम् ।—

अन्तः सुनीलो वहिरुज्ज्वलो यो
मध्याह्नसूर्य्यप्रतिमप्रकाशः ।
शस्तोऽथ धूम्रः परिपाण्डरश्च
चित्रो न योज्यो रसकर्मसिद्धौ ॥ ९ ॥

अथ रसदोषानाह ।—

नागो वङ्गो मलो वह्निश्चाञ्चल्यञ्च विषं गिरिः ।
असह्याग्निर्महादोषा निसर्गाः पारदे स्थिताः ॥ १० ॥

हेत्वन्तरमाह, हत इत्यादि ।—हत इत्यत्र सूत इति शेषः । जराव्याधिर्वार्द्धकाद्यकालपलितकेशादिरूपव्याधिः ; एवं मूर्च्छितोऽपि व्याधिं हन्ति । बद्ध इति ।—बद्धपारदः खेचरतां ददातीति ॥ ६ ॥

रसपर्य्यायमाह, रसेन्द्र इत्यादि ।—यथा शिव इत्यनेन शिवपर्य्यायाणामपि रसवाचकत्वं बोधयति ॥ ७ ॥ ८ ॥

रसलक्षणमाह,—अन्तः सुनील इत्यादि । पारदे स्थितदोषमाह, नाग इत्यादि ।—नागः,—सीसकः, निसर्गाः इति स्वाभाविकाः । ते

व्रणं कुष्ठं तथा जाड्यं दाहं वीर्य्यस्य नाशनम् ।
मरणं जड़तां स्फोटं कुर्वन्त्येते क्रमान्नृणाम् ॥ ११ ॥
तस्माद्रसस्य संशुद्धिं विदध्याद्भिषजां वरः ।
शुद्धोऽयममृतं साक्षाद्दोषयुक्तो रसो विषम् ॥ १२ ॥

मतान्तरम् ।—

दोषहीनो यदा सूतस्तदा मृत्युज्वरापहः ।
शुद्धोऽयममृतः साक्षात् दोषयुक्तो रसो विषम् ॥ १३ ॥

अथ रसशोधनम् ।—

अथातः संप्रवक्ष्यामि पारदस्य विशोधनम् ।
रसो ग्राह्यः सुनक्षत्रे पलानां शतमात्रकम् ॥
पञ्चाशत् पञ्चविंशद्वा दशपञ्चैकमेव वा ।
पलाद्धीनो न कर्त्तव्यो रससंस्कार उत्तमः ॥ १४ ॥

मतान्तरम् ।—

शतं पञ्चाशतं वापि पञ्चविंशद्दशैव च ।
पञ्चैकं वा पलञ्चैव पलार्द्धं कर्षमेव च ॥ १५ ॥

सीसकादयः यथाक्रमं व्रणादि कुर्वन्ति। तन्त्रान्तरे तु अन्यथा पठ्यते, यथा,—"नागो वङ्गो मलो वह्निश्चाञ्चल्यञ्च विषं गिरिः। असह्याग्निर्महादोषाः निसर्गाः पारदे स्थिताः॥ पर्पटी पाटली भेदी द्रावी मलकरी तथा। अन्धकरी तथा ध्वाङ्क्षी विज्ञेयाः सप्तकञ्चुकाः॥" तस्मादिति सीसकादिदोषात्। संशुद्धिमित्यादि।—शुद्धिश्चात्र द्विविधा प्रोक्ता; उक्तं हि—"व्याधौ रसायने चैव द्विविधा सा प्रकीर्त्तिता। या शुद्धिः कथिता व्याधौ सा नेष्टा हि रसायने॥ रसायने तु या शुद्धिः सा व्याधावपि कीर्त्तिता।" इति॥ ९—१४॥

कर्षान्न्यूनो न कर्त्तव्यो रससंस्कार उत्तमः ।
प्रयोगेषु च सर्वेषु यथालाभं प्रकल्पयेत् ॥ १६ ॥
शुभेऽह्नि विष्णुं परिचिन्त्य कुर्य्यात् सम्यक् कुमारीवटकार्चनञ्च ।
सुलौहपाषाणसमुद्भवेऽस्मिन् दृढ़े च वेदाङ्गुलिगर्भमात्रे ॥ १७ ॥
सुतप्तखल्ले निजमन्त्रयुक्तां विधाय रक्षां स्थिरसारबुद्धिः ।
अनन्यचित्तः शिवभक्तियुक्तः समाचरेत् कर्म्म रसस्य तज्ज्ञः ॥१८॥

तप्तखल्ललक्षणम् ।—

अजाशकृत् तुषाग्निञ्च भूगर्त्ते वितयं क्षिपेत् ।
तस्योपरि स्थितं खल्लं तप्तखल्लमिति स्मृतम् ॥ १९ ॥

अथ (अघोर) रक्षामन्त्रः ।—

अघोरेभ्योऽथ घोरेभ्यो घोराघोरतरेभ्यश्च ।
सर्वतः सर्वसर्वेभ्यो नमस्ते रुद्ररूपिभ्यः ॥ २० ॥

अथ रसनिगड़ः ।—

स्नुह्यर्कसम्भवं क्षीरं ब्रह्मवीजञ्च गुग्गुलुः ।
सैन्धवं द्विगुणं मर्द्दं निगड़ोऽयं महोत्तमः ॥ २१ ॥

अथ साधारणशुद्धिः ।—

षोड़शांशैर्भिषक् चूर्णैरेकत्र मर्द्दयेद्रसम् ।
प्रत्येकं प्रत्यहं दत्त्वा सप्तवारं विमर्द्दयेत् ॥ २२ ॥

ग्रतं पञ्चाशतमित्यादौ यथालाभं प्रकल्पयेदिति ।—औषधप्रयोगेषु यथाप्रयोजनं तन्मात्रं वा ग्राह्यमित्यर्थः ॥ १५— १८ ॥

तप्तखल्ललक्षणमाह अजाशकृदित्यादि ॥ १९—२० ॥

अथ रसनिगड़माह, स्नुह्यर्केत्यादि ।—स्नुही—"सीज्" इति लोके । अर्कः,—आकन्दः, ताभ्यां सम्भवं यत् क्षीरं तत् । ब्रह्मवीजं—पलाश-

विशेषशुद्धिमाह।—

सोर्णैर्निशेष्टकाधूम-जम्बीराम्बुभिरादिनम्।
मर्दितः काञ्जिकैर्धौतो नागदोषं रसस्त्यजेत्॥ २३॥
विशालाङ्कोठचूर्णेन वङ्गदोषं विमुञ्चति।
राजवृक्षो मलं हन्ति चित्रको वह्निदूषणम्॥ २४॥
चाञ्चल्यं कृष्णधुस्तूरं त्रिफला विषनाशिनी।
कटुत्रयं गिरिं हन्ति असह्याग्निं त्रिकण्टकः॥ २५॥
प्रतिदोषं कलांशेन तत्तच्चूर्णं सकन्यकम्।
उद्धृत्योष्णारनालेन मृत्पात्रे चालयेत् सुधीः।
एवं संशोधितः सूतः सप्तकञ्चुकवर्जितः॥ २६॥

बीजम्। द्विगुणमिति—रसापेक्षया मिलितं सर्वं द्विगुणम्। षोड़शांशैरित्यादौ चूर्णैरिति—रसमारकद्रव्याणां चूर्णैः। षोड़शांशैरित्युत्तरत्रापि सम्बध्यते विशेषाभावात्॥ २१।२२॥

सोर्णैरित्यादिना विशेषशुद्धिमाह।—ऊर्णैः,—मेषरोमभिः, निशा—हरिद्रा। 'आदिनम्' इति।—अत्र सप्ताहमित्युपदिशन्ति वृद्धाः। ऊर्णादि सर्वं कुमार्य्या सहितं रसात् षोड़शांशं दत्त्वा सप्ताहं मर्दितं ततः काञ्जिके प्रक्षालनीयम्; एवं विशालादिचूर्णमपि। विशाला—गोरक्षकर्कटी। अङ्कोठ—'आँकोड़' इति ख्यातः। 'अङ्कोठ' इत्यत्र 'अङ्कोल' इति केचित् पठन्ति। अङ्कोल— "काँकरोल्" इति वङ्गभाषा। राजवृक्षः,—सोनालुः, तस्य फलमज्जा ग्राह्या। कलांशेनेति।—पारदस्य षोड़शांशेनेत्यर्थः। सप्तकञ्चुकवर्जित इति—सीसकादिसप्तदोषवर्जित इत्यर्थः॥ २३—२६॥

मतान्तरम् ।—

श्रीखण्डं देवकाष्ठञ्च काकजङ्घाजयाद्रवैः ।
कर्क्कटीमूषलीकन्या-द्रवं दत्त्वा विमर्दयेत् ।
दिनैकं पातयेत् पश्चात् तं शुद्धं विनियोजयेत् ॥ २७ ॥

मतान्तरम् ।—

कुमार्य्या च निशाचूर्णैर्दिनं सूतं विमर्दयेत् ।
पातयेत् पातनायन्त्रे सम्यक् शुद्धो भवेद्रसः ॥ २८ ॥

मतान्तरम् ।—

रसस्य द्वादशांशेन गन्धं दत्त्वा विमर्दयेत् ।
जम्बीरोत्थैर्द्रवैर्यामं पाच्यं पातनयन्त्रके ।
पुनर्मर्द्यं पुनः पाच्यं सप्तवारं विशुद्धये ॥ २९ ॥

मतान्तरम् ।—

वर्द्धमानस्य चार्द्रकस्य रसेन च ।
वायस्याश्चानुपूर्व्वैवं मर्दनं रसशोधनम् । ३० ॥
एषां प्रत्येकशस्तावत् मर्दयेत् स्वरसेन च ।
यावच्च शुष्कतां याति सप्तवारं विचक्षणः ॥ ३१ ॥

श्रीखण्डमित्यादि ।—श्रीखण्डं—श्वेतचन्दनं, काकजङ्घा—गुञ्जा, रससंस्कारे सर्व्वत्र अनेन व्यवहार इति वृद्धाः ; केचित्तु—'केउया ठेङ्गा' इति प्रसिद्धार्थपरित्यागे प्रमाणाभावात् तन्न इच्छन्ति। मूषली—तालमूली, पातयेदित्यूर्द्ध्वपातनायन्त्रेण ॥ २७ ॥ २८ ॥

रसस्य द्वादशांशेनेत्यादौ पातनयन्त्रक इति—ऊर्द्ध्वपातनायन्त्रे ॥ २९ ॥

वर्द्धमानस्य—एरण्डस्य। वायसी—काकमाची ॥ ३० ॥

उद्धृत्योष्णारनालेन मृद्भाण्डे चालयेत् सुधीः।
सर्व्वदोषविनिर्मुक्तः सप्तकञ्चुकवर्जितः।
जायते शुद्धसूतोऽयं युज्यते सर्व्वकर्म्मसु॥ ३२॥

मतान्तरम्।—

निशेष्टकाधूमरजोऽम्लपिष्टो विकञ्चुकः स्याद्धि ततश्च सोर्णः।
वरारनालानलकन्यकाभिः सत्र्यूषणाभिर्मर्दितस्तु सूतः॥ ३३॥

मतान्तरम्।—

दिनैकं मर्दयेत् सूतं कुमारीसम्भवैर्द्रवैः।
तथा चित्रकजैः क्वाथैर्मर्दयेदेकवासरम्।
काकमाचीरसैः सार्द्धं दिनमेकन्तु मर्दयेत्॥ ३४॥

मतान्तरम्।

रसोनस्वरसैः सूतः नागवल्लीदलोत्थितैः।
त्रिफलायास्तथा क्वाथै रसो मर्द्यः प्रयत्नतः॥ ३५॥
ततस्तेभ्यः पृथक् कृत्वा सूतं प्रक्षाल्य काञ्जिकैः।
सर्वदोषविनिर्मुक्तं योजयेत् रसकर्म्मसु॥ ३६॥

अथोर्द्धपातनम्।—

भागास्त्रयो रसस्यार्क-भागमेकं विमर्दयेत्।
जम्बीरद्रवयोगेन यावदायाति पिण्डताम्॥ ३७॥

निशेष्टकेत्यादौ।—सोर्णः,—मेषरोमसहितः, वरा—त्रिफला, आरनालः,—काञ्जिकः। अनलः,—चित्रकः, त्र्यूषणं—त्रिकटुकम्॥३१—३६॥

अधुना रसायने विशेषशुद्धिं प्रदर्शयितुम् ऊर्द्धपातनमाह—भागा इत्यादि। अर्कभागमेकमिति ताम्रस्य चैको भागः।

तत्पिण्डं तलभाण्डस्थमूर्द्ध्वभाण्डे जलं क्षिपेत् ।
कृत्वाऽऽलवालकं वाऽपि ततः सूतं समुद्धरेत् ।
ऊर्द्ध्वपातनमित्युक्तं भिषग्भिः सूतशोधने ॥ ३८ ॥

अथाधःपातनम् ।—

नवनीताह्वयं गन्धं घृष्ट्वा जम्भाम्भसा दिनम् ।
वानरीशिग्रुशिखिभिः सैन्धवासुरिसंयुतैः ॥ ३९ ॥
नष्टपिष्टं रसं कृत्वा लेपयेदूर्द्ध्वभाण्डके ।
ऊर्द्ध्वभाण्डोदरं लिप्त्वाऽधोभाण्डं जलसंयुतम् ॥ ४० ॥
सन्धिलेपं द्वयोः कृत्वा तत् यन्त्रं भुवि पूरयेत् ।

ऊर्द्ध्वपातनलक्षणञ्चाह—तत्पिण्डमिति। तन्त्रान्तरेऽस्य विद्याधरयन्त्रमिति संज्ञान्तरम्। यथा—"स्थालिकोपरिविन्यस्त-स्थालीं सम्यक् निरोधयेत् । स्थालीमूर्ध्नि जलं दत्त्वा वह्निं प्रज्वालयेदधः। एतद्विद्याधरं यन्त्रं पातनायन्त्रमित्यपि॥" (पातनायन्त्रम्—ऊर्द्ध्वपातनायन्त्रम्)। हण्डिकोपरितनभागेऽन्यां हण्डिकाञ्चोर्द्ध्वमुखीं विन्यस्याधोहण्डिकाभ्यन्तरे पाच्यं सूतादिकं निवेश्य च द्वयोः सन्धिं निरोधयेत्; ततः उपरितनस्थाल्यां जलं दत्त्वा अधो वह्निं प्रज्वालयेदिति। पातनञ्च त्रिविधम्—ऊर्द्ध्वपातनम्, अधःपातनं, तिर्य्यक्-पातनञ्च। ऊर्द्ध्वभाण्डे उत्तानीभूते तत्रैव जलं देयं, न्युब्जीभूते तु जलधारणार्थमालबालकल्पना। क्वचिदत्र "कृत्वाऽऽलबालकं वाऽपि" इत्येतदनन्तरं "शीताम्बु वाऽऽर्द्रकर्पटम्। तस्याधो तीव्रमग्निञ्च" इति पाठान्तरं दृश्यते। ऊर्द्ध्वभाण्डोपरि शीतं जलं वारं वारं देयं, किञ्चिदुष्णञ्च देयम्। उष्णीभूते ह्युदके पारदानवस्थानोपपत्तेः। खटिकया चन्द्रकान्तेन वा भाण्डतलदेशः विलेप्यः तल्लग्नः पारदः वस्त्रपूतो ग्राह्यः ॥ ३७ ॥ ३८ ॥

अथ अधःपातनमाह, नवनीतेति।—नवनीताह्वयं गन्धम्—आमला-

उपरिष्टात् पुटोद्दत्ते जले पतति पारदः ।
अधःपातनमित्युक्तं सिद्धाद्यैः सूतकर्म्मणि ॥ ४१ ॥

अथ तिर्य्यक्पातनम् ।—

घटे रसं विनिक्षिप्य सजलं घटमन्यकम् ।
तिर्य्यङ्मुखं द्वयोः कृत्वा तन्मुखं रोधयेत् सुधीः ॥ ४२ ॥
रसाधो ज्वालयेदग्निं यावत् सूतो जलं विशेत् ।
तिर्य्यक्पातनमित्युक्तं सिद्धैर्नागार्जुनादिभिः ॥ ४३ ॥

अथ बोधनम् ।—

एवं कदर्थितः सूतः षण्ढत्वमधिगच्छति ।
तन्मुक्तयेऽस्य क्रियते बोधनं कथ्यते हि तत् ॥ ४४ ॥
विश्वामित्रकपाले वा काचकूप्यामथापि वा
सूते जलं विनिक्षिप्य तत्र तन्मज्जनावधि ॥ ४५ ॥
पूरयेत् त्रिदिनं भूम्यां गजहस्तप्रमाणतः ।
अनेन सूतराजोऽयं षण्ढभावं विमुञ्चति ॥ ४६ ॥

सार, "लाउया गन्धक" इति ख्यातम् । स च पारदसमः । जम्भाम्भसा—जम्बीररसेन । शिखी—अपामार्ग इति केचित्, चित्रकमित्यपरे । आसुरी—श्वेतसर्षपः; छन्दोऽनुरोधात् ह्रस्वता ॥ ३९—४१ ॥

अथ तिर्य्यक्पातनमाह, घटे रसमित्यादि । रोधयेदिति—सम्बन्धयेदित्यर्थः । ["मिश्रितौ चेद्रसे नाग-वङ्गौ विक्रयहेतुना । ताभ्यां स्यात् कृत्रिमो दोषस्तन्मुक्तिः पातनक्रमात् ॥" ग्रन्थकारैरुपेक्षितमप्येतद् वचनं कृत्रिमदोषवारणाय अस्माभिरिह सन्निवेशितमित्यायुष्मत्सुहृद्भिर्विभाव्यम्] ॥ ४२ ॥ ४३ ॥

अथ बोधनमाह,—एवमित्यादि । विश्वामित्रेत्यादि ।—विश्वामित्र-

अथ हिङ्गुलाकृष्टो रसः ।—

अथवा हिङ्गुलात् सूतं ग्राहयेत् तन्निगद्यते ।
जम्बीरनिम्बुनीरेण मर्दितो हिङ्गुलो दिनम् ॥ ४७ ॥
ऊर्द्ध्वपातनयन्त्रेण ग्राह्यः स्यान्निर्मलो रसः ।
कञ्चुकैर्नागवङ्गाद्यैर्निर्मुक्तो रसकर्म्मणि ।
विना कर्म्माष्टकेनैव सूतोऽयं सर्वकर्म्मकृत् ॥ ४८ ॥

अष्टकर्म यथा ।—

स्वेदनं मर्दनञ्चैव मूर्च्छनोत्थापने तथा ।
पातनं बोधनञ्चैव नियामनमतः परम् ॥ ४९ ॥
दीपनञ्चेति संस्कारा: सूतस्याष्टौ प्रकीर्त्तिताः ॥ ५० ॥

कपाले—नारिकेलखर्परे । गजहस्तः,—त्रिंशदङ्गुलीमितः ;—"साधारण-नराङ्गुल्या त्रिंशदङ्गुलको गजः" इति वचनात् ॥ ४४—४६ ॥

अथ हिङ्गुलाकृष्टरसमाह,—अथवेति । स्पष्टम् ॥ ४७ ॥ ४८ ॥

स्वेदनमित्यादिना अष्टादशरसकर्म्मणां मध्ये दीपनान्ता अष्टौ संस्कारा उक्ताः । तेषां लक्षणं यथा,—"रसं चतुर्गुणे वस्त्रे दिनं दोला-गतं पचेत् । वराव्योषाग्निकन्यात्तैः काञ्जिके स्वेदनन्त्विदम् ॥ गृहधूमे-ष्टकाजाजी-दग्धोर्णागुड़सैन्धवैः । सकाञ्जिकैः षोड़शांशै-र्मर्दनं त्रिदिनं शुभम् ॥ वरावह्निकुमारीभिः सप्तधा मूर्च्छितो रसः । पात्यः पातनयन्त्रेण मूर्च्छितो भवति ध्रुवम् ॥ मर्दयेत् कन्यकाद्रावैश्चूर्णितै रात्रिपादिकैः । पातयेत् पातनायन्त्रे इत्युत्थापनमीरितम् ॥" पातनमिति—ऊर्द्ध्वादि-पातनम् । बोधनं—"विश्वामित्रकपाले" इत्यादिना चोक्तम् । नियामनं यथा,—"सर्पाक्षी-चिञ्चिकावन्ध्या-भृङ्गाजकन्यकाम्बुभिः । त्रिदिनं मर्दितः सूतो नियमात् स्थिरतां व्रजेत् ॥" (सर्पाक्षी—गन्धनाकुली,

मतान्तरम् ।—

दरदं तण्डुलस्थूलं कृत्वा मृत्पात्रके त्रिदिनम् ।
भाव्यं जम्बीररसैश्चाङ्गेर्य्या वा रसैर्बहुधा ॥ ५१ ॥
ततश्च जम्बीरवारिणा चाङ्गेर्य्या रसेन परिप्लुतम् ।
कृत्वा स्थालीमध्ये निधाय तदुपरि कठिनीद्दृष्टम् ॥ ५२ ॥

"रास्ना" इति ख्याता । चिञ्चिकावन्ध्या—वन्ध्याककोँटकी) । दीपनं यथा—"काशीशं पञ्चलवणं राजिका मरिचानि च । भूशिग्रुवीजमेकत्र टङ्गणेन समन्वितम् ॥ आलोड्य काञ्जिके दोला-यन्त्रे पाकाद्दिनैस्त्रिभिः । दीपनं जायते सम्यक् सूतराजस्य जारणे ॥" इति । अष्टादशरसकर्म्मणां मध्ये दीपनान्ता अष्टौ संस्काराः संक्षेपेणोक्ताः, ग्रासादयश्चापरे दश-संस्काराः ग्रन्थबाहुल्याद्ध्येयाः । अत्र प्रयोगार्थञ्च रसस्य चतुर्विधसंस्कारण-मुक्तम् ; यथा,—शोधनं, मूर्च्छनं, बन्धनं मारणञ्च । तत्र शोधनमग्रे वाच्यं तप्तखल्लादिना दशसंस्काररूपम् । मूर्च्छनञ्च द्विविधं,—निर्गन्धं सगन्धञ्च । निर्गन्धं रसकर्पूरादि, सगन्धञ्च कज्जलरूपं, रसगन्धं तथा रस-सिन्दूरादि च । उक्तञ्च,—"गौरवं घनता यस्मिन् तेजस्वित्वञ्च दृश्यते सूते । सोऽयं मूर्च्छितः सूतो विज्ञेयो नैव वह्निना सहः ॥ निर्गन्धञ्च सगन्धं द्विविधं विद्यात् तु मूर्च्छितं सूतम् । निर्गन्धं रसकर्पूरं सगन्धं रससिन्दूरं रसगन्धकं विद्यात् ॥ यस्मिन् गुरुता अरुणता तेजस्वित्वञ्च सूते दृश्यते । दृढ़शिखिमध्ये तिष्ठेत् स बद्धः सूतोऽमृतसमः ॥ दुष्करबन्धनमेतत् कलौ साधकोपदेशकाभावात् । रसमारणमपि तद्वत् ज्ञेयं सुधिया तथाऽभा-वात् ॥ द्रवघनगुरुता-चञ्चलता-तेजस्वित्वञ्च न दृश्यते यत्र । तं मृतसूतं विद्यात् नैकः सर्व्वत्र वर्णनियमोऽस्ति ॥" इति ॥ ४८।५० ॥

प्रकारान्तरं हिङ्गुलाकृष्टरसमाह, दरदमित्यादि ।—दरदं—हिङ्गु-

उत्तानं चारु शरावं तत्र त्रिशद्वारं जलं देयम् ।
उर्ध्वे देयं तथैव तदूर्द्ध्वपातनेन निर्म्मल: शिवज: ॥ ५३ ॥

मतान्तरम् ।—

पारिभद्ररसै: पेष्यं हिङ्गुलं याममात्रकम् ।
जम्बीराणां रसैर्वाऽथ पचेत् पातनयन्त्रके ॥ ५४ ॥
तं सूतं योजयेद् योगी सप्तकञ्चुकवर्जितम् ।
संशुद्धिमन्तरेणापि शुद्धोऽयं रसकर्म्मणि ॥ ५५ ॥

अथ मूर्च्छनम् ।—

गन्धकेन रसं प्राज्ञ: सुदृढ़ं मर्दयेद्भिषक् ।
कज्जलाभो यदा सूतो विहाय घनचापलम् ॥ ५६ ॥
दृश्यतेऽसौ तदा ज्ञेयो मूर्च्छितो रसकोविदै: ।
असौ रोगचयं हन्यादनुपानस्य योगत: ॥ ५७ ॥

लम् । स्थालीमध्ये हिङ्गुलं यथोक्तविधिना संस्थाप्य तदुपरि कठिनो-लिप्तम् उत्तानं शरावं दत्त्वा मृदाम्बरै: सन्धिं दृढ़ं रुन्ध्यात्; तत: पात्राधो ज्वाला देया, शरावोपरि वारं वारं जलं देयम्; किञ्चिदुष्णे च परित्यज्य पुन: जलं देयमिति । एवं त्रिंशद्वारं कृत्वा चावनामयेत् । (अष्टोत्तरशतवारमिति कुत्रचित् वृद्धव्यवहार: । वस्तुतस्तु हिङ्गुल-मानापेक्षो वारनियम: भवितुमर्हति) सुशीते च पात्रे शरावमुद्घाट्य खटिकासदृशं पारदं गृह्णीयात् । ततो वस्त्रे छानयित्वा वारं वारं जले काञ्जिके वा प्रक्षाल्य निर्म्मलं पारदं गृह्णीयादिति ॥ ५१—५३ ॥

मतान्तरमाह, पारिभद्रेति । पारिभद्र:,—निम्ब: । पातनायन्त्रके इति ।—ऊर्द्ध्वपातनायन्त्रे । संशुद्धिमन्तरेणापीति ।—तप्तखल्लादिशुद्धि-व्यतिरेकेण अयं शुद्ध: । अत्र तप्तखल्लादिना तथा पातनादिना च शोधनं

अथ मारणम् ।—

द्विपलं शुद्धसूतस्य सूतार्द्धं गन्धकं तथा ।
कन्यानीरेण संमर्द्य दिनमेकं निरन्तरम् ।
रुद्ध्वा तद्भूधरे यन्त्रे दिनैकं मारयेत् पुटे ॥ ५८ ॥

मतान्तरम् ।—

भुजङ्गवल्लीनीरेण मर्दयेत् पारदं दृढ़म् ।
कर्कटीकन्दमूषायां सम्पुटस्थं पुटेद्गजे ।
भस्म तत् योगवाहि स्यात् सर्वकर्म्मसु योजयेत् ॥ ५९ ॥

मतान्तरम् ।—

श्वेताङ्कोठजटानीरैर्मर्द्यः सूतो दिनत्रयम् ।
पुटेत्तु चान्धमूषायां सूतो भस्मत्वमाप्नुयात् ॥ ६० ॥

निष्प्रयोजनमिति भावः । मूर्च्छनमाह, गन्धकेनेति ।—सुगमम् ॥५४—५७ ॥

मारणमाह—द्विपलमित्यादि । भूधरे यन्त्रे इति ।—"बालुकासु समस्ताङ्गं गर्त्ते मूषा रसान्विता । दीप्तोपलैः संवृणुयात् यन्त्रं भूधर-नामकम् ॥" इत्यादिनोक्तम् ॥ ५८ ॥

मतान्तरमाह, भुजङ्गवल्लीति ।—भुजङ्गवल्ली—पर्णपलम् । कर्कटी—गोरचकर्कटी, "राखालशशा" इति प्रसिद्धस्य कन्देन बहिर्मृदावलिप्तेन रचितमूषायाम् । कर्कटीकन्दगर्भितं कृत्वा पारदं मृन्मूषायां पुटेत् इति शार्ङ्गधरः ॥५९॥

मतान्तरमाह,—श्वेताङ्कोठेत्यादि ।—जटा—मूलम् । अन्धमूषादीनि यन्त्राणि यन्त्रप्रकरणेऽनुसन्धेयानि ॥ ६० ॥

देवदाली हंसपादी यमचिञ्चा पुनर्नवा।
एभिः सूतो विष्टष्टव्यो पुटनात् म्रियते ध्रुवम् ॥ ६१ ॥

[इति भस्म]

अथ रससिन्दूरम्।—

भागो रसस्य त्रय एव भागा गन्धस्य माषः पवनाशनस्य।
संमर्द्य गाढ़ं सकलं सुभाण्डे तां कज्जलीं काचघटे निदध्यात्॥६२॥
संरुध्य मृत्कर्पटकैर्घटीं तां मुखे सुचूर्णां खटिकाञ्च दत्त्वा।
क्रमाग्निना त्रीणि दिनानि पक्का तां बालुकायन्त्रगतां ततः स्यात्॥६३
बन्धूकपुष्पारुणमीशजस्य भस्म प्रयोज्यं सकलामयेषु।
निजानुपानैर्मरणं जराञ्च हन्त्यस्य वल्लः क्रमसेवनेन ॥ ६४ ॥

मतान्तरम्।—

पलमात्रं रसं शुद्धं तावन्मात्रन्तु गन्धकम्।
विधिवत् कज्जलीं कृत्वा न्यग्रोधाङ्कुरवारिभिः ॥ ६५ ॥
भावनात्रितयं दत्त्वा स्थालीमध्ये निधापयेत्।
विरच्य कवचीयन्त्रं बालुकाभिः प्रपूरयेत् ॥ ६६ ॥

मतान्तरमाह, देवदालीत्यादि।—देवदाली—हस्तिघोषकः। हंसपादी थानकुनीति ख्याता, "थुलकुड़ि" इति वङ्गभाषा। यमचिञ्चा—वनयमानी ॥ ६१ ॥

अथ रससिन्दूरमाह,—भाग इत्यादि। पवनाशनस्येति—सीसकस्य। मृत्कर्पटकैः,—मृत्तिकायुक्तवस्त्रखण्डैः लेपयित्वा। ईशजस्य—पारदस्य। निजानुपानैः,—यथारोगं विहितानुपानैः। वल्लः,—"सार्द्धगुञ्जा" इति राजनिघण्टुः, "त्रिगुञ्जा" इति भावमिश्रः ॥ ६२—६४ ॥

मतान्तरमाह, पलमात्रमित्यादि।—अत्र रसस्य द्विपलं गन्धकस्य च द्विपलं ग्राह्यम्; प्रत्येकं पलमात्रमेव ग्राह्यमिति रामसेनः। रसं

दद्यात् तदनु मन्दाग्निं भिषग् यामचतुष्टयम्।
जायते रससिन्दूरं तरुणादित्यसन्निभम्।
अनुपानविशेषेण करोति विविधान् गुणान्॥ ६७॥

मतान्तरम्।—

पृथक् समं समं कृत्वा पारदं गन्धकं तथा।
नरसारं धूमसारं स्फटिकं याममात्रकम्॥ ६८॥
निम्बूरसेन संमर्द्य काचकूप्यां निवेशयेत्।
मुखे पाषाणखटिकां दत्त्वा मुद्रां प्रलेपयेत्॥ ६९॥
सप्तभिर्मृत्तिकावस्त्रैः पृथक् संशोष्य वेष्टयेत्।
सच्छिद्रायां मृदः स्थाल्यां कुपिकां तां निवेशयेत्॥ ७०॥
पूरयेत् सिकतापूरैः आ-गलं मतिमान् भिषक्।
निवेश्य चुल्ल्यां दहनं मन्दं मध्यं खरं क्रमात्॥ ७१॥

शुद्धमिति पूर्वोक्तशोधनीयद्रव्यैः शोधितम्। न्यग्रोधाङ्कुरवारिभिरिति वटाङ्कुररसैरित्यर्थः। कवचीयन्त्रं यदुक्तमत्रिसंहितायाम्,—

"नातिकृस्वां काचकूपीं न चातिमहतीं दृढाम्।
वाससा कर्द्दमाक्तेन परिवृत्य समन्ततः॥
संलिप्य मृदुमृत्स्नाभिः शोषयेद्भानुरश्मिना।
निधाय भेषजं तत्र मुखमाच्छादयेत् ततः॥
कठिन्या दृढया वाऽपि पचेद् यन्त्रे विधानतः।
कवचीयन्त्रमेतद्धि रसादिपचने मतम्॥" इति॥ ६५—६७॥

मतान्तरमाह, पृथगित्यादि।—नरसारं,—"निशादलम्" इति ख्यातम्। धूमसारं,—गृहधूमः, "झुल्" इति ख्यातः। पाषाण-खटिकां—"काठखड़ी" इति ख्यातम्। मुद्रां प्रलेपयेदिति सन्धिस्थानं

प्रज्वाल्य द्वादशं यामं स्वाङ्गशीतं समुद्धरेत् ।
स्फोटयित्वा तु मुक्ताभमूर्द्ध्वलग्नं बलिं त्यजेत् ।
अधःस्थं रससिन्दूरं सर्वरोगेषु योजयेत् ॥ ७२ ॥

अथ रसकर्पूरम् ।—

टङ्कणं मधु लाक्षा च ऊर्णा गुञ्जायुतो रसः ।
मर्द्दितो भृङ्गजद्रावैः दिनैकं चालयेत् पुनः ।
ध्मातो भस्मत्वमाप्नोति शुद्धकर्पूरसन्निभम् ॥ ७३ ॥

मतान्तरम् ।—

पिष्टं पांशुपटु प्रगाढ़ममलं वज्राम्बुणा नैकशः
सूतं धातुगतं खटीकवलितं तं सम्पुटे रोधयेत् ।
अन्तःस्थं लवणस्य तस्य च जले प्रज्वाल्य वह्निं दृढं
घस्रं ग्राह्यमथेन्दुकुन्दधवलं भस्मोपरिस्थं शनैः ॥ ७४ ॥
तद्वल्लद्वितयं लवङ्गसहितं प्रातः प्रभुक्तं नृणा-
मूर्द्ध्वं रेचयति द्वियाममसकृद् पेयं जलं शीतलम् ।

लेपयेत् । आ-गलमिति—काचकूपिकाया गलपर्य्यन्तं, न तु मल्लाखण्डस्य । अधःस्थं रससिन्दूरमित्यूर्द्ध्वलग्नगन्धकादधःस्थं रससिन्दूरं ग्राह्यं, न तु पात्राधस्तात्, पात्राधस्तु न रससिन्दूरं सम्भवतीति ॥ ६८—७२ ॥

अथ रसकर्पूरमाह, टङ्कणमित्यादि ।—ऊर्णा—मेषरोम, गुञ्जा—श्वेतगुञ्जा । "दिनैकं चालयेत् पुनः" इत्यत्र "दिनं सम्पुटमागतः" इति पाठस्तु साधीयान् ॥ ७३ ॥

मतान्तरमाह, पिष्टमित्यादि ।—पांशुपटु—पांशुलवणम् । वज्रो—स्नुहीभेदः, "सीज्" इति वङ्गभाषा । धातुगतमिति लौहपात्रगतं, खटीकवलितमिति खटिकया बद्धमुखम् । अन्तःस्थं—मध्यस्थम् । दृढं—

एतद्धन्ति च वत्सराधिकविषं षाण्मासिकं मासिकं
शैलोत्थं गरलं मृगेन्द्रकुटिलोद्भूतञ्च तात्कालिकम् ॥ ७५ ॥
[रसकर्पूरमिति रसमञ्जरीकारः ; श्वेतभस्मेति चन्द्रिकाकारः]।

सर्वाङ्गसुन्दरो रसः।—

मर्दयेत् रसगन्धौ च हस्तिशुण्डीद्रवैर्दृढम्।
भूधात्रिकारसैः वाऽपि पर्य्यन्तं दिनसप्ततः ॥ ७६ ॥
विघृष्य वालुकायन्त्रे मूषायां सन्निवेशयेत्।
दिनमेकं दहेदग्नौ मन्दं मन्दं निशावधि ॥ ७७ ॥
एवं निष्पाद्यते पीतः शीतः सूतस्तु गृह्यते।
पर्णखण्डेन तद्गुञ्जां भक्षयेत् सततं हिताम् ॥ ७८ ॥
क्षुद्बोधं कुरुते पूर्वमुदराणि विनाशयेत्।
जराणां नाशनः श्रेष्ठस्तद्वत् स्त्री-सुखकारकः ॥ ७९ ॥
हृदयोत्साहजननः सुरूपतनयप्रदः।
बलप्रदः सदा देहे जरानाशनतत्परः ॥ ८० ॥
अङ्गभङ्गादिकं दोषं सर्वं नाशयति क्षणात्।
एतस्मान्नापरः सूतो रसात् सर्वाङ्गसुन्दरात् ॥ ८१ ॥

[पीतभस्मेति चन्द्रिकाकारः]।

तीव्रम्। घस्रम्—एकदिनं, चतुर्यामावधि इति यावत्। इन्दुकुन्दधवलम्—अतिशुभ्रम्। वल्लद्वितयं—गुञ्जाचतुष्टयमितं, व्यवहारस्तु गुञ्जामात्रम्। द्वियामं—यामद्वयमनतिक्रम्य इत्यर्थः। शैलोत्थं—पाषाणघातजन्यम्। कुटिलं—दंष्ट्रा ॥ ७४।७५ ॥

सर्वाङ्गसुन्दरमाह, मर्दयेदिति।—रसगन्धकौ समौ कज्जलीकृत्य हस्तिशुण्डीरसैर्भूम्यामलकीरसैश्च दिनसप्तकं विघृष्य मूषायां निरुध्य

अथ कृष्णभस्म ।—

धान्याभ्रकं रसं तुल्यं मारयेत् मारकद्रवैः ।
दिनैकं तेन कल्केन वस्त्रं लिप्त्वा तु वर्त्तिकाम् ॥ ८२ ॥
विलिप्य तैलैर्वर्त्तिं तामेरण्डोत्थैः पुनः पुनः ।
तदाज्यभाण्डे प्रज्वाल्य गृह्णीयात् पतितञ्च यत् ॥ ८३ ॥
कृष्णभस्म भवेत् तच्च पुनर्मर्द्यं नियामकैः ।
दिनैकं पातयेत् यन्त्रे कन्दुकाख्ये न संशयः ।
मृतः सूतो भवेत् तच्च तत्तद्रोगेषु योजयेत् ॥ ८४ ॥
श्वेतं पीतं तथा रक्तं कृष्णञ्चेति चतुर्विधम् ।
लक्षणं भस्मसूतानां श्रेष्ठं स्यादुत्तरोत्तरम् ॥ ८५ ॥

अथ वज्रमूषाकरणम् ।—

द्वौ भागौ तुषदग्धस्य चैका वल्मीकमृत्तिका ।
लौहकिट्टस्य भागैकं श्वेतपाषाणभागिकम् ॥ ८६ ॥
नरकेशसमं किञ्चित् छागीक्षीरेण पेषयेत् ।
याममात्रं दृढं मर्द्यं तेन मूषां प्रकल्पयेत् ॥ ८७ ॥
शोषयित्वा रसं क्षिप्त्वा तत्कल्कैः सन्निरोधयेत् ।
वज्रमूषेयमाख्याता सम्यक् पारदसाधिका ॥ ८८ ॥

वालुकायन्त्रे कृत्वा दिनमेकं पचेत् । द्रवैः,—रसैः । पीत इति—पीतवर्णः सूतो गृह्यते इति ॥ ७६—८१ ॥

कृष्णभस्म आह,—धान्याभ्रकमित्यादि । मारकद्रवैरिति वक्ष्यमाण-मारकद्रव्यरसैः । एरण्डोत्थैः तैलैः इति सम्बन्धः ॥ ८२—८५ ॥

मूषाकरणमाह,—द्वौ भागाविति । तुषदग्धस्येति अर्द्धदग्धतुषस्य द्वौ भागाविति । लौहकिट्टस्य—लौहमलस्य । वज्रमूषा—इयमेवान्धमूषेति

अथ नियामकगणः।—

सर्पाक्षी वन्ध्यकर्कोटी कञ्चुकी यमचिञ्चिका।
शतावरी शङ्खपुष्पी शरपुङ्खा पुनर्नवा॥ ॥ ८८ ॥
मण्डूकपर्णी मत्स्याक्षी ब्रह्मदण्डी शिखण्डिनी।
अनन्ता काकजङ्घा च काकमाची च पोतिका॥ ८० ॥
विष्णुक्रान्ता सहचरा सहदेवी महाबला।
बला नागबला मूर्वा चक्रमर्दकरञ्जकौ।
पाठा तामलकी नीली जालिनी पद्मचारिणी॥ ८१ ॥
घण्टा विघण्टा गोजिह्वा कोकिलाक्षो घनध्वनिः।
आखुपर्णी क्षीरिणी च त्रिपुटी मेषशृङ्गिका॥ ८२ ॥
कृष्णवर्णा च तुलसी सिंही च गिरिकर्णिका।
एता नियामकौषध्यः पुष्पमूलदलान्विताः॥ ८३ ॥

अथ मारकवर्गः।—

घनवचाचित्रकगोक्षुराः कटुतुम्बी दन्तिका जातिः।
सर्पाक्षी शरपुङ्खा कन्या चाण्डालिनीकन्दम्॥ ८४ ॥
विषमुष्टिवज्रवल्लरी लज्जा लाक्षा च देवदाली च।

ख्याता, तस्या आकृतिः यथा,—"अन्धमूषा तु कर्त्तव्या गोस्तनाकारसन्निभा। सैवाच्छिद्रान्विता मध्ये गम्भीरा;सारणोचिता॥" इति॥ ८६—८८॥

अथ नियामकगणमाह, सर्पाक्षीत्यादि।—सर्पाक्षी—गन्धनाकुली। कञ्चुकी—क्षीरीप्रवचः। घनध्वनिः,—मुस्ता। ;पुष्पमूलदलान्विताः,—सर्पाक्ष्यादीनां सर्वमेव ग्राह्यम्॥ ८८—८३॥

सहदेवी नीपकणा निर्गुण्डी चक्रलाङ्गलिके ॥ ९५ ॥
माणार्कचन्द्ररेखा रविभक्ता काकमाचिका चार्कः ।
विष्णुक्रान्ता वायसतुण्डी वज्री च बला शुण्ठी च ॥ ९६ ॥
कोषातकी जयन्ती वाराही हस्तिशुण्डिका रम्भा ।
मत्स्याक्षी यमचिञ्चा हरिद्रे द्वे पुनर्नवाद्वितयम् ॥ ९७ ॥
धुस्तूरकाकजङ्घे शतावरी कञ्चुकी च बन्ध्या च ।
तिलभेकपर्णिदूर्वा मूर्वा च हरीतकी तुलसी ॥ ९८ ॥
गोकण्टकाखुपर्ण्यौ कर्कटीकन्दवर्गलता च ।
मुषली हिङ्गु-गुडूची शिग्रुर्गिरिकर्णिका महाराष्ट्री ॥ ९९ ॥
मार्कव-सैन्धव-सरणी-सोमलता श्वेतसर्षपोऽसनकः ।
हंसपदी व्याघ्रपदी किंशुकभल्लातकेन्द्रवारुणिकाः ॥ १०० ॥
सर्वस्याद्वांशं वा अष्टादशाधिकं वाऽपि द्रव्यम् ।
रसमारणमूर्च्छादौ युक्तिज्ञैर्विधिवदुपयोज्यम् ॥ १०१ ॥

अथ अम्लवर्गः ।—

अम्लवेतसजम्बीर-लुङ्गाम्लचणकाम्लकाः ।
नागरङ्गं तिन्तिड़ी च चिञ्चापत्रञ्च निम्बुकम् ॥ १०२ ॥
चाङ्गेरी दाड़िमञ्चैव करमर्दं तथैव च ।
एष चाम्लगणः प्रोक्तो वेतसाम्लसमायुतः ॥ १०३ ॥

अथ मारकवर्गमाह, घनवचेत्यादि ।—घनं—मुस्तकं, नीपं—कदम्बः, चन्द्ररेखा—सोमराजी, "माणार्कचन्द्ररेखा" इत्यत्र "शलार्कचन्द्रलेखा" इति क्वचित् पाठः । रविभक्ता—"पाटमाधा" इति ख्याता ॥ ९४—१०१ ।

अम्लवर्गमाह, अम्लवेतसेत्यादि ।—लुङ्गाम्लं—मातुलुङ्गम् ॥१०२।१०३॥

अथ लवणवर्गः।—

लवणानि च कथ्यन्ते सामुद्रं सैन्धवं विड़म्।
सौवर्च्चलं रोमकञ्च चुल्लिकालवणं तथा॥ १०४॥

अथ मूत्रवर्गः।—

मूत्राणि हस्तिकरभ-महिषीखरवाजिनाम्।
गोऽजाऽवीनां स्त्रियाः पुंसां मूत्रवर्ग उदाहृतः॥ १०५॥

अथ द्रावकवर्गः।—

गुञ्जाटङ्कणमध्वाज्य-गुड़ा द्रावकपञ्चकाः॥ १०६॥

अथ पित्तवर्गः।—

पित्तं पञ्चविधं मत्स्य-गवाश्वरुरुवर्हिजम्॥ १०७॥

अथ क्षारवर्गः।—

स्वर्जिका टङ्कणञ्चैव यवक्षार उदाहृतः॥ १०८॥

लवणवर्गमाह, लवणानीति।—सामुद्रं—करकच् इति ख्यातं, रोमकं—रुमावतीनदीभवम्॥ १०४॥

मूत्रवर्गमाह, मूत्राणीत्यादि।—करभः,—उष्ट्रः, खरः,—गर्दभः, अवीनामिति मेषाणाम्। हस्तिकरभमहिषखरवाजिनां पुंसां मूत्रं, गोऽजाऽवीनान्तु स्त्रीणामेव मूत्रं ग्राह्यम्॥ १०५॥

अथ द्रावकवर्गमाह, गुञ्जेति।—गुञ्जा—श्वेतगुञ्जा। धातूनां द्रवीकरणत्वात् द्रावकेति॥ १०६॥

पञ्चपित्तमाह, पित्तमित्यादि।—तन्त्रान्तरे तु एतदन्यथा पठ्यते यथा,—"वाराह-माहिष-च्छाग-मात्स्य-मायूरपित्तकम्। पञ्चपित्तमिति ख्यातं सर्व्वेष्वेव हि कर्म्मसु॥" इति॥ १०७॥

अथ क्षारवर्गमाह, स्वर्जिकेति।—स्वर्जिका—"साजिमाटि" इति ख्याता॥ १०८॥

अथ रससेवाक्रमफले ।—

प्रातरेव पुरतो विरेचनं तद्दिनोपवसनं विधाय च ।
तत्परेऽहनि च पथ्यसेवनं तत्परेऽहनि रसेन्द्रसेवनम् ॥ १०९ ॥
बुद्धिस्मृतिप्रभाकान्ति-बलञ्चैव रसस्तथा ।
वर्द्धन्ते सर्व एवैते रससेवाविधौ नृणाम् ॥ ११० ॥

तत्र पथ्यकथनम् ।—

हितं मुद्गाम्बु दुग्धाज्यं शाल्यन्नञ्च विशेषतः ।
शाकं पौनर्नवं वास्तु मेघनादञ्च यूथिकाम् ॥ १११ ॥
लवणं मागधीं मुस्तं पद्ममूलानि भक्षयेत् ।
अनुपानन्तु दातव्यं ज्ञात्वा रोगादिकं भिषक् ॥ ११२ ॥

तत्र अपथ्यकथनम् ।—

कुष्माण्डं कर्कटीञ्चैव कलिङ्गं कारवेल्लकम् ।
कुसुम्भिका च कर्कोटी कलम्बी काकमाचिका ।
ककाराष्टकमेतद्धि वर्जयेत् रसभक्षकः ॥ ११३ ॥

[इति रसशोधनाधिकारः ।]

रससेवाक्रममाह,—प्रातरिति । विरेचनमिति ।—आन्तिकशोधनोपलक्षितं कफान्तविरेचनमिति । पथ्यसेवनमिति ।—वक्ष्यमाणरससेवनोपयोगि पथ्यं भक्षयेत् । एतच्च रसायनोपलक्षितं रससेवनं, न च रोगोपशमनार्थमिति ; रोगे च वमनविरेचनाभ्यां शुद्धे देहे प्रयोज्यः ; येषु वमनविरेचनादिकमविधेयं तेषु च तद्व्यतिरेकेणापीति ॥ १०९।११० ॥

अथ पथ्यमाह,—हितमित्यादि । मुद्गाम्बु—मुद्गयूषम् ॥ १११।११२ ॥

अपथ्यमाह,—कुष्माण्डमित्यादि ।—स्पष्टम् ॥ ११३ ॥

[इति रसशोधनाधिकारः ।]

अथ उपरसभेदाः।—

गन्धको वज्र-वैक्रान्तं वज्राभ्रं तालकं शिला।
खर्परं शिखितुण्डञ्च विमलं हेममाक्षिकम्॥ ११४॥
काशीशं कान्तपाषाणं वराटाञ्जनहिङ्गुलम्।
गैरिकं शङ्खभूनागं टङ्कणञ्च शिलाजतु।
एते चोपरसाः प्रोक्ताः शोध्या मार्य्या विधानतः॥ ११५॥

तत्रादौ गन्धकोत्पत्तिमाह।—

श्वेतद्वीपे पुरा देव्याः क्रीड़न्त्याः प्रस्रुतं रजः।
क्षीरार्णवे तु स्नातायाः दुकूलं रजसाऽन्वितम्।
धौतं तत् सलिले तस्मिन् गन्धको गन्धवत् स्मृतः॥ ११६॥

अथ गन्धकभेदाः।—

चतुर्धा गन्धकः प्रोक्तो रक्तः पीतः सितोऽसितः।
रक्तो हेमक्रियासूक्तः पीतश्वेतौ रसायने।
व्रणादिलेपने श्वेतः कृष्णः श्रेष्ठः सुदुर्लभः॥ ११७॥

अशुद्धगन्धकदोषाः।—

अशुद्धगन्धः कुरुते तु तापं कुष्ठं भ्रमं पित्तरुजां करोति।
रूपं बलं वीर्य्यसुखं निहन्ति तस्मात् सुशुद्धो विनियोजनीयः॥ ११८॥

रसशोधनाद्यनन्तरमुपरसप्रकरणमाह।—प्रथमतः तत्र उपरसानां नामान्याह,—गन्धक इत्यादि।—वज्रं—हीरकम्। वैक्रान्तं—दग्ध-हीरकम्। शिखितुण्डं—शिखिग्रीवम्। हेममाक्षिकं—स्वर्णमाक्षिकम्। अञ्जनं—रसाञ्जनम्॥ ११४।११५॥

अथ गन्धकोत्पत्तिमाह, श्वेतद्वीप इत्यादि।—दुकूलं—वस्त्रम्॥११६॥

चतुर्धेत्यादौ।—श्रेष्ठः,—हेमादिषु सर्वत्र प्रशस्ततरः॥ ११७॥

गन्धकपर्य्याया: ।—

गन्धको गन्धपाषाणः शुकपुच्छः सुगन्धकः ।
सौगन्धिकः शुल्वरिपुः पामारिर्नवनीतकः ॥ ११९ ॥

अथ गन्धकशुद्धिः ।—

साज्यं भाण्डे पयः क्षिप्त्वा मुखं वस्त्रेण बन्धयेत् ।
तत्पृष्ठे गन्धकं क्षिप्त्वा शरावेण पिधापयेत् ॥ १२० ॥
भाण्डं निक्षिप्य भूम्यन्तरूर्द्धे देयं पुटं लघु ।
ततः क्षीरे द्रुतं गन्धं शुद्धं योगेषु योजयेत् ॥ १२१ ॥

मतान्तरम् ।—

लौहपात्रे विनिक्षिप्य घृतमग्नौ प्रतापयेत् ।
तप्ते घृते तत्समानं क्षिपेत् गन्धकजं रजः ॥ १२२ ॥
विद्रुतं गन्धकं दृष्ट्वा दुग्धमध्ये विनिक्षिपेत् ।
एवं गन्धकशुद्धिः स्यात् सर्वरोगेषु योजयेत् ॥ १२३ ॥

अशुद्धगन्धकस्य दोषमाह,—अशुद्धेत्यादि । पित्तरुजामिति पित्तकृतविकारम् । अथ गन्धकपर्य्यायानाह,—गन्धक इत्यादि ॥११८।११९॥

अथ गन्धकशोधनमाह, साज्यमित्यादि ।—भाण्डे साज्यं पयः क्षिप्त्वा घृताक्तसूक्ष्मवस्त्रेण मुखमाच्छाद्य चूर्णितं गन्धकं तस्योपरि संस्थापयेत् । ततः शरावेण पात्रमुखमाच्छाद्य सन्धिमालेपयेत्, ततश्च यन्त्रं भूम्यन्तः निधाय उपरिष्टात् गोमयाग्निना लघुपुटं देयम्; तेन पुटेन द्रवीभूतगन्धको निम्नस्थदुग्धमध्ये यदा पतति, तदा तमुद्धृत्य प्रक्षाल्य आतपे शोषयित्वा चूर्णयेत् ॥ १२०।१२१ ॥

मतान्तरमाह, लौहपात्रे इत्यादि ।—बदराङ्गारोपरि लौहपात्रं विन्यस्य घृतं निक्षिपेत्; तप्ते च घृते चूर्णितं गन्धकं दत्त्वा दर्व्विकया

अथ शुद्धगन्धकगुणाः।—

शुद्धगन्धो हरेद्रोगान् कुष्ठमृत्युज्वरादिकान्।
अग्निकारी महान् उष्णो वीर्य्यवृद्धिं करोति च॥ १२४॥

अन्यच्च।—

गन्धश्चातिरसायनः सुमधुरः पाके कटूष्णान्वितः
कण्डूकुष्ठविसर्पदर्पदलनो दीप्तानलः पाचनः।
आमोन्मन्थनशोधनो विषहरः सूताच्च वीर्य्यप्रदः
गौरीपुष्पभवस्तथा क्रिमिहरः स्वर्णाधिकं वीर्य्यकृत्॥१२५॥

अथ अशुद्धवज्रदोषाः।—

पार्श्वपीड़ां पाण्डुरोगं हृल्लासं दाहसन्ततिम्।
रोगानीकं गुरुत्वञ्च धत्ते वज्रमशोधितम्॥ १२६॥

अथ वज्रशोधनम्।—

व्याघ्रीकन्दगतं वज्रं दोलायन्त्रे विपाचितम्।
सप्ताहं कोद्रवक्वाथे कौलत्थे विमलं भवेत्॥ १२७॥

सञ्चालयेत्; यदा तैलवत् द्रवीभवति, तदा दुग्धपरिप्लुतपात्रे घृताक्त-सूक्ष्मवस्त्रेण पिहितमुखे ढालयेत्; तदनु प्रक्षाल्य आतपे शोषयित्वा चूर्णयेदिति॥ १२२।१२३॥

शुद्धगन्धकगुणमाह,—शुद्धगन्ध इत्यादि।—स्पष्टम्॥ १२४।१२५॥

अथ अशुद्धवज्रस्य दोषमाह,—पार्श्वपीड़ामिति। रोगानीकं—रोग-समूहम्॥ १२६॥

वज्रशोधनमारणादिकमाह, व्याघ्रीकन्दगतमिति।—वज्रं—हीरकम्; यद्यपि अत्र वज्रलक्षणं नोक्तं, तथापि तन्त्रान्तरमनुसर्त्तव्यम्; यथा,—"स्वच्छं विद्युत्प्रभं स्निग्धं सुन्दरं लघु लेखनम्। षड़ारं तीक्ष्णधारञ्च

मतान्तरम् ।—

व्याघ्रीकन्दगतं वज्रं दोलायन्त्रे विपाचयेत् ।
अहोरात्रात् समुद्धृत्य हयमूत्रेण सेचयेत् ।
वज्रीक्षीरेण वा सिञ्चेत् कुलिशं विमलं भवेत् ॥ १२८ ॥

सुश्यामारं श्रियं दिशेत् ॥ भस्माभं काकपादञ्च रेखाक्रान्तञ्च वर्त्तुलम् । आधारमलिनं बिन्दु-संत्रासं स्फुटितं तथा ॥ नीलाभं चिपिटं रूक्षं तद्वज्रं दोषलं त्यजेत् । स तु श्वेतः स्मृतो विप्रो लोहितः क्षत्रियो मतः ॥ पीतो वैश्योऽसितः शूद्रश्चतुर्वर्णात्मकश्च सः । रसायने मतो विप्रः सर्व-सिद्धिप्रदायकः ॥ क्षत्रियो व्याधिविध्वंसी जरामृत्युहरः परः । वैश्यो धनप्रदः प्रोक्तस्तथा देहस्य दार्ढ्यकृत् ॥ शूद्रो नाशयति व्याधीन् वयः-स्तम्भं करोति च । स्त्रीपुंनपुंसकाश्चैते लक्षणीयाश्च लक्षणैः ॥ सुवृत्ताः फलसम्पूर्णास्तेजोयुक्ता बृहत्तराः । पुरुषास्ते समाख्याता रेखाबिन्दु-विवर्जिताः ॥ रेखाबिन्दुसमायुक्ताः षड्स्रास्ते स्त्रियः स्मृताः । त्रिकोणाश्च सुदीर्घाश्च ते विज्ञेयाः नपुंसकाः ॥ तेषु स्युः पुरुषाः श्रेष्ठा रसबन्धन-कारिणः । स्त्रियः कुर्वन्ति कायस्य कान्तिं स्त्रीणां सुखप्रदाः ॥ नपुंसका-स्त्ववीर्य्याः स्युरकामाः सत्त्ववर्जिताः । स्त्रियः स्त्रीभ्यः प्रदातव्याः क्लीवे क्लीवं प्रयोजयेत् । सर्वेभ्यः सर्वदा देयाः पुरुषा वीर्य्यवर्द्धनाः ॥" इति । अशोधितवज्रस्य दोषपरिहरणाय शोधनमाह,—व्याघ्रीकन्देति ।—व्याघ्री —कण्टकारिका, तस्या मूलपिण्डान्तर्गतं वज्रं कोद्रवक्वाथैः कौलत्थैर्वा क्वाथैर्दोलायन्त्रे सप्ताहं पचेदित्यर्थः । दोलायन्त्रमाह अत्रिसंहितायां, यथा,—"द्रवद्रव्येण भाण्डस्य पूरितार्द्धोदरस्य च । मुखे तिर्य्यक्कृते दण्डे द्रव्यं सूत्रेण लम्बयेत् । स्वेदयेचान्तरगतं दोलायन्त्रमुदीरितम् ॥" इति ॥ १२७ ॥

मतान्तरमाह, व्याघ्रीकन्देति ।—प्रागुक्तप्रकारेण पाचितं वज्रम् अश्वमूत्रेण वज्रीक्षीरेण वा सिञ्चेदिति ॥ १२८ ॥

अथ वज्रमारणम्।—

त्रिवर्षारूढ़कार्पास-मूलमादाय पेषयेत्।
त्रिवर्षनागवल्ल्यास्तु निजद्रावैः प्रपेषयेत्॥ १२९॥
तद्गोलके क्षिपेद्वज्रं रुद्ध्वा गजपुटे पचेत्।
एवं सप्तपुटेनैव म्रियते कुलिशं ध्रुवम्॥ १३०॥

मतान्तरम्।—

कांस्यपात्रे तु भेकस्य मूत्रे वज्रन्तु निक्षिपेत्।
त्रिःसप्तकृत्वः सन्तप्तं वज्रमेवं मृतं भवेत्॥ १३१॥

अथान्यः।—

त्रिःसप्तकृत्वः सन्तप्तं खरमूत्रेण सेचयेत्।
मुद्गरैस्तालकं पिष्ट्वा तद्गोले कुलिशं क्षिपेत्॥ १३२॥
प्रध्मातं वाजिमूत्रेण सिक्तं पूर्वक्रमेण तु।
भस्मीभवति तद्वज्रं वज्रवत् कुरुते तनुम्॥ १३३॥

वज्रमारणविधिमाह, त्रिवर्षेत्यादि।—त्रिवर्षारोपितस्य कार्पासस्य मूलमादाय त्रिवर्षारूढ़नागवल्ल्या रसैः पेषयेत्, तत्पिण्डान्तर्निहितं सुशुद्धं वज्रं गजपुटे सप्तधा पचेदित्यर्थः। गजपुटमाह अत्रिसंहितायां, यथा,—"गजप्रमाणगम्भीरं शुषिरं क्रमशस्ततम्। वितस्तिद्वितयमुखं त्रिवितस्तितलं तथा॥ एवं विधाय यत्नेन विप्रिरस्कृकरीरवत्। तस्य पादत्रयं सम्यक् पूरयित्वा वनोपलैः॥ भैषज्यकोष्ठिकां तत्र स्थापयित्वा ततः पुनः। वनोपलैः संवृणुयादेतद्गजपुटं स्मृतम्॥" इति॥ १२९।१३०॥

मतान्तरमाह, कांस्येत्यादि।—स्पष्टम्॥ १३१॥

अन्यमतमाह, त्रिःसप्तकृत्व इत्यादि।—त्रिःसप्तेत्येकविंशतिवारं सन्तप्तं वज्रं गर्दभमूत्रेण सेचयेत्; ततः प्रक्षाल्य हरितालपिण्डान्तर्निहितं

अथ शोधितवज्रगुणाः।—

आयुष्यं सौख्यजननं बलरूपप्रदं तथा।
रोगघ्नं मृत्युहरणं वज्रभस्म भवत्यलम्॥ १३४॥

अथ वैक्रान्तशोधनम्।—

वैक्रान्तं वज्रवच्छोध्यं ध्मातं तत् हयमूत्रके।
हिमं तद्भस्म संयोज्यं वज्रस्थाने विचक्षणैः॥ १३५॥

मतान्तरम्।—

वैक्रान्तं वज्रवच्छोध्यं मारणञ्चैव तस्य तत्।
हयमूत्रेण तत् सेच्यं तप्तं तप्तं त्रिसप्तधा॥ १३६॥
ततश्चोत्तरवारुण्याः पञ्चाङ्गगोलके क्षिपेत्।
रुद्ध्वा मूषापुटे पाच्यम् उद्धृत्य गोलके पुनः॥ १३७॥
क्षिप्त्वा रुद्ध्वा पचेदेवं यावत् तत् भस्मतां व्रजेत्।
भस्मीभूतञ्च वैक्रान्तं वज्रस्थाने नियोजयेत्॥ १३८॥

कृत्वा दहेत्; प्रतप्ते च पिण्डे वाजिमूत्रेण सेचयेत्, एवमेकविंशतिवारम्॥ १३२।१३३॥

मृतवज्रस्य गुणमाह, आयुष्यमित्यादि।—आयुष्यम्—आयुष्करम्॥ १३४॥

वैक्रान्तशोधनमारणादिकमाह, वैक्रान्तमित्यादि।—वैक्रान्तं—दग्धहीरकम्; वैक्रान्तं वज्रवत् शोधनीयं मारणीयञ्च। मतान्तरे तु—एकविंशतिवारं ध्मातं तत् हयमूत्रेण सेचयेत्, ततः उत्तरवारुण्या मूलपत्रफलपुष्पवल्कलरूपं पञ्चाङ्गं निष्पिष्य तन्मध्ये तत्संशुद्धं वैक्रान्तं निधाय मूषापुटे पचेत्; एवं वारं वारं कुर्य्यात् यावत् भस्मतां याति॥ १३५—१३८॥

अथाभ्रपर्य्यायाः।—

अभ्रकं गिरिजावीजममलं गगनाह्वयम्॥ १३९॥

अथाभ्रशोधनम्।—

तत्र कृष्णाभ्रके वज्रं पीतात्मनि तु ग्राहिकम्।
सितात्मके तारकं स्याद्गौरकं रक्तके वरम्॥ १४०॥
सुप्रशस्तं कठोराङ्गं गुरु कज्जलसन्निभम्।
यन्न शब्दायते वह्नौ नैवोच्छूनं भवेदपि।
सदाकरसमुद्भूतं वज्रेति प्रथितं घनम्॥ १४१॥
पिनाकं दर्दुरं नागं वज्रञ्चेति चतुर्विधम्॥ १४२॥
ध्मातमभ्रं दलचयं पिनाकं विसृजत्यलम्।

अभ्रकपर्य्यायानाह, अभ्रकमिति।—स्पष्टम्। अथाभ्रकशोधनमारणादिकमाह,—तत्रेति। तेषां वज्राभ्रलक्षणमाह,—सुप्रशस्तमिति। नैवोच्छूनं भवेदिति।—वह्नौ क्षिप्तं सत् स्फीततां न याति। अन्ये तु "नैवोच्छूनं भवेत्" इत्यत्र "नैव शूलं भवेत्" इति पठन्ति। तन्मते—पीतादीनि त्रीणि शूलकराणि, वज्राभ्रन्तु न शूलकरमिति। यद्यपि अत्र महागुणत्वात् बहुव्यवहारात् सर्वरोगहन्तृत्वाच्च वज्राभ्रगुणा एवोक्ताः, तथापि इतरेषां ग्राहिकादीनां गुणदोषौ व्यवहारसौकर्य्यार्थं तन्त्रान्तरेऽनुसर्त्तव्यौ; यथा,—"विप्र-क्षत्रिय-विट्-शूद्र-भेदात् तत् स्याच्चतुर्विधम्। क्रमेणैव सितं रक्तं पीतं कृष्णञ्च वर्णतः॥ प्रशस्यते सितं तारे रक्तं तत्तु रसायने। पीतं हेमनि कृष्णन्तु गदेषु भूतयेऽपि च॥" इति। वज्रेत्यत्र समासश्छान्दसः। तत्तु वज्राभ्रं चतुर्विधं,—पिनाक-दर्दुर-नाग-वज्रभेदात्। यद्यपि वज्रमिति सामान्येनैव पूर्वमुक्तं, तथापि तदेकदेशं, तत्तु न विशेषतो दोषावहमिति; यथा भारतशब्देन समग्रभूभागोक्तावपि तदन्तर्गतवर्षमात्रोऽपि उपलभ्यते। पिनाकादीनां लक्षणमाह,—

फुत्कारं भुजगः कुर्य्यात् दर्दुरं भेकशब्दवत् ।
चतुर्थञ्च वरं ज्ञेयं न वह्नौ विकृतिं व्रजेत् ॥ १४३ ॥
कुष्ठप्रदं पिनाकं स्याद्दर्दुरं मरणप्रदम् ।
नागं देहगलं नित्यं व्याधिं कुर्य्याद् भगन्दरम् ॥ १४४ ॥
रसे रसायने चैव योज्यं वज्राभ्रकं प्रिये ! ।
तस्माद्वज्राभ्रकं ग्राह्यं व्याधिवार्द्धकमृत्युजित् ॥१४५ ॥

अशुद्धाभ्रस्य दोषाः ।—

अशुद्धाभ्रं निहन्त्यायुः वर्द्धयेत् मारुतं कफम् ।
अहतं छेदयेद्गात्रं मन्दाग्निक्रिमिवर्द्धनम् ॥ १४६ ॥

धान्याभ्रमाह ।—

पादांशशालिसंयुक्तमभ्रकं कम्बलोदरे ।
त्रिरात्रं स्थापयेत् नीरे तत् क्लिन्नं मर्दयेद्दृढम् ॥ १४७ ॥
कम्बलाद्गलितं श्लक्ष्णं बालुकारहितञ्च यत् ।
तद्धान्याभ्रमिति प्रोक्तमभ्रमारणसिद्धये ॥ १४८ ॥

ध्मातमित्यादि । फुत्कारं भुजग इति ।—नागन्तु वह्नौ नागवत् फुत्कारं परिमुञ्चति । पिनाकादीनां साधारणगुणदोषावाह,—कुष्ठप्रदमित्यादि ॥ १३९—१४५ ॥

अशुद्धाभ्रस्य दोषमाह, अशुद्धाभ्रमिति ।—स्पष्टम् । "छेदयेत्" इत्यत्र "चालयेत्" इति वा पाठः ॥ १४६ ॥

अभ्रस्य शोधनार्थं धान्याभ्रमाह, पादांशेति ।—बालुकारहितमभ्रं शालिधान्येन सह कम्बले बद्ध्वा त्रिदिनं नीरे स्थापनीयं, ततस्तत् क्लिन्नमभ्रं मर्दयेत्; यत्तु कम्बलात् गलति तत् धान्याभ्रकमिति । "अभ्रमारणसिद्धये" इत्यत्र "भिषग्भिर्देहसिद्धये" इति पाठान्तरम् ॥१४७।१४८॥

मतान्तरम् ।—

त्रिफलाक्वाथगोमूत्र-क्षीरकाञ्जिकसेचितम् ।
भस्त्राग्नौ सप्तधा व्योम तप्तं तप्तं विशुध्यति ॥ १४९ ॥

मतान्तरम् ।—

अथवा बदरीक्वाथे ध्मातमभ्रं विनिक्षिपेत् ।
मर्दितं पाणिना शुष्कं धान्याभ्रादतिरिच्यते ॥ १५० ॥

मतान्तरम् ।—

अगस्त्यपुष्पतोयेन पिष्टं शूरणकन्दगम् ।
गोष्ठभूमिगतं मासं जायते रससन्निभम् ॥ १५१ ॥

[इत्यभ्रशोधनम्] ।

अथाभ्रमारणम् ।—

वज्राभ्रकं समादाय निक्षिप्य स्थालिकोदरे ।
रम्भादिक्षारतोयेन पचेद् गोमयवह्निना ॥ १५२ ॥
यावत् सिन्दूरसङ्काशं न भवेत् स्थालिकावहिः ।
सेचनीयं ततः क्षीरैस्ततः सूक्ष्मं विचूर्णयेत् ॥ १५३ ॥

मतान्तरम् ।—

धान्याभ्रकं समादाय मुस्ताक्वाथैः पुटत्रयम् ।
तद्वत् पुनर्नवानीरैः कासमर्दरसैस्तथा ॥ १५४ ॥

मतान्तरशोधनमाह,—त्रिफलेति । व्योम इति अभ्रम् । अन्यमतमाह, अथवेति ।—ध्मातमभ्रं बदरीक्वाथे निक्षिपेत्, तत आतपसंयोगात् संशोष्य पाणिना मर्दयेत् छानयेच्चेत्यर्थः ॥ १४९।१५० ॥

मतान्तरमाह, अगस्त्येति ।—अगस्त्यपुष्पं—वकपुष्पं, तस्य रसेन पिष्टमभ्रकं वन्यशूरणकन्दमध्ये निरुध्य गोरहभूमितले मासं स्थापयेदिति॥१५१॥

नागवल्लीरसैः सूर्य्य-क्षीरैर्दद्यं पृथक् पृथक् ।
दिनं दिनं मर्दयित्वा क्वाथैर्वटजटोद्भवैः ॥ १५५ ॥
दत्त्वा पुटत्रयं पश्चात् त्रिः पुटेत् मुषलीजलैः ।
त्रिर्गोक्षुरकषायेण त्रिः पुटेत् वानरीरसैः ॥ १५६ ॥
मोचकन्दरसैः पाच्यं त्रिरात्रं कोकिलाक्षकैः ।
रसैः पुटेन्नोभ्रकैस्तु क्षीरादैकं पुटेत् पुनः ॥ १५७ ॥
दध्ना घृतेन मधुना स्वच्छया सितया तथा ।
एकमेकं पुटं दद्यादभ्रस्यैवं मृतिर्भवेत् ॥ १५८ ॥
सर्वरोगहरं व्योम जायते योगवाहिकम् ।
कामिनीमददर्पघ्नं शस्तं पुंस्त्वोपघातिनाम् ।
वृष्यमायुष्करं शुक्र-वृद्धिसन्तानकारकम् ॥ १५९ ॥

अथ मारकगणः ।—

तण्डुलीयकवृहती-
नागवल्लीतगरपुनर्नवाश्च ।
हिलमोचिकामण्डूकपर्णी तिक्ताऽऽखुपर्णिका
मदनार्कावपि लक्षसुतमातृकाभिः सुधीभिरुदितम् ॥ १६० ॥

अभ्रमारणमाह,—वज्राभ्रकमित्यादि । रम्भादिक्षारतोयेनेति—वक्ष्यमाणरम्भादिगणोक्तक्षारतोयेन । मतान्तरमाह, धान्याभ्रकमित्यादि ।—स्पष्टम् । “रसैः पुटेत्” इत्यनन्तरम् “ततो धेनु-क्षीरादैकं पुटं मुहुः” इति पाठान्तरम् ॥ १५२—१५९ ॥

अथ मारकगणमाह, तण्डुलीयकेत्यादि ।—एभिस्तण्डुलीयकादिभिर्व्यस्तैः समस्तैर्वा प्रपुटेदित्यर्थः ॥ १६० ॥ *

---

* अत्र “मदलक्षणाभिधं” छन्दः । तल्लक्षणं यथा वृत्तरत्नाकरे—“मुखपादो-

मतान्तरम् ।—

रम्भादिनाऽभ्रं लवणेन पिष्ट्वा चक्रीकृतं तद्दलमध्यवर्त्ति ।
दग्धेन्धनेषु व्यजनानिलेन स्नुह्यर्कमूलाम्बुपुटेन सिद्धम् ॥१६१॥

मतान्तरम् ।—

धान्याभ्रकस्य भागैकं भागौ द्वौ टङ्कणस्य च ।
पिष्ट्वा तदन्धमूषायां रुद्ध्वा तीव्राग्निना पचेत् ।
स्वभावं शीतलं चूर्णं सर्वयोगेषु योजयेत् ॥ १६२ ॥

मतान्तरम् ।—

धान्याभ्रकं दृढं मर्द्यमर्कक्षीरैर्दिनावधि ।
वेष्टयेदर्कपत्रेण चक्राकारन्तु कारयेत् ॥ १६३ ॥
कुञ्जराख्ये पुटे दग्ध्वा सप्तवारान् पुनः पुनः ।
ततो वटजटाक्वाथैस्तद्वद्देयं पुटत्रयम् ।
म्रियते नात्र सन्देहः सर्वयोगेषु योजयेत् ॥ १६४ ॥

मतान्तरम् ।—

दुग्धत्रयं कुमार्य्यम्बु गङ्गापत्रं नृमूत्रकम् ।
वटशुङ्गमजारक्तमेभिरभ्रं विमर्दयेत् ॥ १६५ ॥

मतान्तरमाह,—रम्भादिनेत्यादि । रम्भादिना—वक्ष्यमाणरम्भादिगणेन । व्यजनानिलेनेति ।—व्यजनानिलेन प्रज्वलितेषु दग्धेन्धनेषु इत्यर्थः ॥ १६१।१६२ ॥

धान्याभ्रकमित्यादौ ।—कुञ्जराख्ये पुटे इति गजपुटे ॥ १६३।१६४ ॥

ऽष्टभिर्वर्षैः, परे सुः मकरालये क्रमात् वृद्धैः । सततं यस्य विचित्रैः पादैः सम्पन्नसौन्दर्यं, तदुदितममलमतिभिः पदचतुरूर्द्ध्वाभिधं वृत्तम् ॥" इति । (इति प्रकाशकः) ।

शतधा पुटितं भस्म जायते पद्मरागवत् ।
निश्चन्द्रकं भवेत् व्योम शुद्धदेहे रसायनम् ॥ १६६ ॥

मारिताभ्रस्य गुणाः ।—

निश्चन्द्रं मारितं व्योम रूपं वीर्य्यं दृढ़ं तनुम् ।
कुरुते नाशयेत् मृत्युं जरारोगकदम्बकम् ॥ १६७ ॥

[इत्यभ्रमारणम्] ।

अथ हरितालपर्य्यायास्तद्भेदाश्च ।—

हरितालं तालमालं मालं शैलूषभूषणम् ।
पिञ्जकं रोमहरणं तालकं पीतमित्यपि ।
तालकं पटलं पिण्डं द्विधा तत्राद्यमुत्तमम् ॥ १६८ ॥

अशुद्धहरितालस्य दोषाः ।—

अशुद्धं तालमायुघ्नं कफमारुतमेहकृत् ।

दुग्धत्रयमिति—गोऽजाऽवीनां दुग्धम् ॥ १६५।१६६ ॥

मारिताभ्रस्य गुणमाह, निश्चन्द्रमिति ।—यद्यपि निश्चन्द्रमारणमभ्रस्य सामान्येन एव पूर्व्वमुक्तं, तथापि अत्र निश्चन्द्रमिति विशेषणेन निश्चन्द्रकत्वं तस्य विशेषमारणलक्षणमत्र ज्ञेयम् । रोगकदम्बकमिति—रोगसमूहं, सर्व्वरोगहरमिति यावत् ॥ १६७ ॥

हरितालशोधनमारणादिकमाह,—हरितालमित्यादि । तालकं हि द्विविधं,—पत्राख्यं पिण्डञ्च ; तयोराद्यं—स्वर्णवर्णं गुरु स्निग्धम् अभ्रपत्रवत् सपत्रं गुणाढ्यं रसायनञ्च ; पिण्डञ्च—निष्पत्रं पिण्डसदृशं स्वल्पसत्त्वं गुरु स्त्रीपुष्पहारकं स्वल्पगुणञ्च । ताभ्यां पत्राख्यं ग्राह्यं भिषग्भिः । यदत्र मारणजारणाद्यर्थं प्रयोक्तव्यं तदपि पत्राख्यञ्चेति । पटलमिति—पत्राख्यम्, "वंशपत्रकः" इति लोके ॥ १६८ ॥

तापस्फोटाङ्गसङ्कोचान् कुरुते तेन शोधयेत् ॥ १६९ ॥

हरितालशोधनम् ।—

शुद्धं स्यात् तालकं स्विन्नं कुष्माण्डसलिले ततः ।
चूर्णोदके पृथक् तैले तस्मिन् पूते न दोषकृत् ॥ १७० ॥

अन्यच्च । -

तालकं कणशः कृत्वा दशांशेन च टङ्कणम् ।
जम्बीरोत्थैर्द्रवैः क्षाल्यं काञ्जिकैः क्षालयेत् पुनः ॥ १७१ ॥
वस्त्रे चतुर्गुणे बद्ध्वा दोलायन्त्रे दिनं पचेत् ।
सचूर्णं आरनालेन दिनं कुष्माण्डजै रसैः ।
स्वेद्यं वा शाल्मलीतोयैस्तालकं शुद्धिमाप्नुयात् ॥ १७२ ॥

अन्यच्च ।—

तालकं पोट्टलीं बद्ध्वा सचूर्णे काञ्जिके पचेत् ।
दोलायन्त्रेण यामैकं ततः कुष्माण्डजे रसे ॥ १७३ ॥
तिलतैले पचेत् यामं यामं तत् त्रैफले जले ।
दोलायन्त्रे चतुर्यामं पाच्यं शुध्यति तालकम् ॥ १७४ ॥

[इति शोधनम्] ।

अशुद्धतालकस्य दोषमाह, अशुद्धमित्यादि ।—आयुर्न्नमिति—मृत्युप्रदम् ॥ १६८।

शुद्धमित्यादि ।—कुष्माण्डसलिले स्विन्नं शुद्धतालं चर्णोदके तिलतैले पृथक् क्रमेण यामैकं दोलायां पचेदित्यर्थः ॥ १७० ॥

तालकमित्यादि ।—तालकं चुद्रितं कृत्वा वस्त्रेण बद्धा शम्बूकशुक्त्योर्भस्मकृतचूर्णसहितकाञ्जिके दोलायां यामैकं पचेत् ; ततः कुष्माण्डादि-

अथ हरितालमारणम् ।—

तालकं कणशः कृत्वा सुशुद्धं हण्डिकान्तरे ।
चूर्णोदकेन संपिष्टमपामार्गजटोद्भवैः ॥ १७५ ॥
क्षारोदकैश्च संपिष्टमूर्द्धाधो यावशूकजम् ।
चूर्णं दत्त्वा निरुध्याथ कुष्माण्डैश्च प्रपूरयेत् ॥ १७६ ॥
पुनर्मुखं निरुध्याथ चतुर्यामं क्रमाग्निना ।
पचेदेवं हि तच्चूर्णं कुष्ठादौ परियोजयेत् ॥ १७७ ॥

शोधितहरितालस्य गुणाः ।—

हरितालं कटु स्निग्धं कषायञ्च विसर्पनुत् ।
तालकं हरते रोगान् कुष्ठमृत्युज्वरादिकान् ।
संशुद्धं कान्तिवीर्य्यौजः कुरुते मृत्युनाशनम् ॥ १७८ ॥

मतान्तरे मारणम् ।—

अम्लरोलीजलैर्भाव्यं तालं द्वादशयामकम् ।
तथैव निम्बुनीरैश्च ततश्चूर्णोदकेन च ॥ १७९ ॥
प्रक्षाल्य शाल्मलीक्षारैर्द्विगुणैः खातमध्यगम् ।
विधाय कवचीयन्त्रं बालुकाभिः प्रपूरयेत् ॥ १८० ॥

रसैः प्रत्येकशो यामैकैकं पचेदिति । शाल्मलीतोयैः,—शाल्मलीरसैः ॥ १७१—१७४ ॥

अथ हरितालमारणमाह, तालकमित्यादि ।—तच्चूर्णमिति—अन्तःशरावोर्द्धलग्नं यत् कुन्दप्रकाशं भस्म तदिति । एवंविधमृतहरितालस्य गुणमाह—हरितालमित्यादि ।—स्पष्टम् ॥ १७५—१७८॥

मतान्तरमाह, अम्लरोलीति ।—अम्लरोली—चाङ्गेरी ; अम्लरोलीरसैः निम्बुनीरैः तथा चूर्णोदकैः प्रत्येकशो द्वादशयामकं भावयेत्, ततः

द्वादशप्रहरं पक्त्वा स्वाङ्गशीतञ्च चूर्णयेत्।
खादयेत् रक्तिकामेकां कुष्ठश्लीपदशान्तये ॥ १८१ ॥

अथ रसमाणिक्यम्।—

तालकं वंशपत्राख्यं कुष्माण्डसलिले क्षिपेत्।
सप्तधा वा त्रिधा वाऽपि दध्ना चाम्लेन वा पुनः ॥ १८२ ॥
शोधयित्वा पुनः शुष्कं चर्णयेत् तण्डुलाकृति।
ततः शरावके पात्रे स्थापयेत् कुशलो भिषक् ॥ १८३ ॥
बदरीपल्लवोत्थेन कल्केन लेपयेद्भिषक्।
अरुणाभमधःपात्रं तावज्ज्वाला प्रदीयते ॥ १८४ ॥
स्वाङ्गशीतं समुद्धृत्य माणिक्याभं भवेद् ध्रुवम्।
तत् रक्तिद्वितयं खादेद्घृतभ्रामरमर्दितम् ॥ १८५ ॥
सम्पूज्य देवदेवेशं कुष्ठरोगाद्विमुच्यते।
स्फुटितं गलितं यच्च वातरक्तं भगन्दरम् ॥ १८६
नाड़ीव्रणं व्रणं दुष्टमुपदंशं विचर्चिकाम्।
नासाऽऽस्यसम्भवान् रोगान् क्षतान् हन्ति सुदारुणान्।
पुण्डरीकञ्च चर्माख्यं विस्फोटं मण्डलं तथा ॥ १८७ ॥

प्रक्षाल्य द्विगुणैः शाल्मलीक्षारैः सह कवचीयन्त्रं विधाय द्वादशप्रहरं पचेत्। शीते च रक्तिकामेकां कुष्ठश्लीपदादौ प्रयोजयेदिति ॥१७९—१८१॥

रसमाणिक्यमाह, तालकमित्यादि।—कुष्माण्डसलिले क्षिपेदिति। —कुष्माण्डरसे सप्तधा त्रिधा वा हरितालं भावयित्वा शोधयेत्; एवं दध्नाऽम्लेनेति; ततः शरावके पात्रे दत्त्वा बदरीकल्केन सन्धिं लेपयेत्। ततः हण्डिकामध्ये संस्थाप्य बालुकाभिः प्रपूरयेत्। ततः पात्राधोऽग्नि-ज्वाला तावत् देया, यावत् पात्राधोऽरुणाभं भवतीति। सुशीते च

अथ सलक्षणमनःशिलायाः पर्य्यायाः ।—

मनःशिला च नैपाली शिलाह्वा नागजिह्विका ।
मनोह्वा कुनटी गोणी करञ्जी करवीरिका ।
मनोह्वा लोहपुष्पाभा शस्यते सर्वकर्म्मसु ॥ १८८ ॥

अशुद्धमनःशिलाया दोषाः ।—

मनःशिला मन्दबलञ्च नूनं करोति जन्तोः शुभपाकहीना ।
मलन्तु बद्धं कुरुते च नूनं सशर्करं कृच्छ्रगदं करोति ॥१८९॥
अश्मरीमूत्रकृद्रोगमशुद्धा कुरुते शिला ।
मन्दाग्निं मलदुष्टिञ्च शुद्धा सर्वरुजापहा ॥ १९० ॥

मनःशिलाशोधनम् ।—

जयन्तीभृङ्गराजोत्थैः रक्तागस्त्यरसैः शिला ।
दोलायन्त्रे दिनं पाच्या यामं छागस्य मूत्रके ।
क्षालयेदारनालेन सर्वरोगेषु योजयेत् ॥ १९१ ॥

माणिक्याभं भस्म यदुपलभ्यते, तत् समुद्धृत्य कुष्ठादौ देयमिति ॥ १८२ —१८७ ॥

मनःशिलायाः साभिधानलक्षणमाह, मनःशिलेत्यादि ।—मनःशिलाऽपि हरितालभेदः ; तालकं पीतं, मनःशिला रक्तेति ॥१८८॥

अथ अशुद्धमनःशिलाया दोषमाह, मनःशिलेति ।—मन्दबलमिति—बलह्रासं करोति इत्यर्थः । पाकहीनेति—अशोधितेत्यर्थः । अश्मरीत्यादि । —शिला—मनःशिला । मूत्ररोगं—मूत्रकृच्छ्रम् ; उक्तञ्च—"सशर्करं कृच्छ्रगदं करोति" इति ॥ १८९।१९० ॥

शोधनमाह, जयन्तीत्यादि ।—जयन्त्यादीनामन्यतमरसेन दिनं

मतान्तरम् ।—

मातुलुङ्गरसैः पिष्ट्वा जयानीरैर्मनःशिला ।
शृङ्गबेररसैर्वाऽपि विशुध्यति मनःशिला ॥ १८२ ॥

शोधितमनःशिलाया गुणाः ।—

कटुः स्निग्धा शिला तिक्ता कफघ्नी लेखनी सरा ।
भूतावेशभयं हन्ति कासश्वासहरा शुभा ॥ १८३ ॥

[इति मनःशिलाशुद्धिः] ।

अथ खर्परशोधनम् ।—

पुष्पाणां रक्तपीतानां रसैः पिष्ट्वा च भावयेत् ।
नरमूत्रैश्च गोमूत्रैर्यवाम्लैश्च ससैन्धवैः ।
सप्ताहं त्रिदिनं वाऽपि पश्चात् शुध्यति खर्परः ॥ १८४ ॥

मतान्तरम् ।—

खर्परः परिसन्तप्तः सप्तवारान् निमज्जितः ।
निम्बुवीजरसे चान्तर्निर्मलत्वमवाप्नुयात् ॥ १८५ ॥

दोल यन्त्रे पक्त्वा काञ्जिकेन चालयेत् ; अथवा छागमूत्रेण याम पक्त्वा काञ्जिकेन चालयेत् इति ॥ १८१ ॥

मतान्तरमाह, मातुलुङ्गेत्यादि ।—मातुलुङ्गरसैः पिष्ट्वा जयन्तिका-रसैरार्द्रकरसैर्वा पूर्व्वोक्तविधानेन दोलायन्त्रे दिनं पचेदिति भावः ॥ १८२ ॥

एवं शोधितमनःशिलाया गुणमाह,—कटुः स्निग्धेत्यादि ॥ १८३ ॥

अथ खर्परशोधनमारणादिकमाह, पुष्पाणामित्यादि ।—यवाम्लै-रिति—यवकाञ्जिकैः । खर्परः,—"खापरिया" इति ख्यातः । "निम्बु-वीज" इत्यत्र "जम्बीरज" इति पाठान्तरम् ॥ १८४।१८५ ॥

अथ मारणं गुणाश्च।—

खर्परं पारदेनैव बालुकायन्त्रगं पचेत्।
चूर्णयित्वा दिनं यावत् शोभनं भस्म जायते।
नेत्ररोगहरः क्लेदी चयहा खर्परो गुरुः॥ १९६॥

[इति खर्परशोधनमारणम्]।

अथ सपर्य्यायतुत्थशोधनमारणम्।—

तुत्थके तु शिखिग्रीवं हेमसारं मयूरकम्।
विष्ठया मर्दयेत् तुत्थं मार्जारक-कपोतयोः॥ १९७॥
दशांशं टङ्कणं दत्त्वा पाच्यं मृदुपुटे ततः।
पुटं दद्यात् पटुक्षौद्रैः किल तुत्थविशुद्धये॥ १९८॥

अन्यच्च।—

ओतोर्विष्ठासमं तुत्थं सक्षौद्रं टङ्कणाङ्घ्रियुक्।
त्रिधा सुपुटितं शुद्धं वान्तिभ्रान्तिविवर्जितम्॥ १९९॥

अथ मारणमाह, खर्परमित्यादि।—खर्परं चूर्णयित्वा समांशेन पारदेन सह बालुकायन्त्रे दिनैकं पचेत्, तेन भस्म उपजायते इति। एवं मृतखर्परस्य गुणमाह,—नेत्ररोगहर इत्यादि॥ १९६॥

तुत्थकस्य सपर्य्यायशोधनमारणादिकमाह, तुत्थक इत्यादि।—तुत्थञ्च ताम्रोपधातुः, यथा,—"तुत्थं ताम्रोपधातुर्हि किञ्चित् ताम्रेण तद्भवेत्। किञ्चित् ताम्रगुणं तस्मादवक्ष्यमाणगुणञ्च तत्॥" इति। मार्ज्जार-कपोतयोर्विष्ठया समं तुत्थं तथा तुत्थात् दशांशं टङ्कणञ्च दत्त्वा मर्दयेत् मृदुपुटे पचेच्च; ततः पादांशं सैन्धवं किञ्चिच्च क्षौद्रं दत्त्वा पुनः प्रपुटेदिति॥ १९७।१९८॥

मतान्तरमाह, ओतोर्विष्ठेति।—ओतुर्विड़ालः, तस्य विष्ठा—पुरीषम्। अङ्घ्रिः,—पादः॥ १९९॥

अन्यच्च ।—

गन्धकेन समं तुत्थं तुत्थार्द्धेनार्द्धयामकम् ।
वान्तिभ्रान्ती यदा नस्तस्तदा सिद्धिं विनिर्दिशेत् ॥ २०० ॥

गुणाः ।—

तुत्थं सकटुकक्षारं कषायं विशदं लघु ।
लेखनं भेदि चक्षुष्यं कण्डूकृमिविषापहम् ॥ २०१ ॥

[इति तुत्थकशुद्धिः] ।

अथ विमलशुद्धिः ।—

मूत्रारनालतैलेषु गोदुग्धे कदलीरसे ।
कौलत्थे कोद्रवक्काथे माक्षिकं विमलं तथा ॥ २०२ ॥
मुहुः शूरणकन्दस्थं स्वेदयेद्दरवह्निना ।
क्षाराम्ललवणैश्चैव तैलसर्पिःसमन्वितम् ।
पुटत्रयं प्रदातव्यं ततस्तु शोधितं भवेत् ॥ २०३ ॥

मतान्तरम् ।—

जम्बीरस्य रसैः स्विन्नो मेषशृङ्गीरसैस्तथा ।
रम्भातोयेन वा पाच्यं घस्रं विमलशुद्धये ॥ २०४ ॥

[इति विमलशुद्धिः] ।

मतान्तरमाह,—गन्धकेनेति । समभिति सहार्थे ; तेन तुत्थार्द्धेन गन्धकेन सह तुत्यम् इत्यर्थः । अर्द्धयामकमिति ।—अत्र पुटेदिति शेषः । पुटनञ्च तावदेव कर्त्तव्यं, यावत् वान्त्यादिरहितं स्यादिति ॥ २०० ॥

एवं सिद्धस्य तुत्थस्य गुणमाह,—तुत्थमित्यादि ॥ २०१ ॥

अथ विमलशुद्धिमाह, मूत्रेत्यादि ।—शूरणकन्दस्थं विमलं मूत्रादिभिः व्यस्तैः समस्तैर्वा यामैकैकं दोलायन्त्रे स्वेदयेत्, ततः क्षारादिभिः पुटत्रयं

अथ माक्षिकनामानि ।—

माक्षिकं धातुमाक्षिकं तप्तं तापीसमुद्भवम् ।
गरुड़ो माक्षिकः पक्षी वृहद्वर्ण इति स्मृतः ॥ २०५ ॥

अस्य लक्षणम् ।—

भङ्गे सुवर्णसङ्काशो मनाक् कृष्णच्छविर्वहिः ।
वृहद्वर्ण इति ख्यातो माक्षिकः श्रेष्ठ उच्यते ॥ २०६ ॥

अशुद्धमाक्षिकदोषाः ।—

मन्दाग्निं बलहानिञ्च व्रणं विष्टम्भगात्ररुक् ।
कुरुते माक्षिको मृत्युमशुद्धो नात्र संशयः ॥ २०७ ॥

अथ माक्षिकशोधनम् ।—

स्वर्णमाक्षिकचूर्णन्तु वस्त्रे बद्ध्वा विपाचयेत् ।
कालमारिष-शालिञ्च-क्वाथे दोलाविधानतः ।
तदधः पतितं शस्तमेवं शुध्यति माक्षिकम् ॥ २०८ ॥

दातव्यम् ; अथवा जम्बीरादीनां स्वरसैर्दिनैकं स्वेदयेदिति । रम्भा-तोयं,—कदलीकन्दरसः ॥ २०२—२०४ ॥

सनामलक्षणमाक्षिकशोधनादिकमाह, माक्षिक इत्यादि ।—माक्षिकं हि द्विविधं,—स्वर्णमाक्षिकं रौप्यमाक्षिकञ्च ; उक्तं हि—"माक्षिकं द्विविधं प्रोक्तं हेमाह्वं तारमाक्षिकम् । भिन्नवर्णविशेषत्वात् रसवीर्य्यादिकं पृथक् ॥" इति । तारमाक्षिकं विमलमिति ख्यातञ्चाग्रे वाच्यम् ; इदानीं स्वर्णमाक्षिकलक्षणादिकमाह,—भङ्ग इत्यादि ॥ २०५।२०६ ॥

अशुद्धस्य माक्षिकस्य दोषमाह, मन्दाग्निमित्यादि ।—स्पष्टम् ॥२०७॥

स्वर्णमाक्षिकस्य दोषपरिहरणाय शोधनमाह, स्वर्णमाक्षिकेत्यादि ।—स्वर्णमाक्षिकचूर्णं सूक्ष्मवस्त्रे बद्ध्वा कालमारिषस्वरसेन शालिञ्चक्वाथेन

मतान्तरम्।—

माक्षिकस्य त्रयो भागा भागैकं सैन्धवस्य च।
मातुलुङ्गद्रवैर्वाऽथ जम्बीरोत्थद्रवैः पचेत्॥ २०९॥
लौहपात्रे पचेत् तावत् लौहदर्व्या च चालयेत्।
भासवर्णमयो यावत् तावच्छुध्यति माक्षिकम्॥ २१०॥

मतान्तरम्।—

माक्षिकस्य चतुर्थांशं गन्धं दत्त्वा विमर्दयेत्।
उरुवूकस्य तैलेन ततः कुर्य्याच्च चक्रिकाम्॥ २११॥
शरावसम्पुटे कृत्वा पुटेद्गजपुटेन तु।
सिन्दूराभं भवेद्भस्म माक्षिकस्य न संशयः॥ २१२॥

शुद्धमाक्षिकस्य गुणाः।—

माक्षिकं तिक्तमधुरं मेहार्शःक्रिमिकुष्ठनुत्।
कफपित्तहरं बल्यं योगवाहि रसायनम्॥ २१३॥

[इति माक्षिकशोधनम्]।

रसेन वा दोलायन्त्रे विपचेत्; वस्त्रस्य सूक्ष्मावकाशात् यच्चूर्णमधः पतति तत् प्रशस्तमिति। भासवर्णम्—रक्तवर्णम्॥ २०८—२१०॥

मतान्तरमाह, माक्षिकस्येत्यादि।—माक्षिकस्य—स्वर्णमाक्षिकस्य। चतुर्थांशं—चतुर्थभागम्। उरुवूकस्य—एरण्डस्य॥ २११।२१२॥

मृतमाक्षिकस्य गुणमाह, माक्षिकमित्यादि।—स्वर्णमाक्षिकञ्च स्वर्णोपधातुः स्वर्णानुकल्पं किञ्चिद्धीनगुणं तत इति। उक्तं हि—"उपधातुः सुवर्णस्य किञ्चित् स्वर्णगुणान्वितम्। तथा च काञ्चनाभावे दीयते स्वर्णमाक्षिकम्। किञ्च तस्यानुकल्पत्वात् किञ्चित् हीनगुणं ततः॥" इति॥ २१३॥

अथ सपर्य्यायकाशीशशोधनम् ।—

काशीशे धातुकाशीशं खेचरं दन्तरञ्जनम् ।
सकृद्भृङ्गाम्बुना स्विन्नं काशीशं निर्मलं भवेत् ॥ २१४ ॥

गुणाः ।—

काशीशं निर्मलं स्निग्धं श्वित्रनेत्ररुजापहम् ।
पित्तापस्मारशमनं रसवद्गुणकारकम् ॥ २१५ ॥

[इति काशीशशोधनम्] ।

अथ कान्तपाषाणनामानि ।—

राजपट्टं महापट्टं शिखिग्रीवं विराटकम् ॥ २१६ ॥

अथ कान्तपाषाणशुद्धिः ।—

चूर्णितं कान्तपाषाणं महिषीक्षीरसंयुतम् ।
विपचेदायसे पात्रे गोघृतेन समाहितम् ॥ २१७ ॥
लवणे च तथा क्षारे शोभाञ्जनरसे क्षिपेत् ।
अम्लवर्गस्य तोयेन दिनं घर्मे विभावयेत् ॥ २१८ ॥

काशीशशोधनादिकमाह, काशीश इत्यादि ।—काशीशं—"हीराकस्" इति लोके। तत् द्विविधं,—धातुकाशीशं, पुष्पकाशीशञ्च ; धातुकाशीशं—हरिद्वर्णं लोहितञ्च ; पुष्पकाशीशं—शुक्लवर्णं कृष्णञ्च । भृङ्गाम्बुना—भृङ्गराजरसेन, दोलायन्त्रेण पाचयेत् । "काशीशं दोलाख्ये सिध्यति पाकात् निम्बुरसेन । भावितमथवा घर्मे जम्भजैर्दिनं शुध्यति ॥" इत्यधिकः पाठः क्वचित् दृश्यते । गुणप्रस्तावे निर्मलमित्यत्र शीतलमिति पाठान्तरम् ॥ २१४।२१५ ॥

अथ राजपट्टशोधनादिकमाह, राजपट्ट इत्यादि ।—राजपट्टं—

तथैव दोलिकायन्त्रे द्विवारं पाचयेत् सुधीः ।
कान्तपाषाणशुद्धौ तु रसकर्म्म समाचरेत् ॥ २१८ ॥
[इति कान्तपाषाणशोधनम् । अस्यैव नामान्तरं राजपट्ट इति] ।

अथ वराटिकालक्षणानि ।—

पीताभा ग्रन्थिला पृष्ठे दीर्घवृत्ता वराटिका ।
सार्द्धनिष्कभरा श्रेष्ठा निष्कभारा च मध्यमा ॥ २२० ॥
पादोननिष्कभारा च कनिष्ठा परिकीर्त्तिता ।
रसवैद्यैर्विनिर्दिष्टा सा वराटकसंज्ञका ॥ २२१ ॥

अथ वराटिकाशुद्धिः ।—

वराटी काञ्जिके स्विन्ना यामाच्छुद्धिमवाप्नुयात् ।

गुणाः ।—

परिणामादिशूलघ्नो क्षयहा ग्रहणीहरा ।
कटूष्णा दीपनी वृष्या तिक्ता वातकफापहा ॥ २२२ ॥

कान्तपाषाणम् । दिनं घर्मे विभावयेदिति ।—अम्लवर्गरसेन रौद्रे दिनैकं भावयेदिति । तथैव दोलिकायन्त्रे इति ।—दोलायन्त्रे महिषी-क्षीरादिभिः पचेदिति । "तथैव" इत्यत्र "तद्द्रवैः" इति पाठान्तरम् ॥ २१६—२१८ ॥

वराटिकाया नामलक्षणान्याह,—पीताभेति । ग्रन्थिलेति ग्रन्थि-युक्ता, सार्द्धनिष्कभरा इति सार्द्धनिष्कैकपरिमिता ; एवं सर्व्वत्र । वराटिकाशोधनमाह.—वराटीत्यादि । काञ्जिके स्विन्नेति दोलायन्त्रे । एवंविधशुद्धवराटिकाया गुणमाह,—परिणामादीत्यादि ॥ २२०—२२२ ॥

मतान्तरे शोधनम् ।—

भूगर्त्ते च समे शुद्धे पत्तनं स्थापयेत् सुधीः ।
तुषेण पूरयेत् तस्याः किञ्चिन्मध्यं भिषग्वरः ॥ २२३ ॥
वराटपूरितां मूषां तन्मध्ये विनिवेशयेत् ।
करीषाग्निं ततो दद्यात् पालिकायन्त्रमुत्तमम् ।
अनेन म्रियते नूनं वराटं सर्व्वरोगजित् ॥ २२४ ॥

[इति वराटिकाशुद्धिः] ।

अथाञ्जनशुद्धिः ।—

नीलाञ्जनं चूर्णयित्वा जम्बीरद्रवभावितम् ।
दिनैकमातपे शुद्धं ततः कार्य्येषु योजयेत् ॥ २२५ ॥

शोधने मतान्तरमाह, भूगर्त्त इत्यादि ।—पालिकायन्त्रम्—पाकपात्रभेदः ॥ २२३।२२४ ॥

नीलाञ्जनशुद्धिमाह,—नीलाञ्जनमित्यादि । नीलाञ्जनमित्युपलक्षणं, तेनाञ्जनपञ्चकं बोध्यम् । अत्र अञ्जनानां भेदो नोक्तः । स यथा—"सौवीरमञ्जनं प्रोक्तं रसाञ्जनमतः परम् । स्रोतोऽञ्जनं तदन्यच्च पुष्पाञ्जनकमेव च ॥ नीलाञ्जनञ्च तेषान्तु स्वरूपमिह कथ्यते । सौवीरमञ्जनं धूम्रं रक्तपित्तहरं परम् ॥ विषहिक्काऽक्षिरोगघ्नं व्रणरोपणशोधनम् । रसाञ्जनञ्च पीताभं विषरक्तगदापहम् ॥ श्वासहिक्काहरं वर्ल्यं वातपित्तास्रनाशनम् । स्रोतोऽञ्जनं हिमं स्निग्धं कषायं स्वादु लेखनम् ॥ नेत्र्यं हिक्काविषच्छर्द्दि-कफपित्तास्ररोगजित् । पुष्पाञ्जनं सितं स्निग्धं हिमं सर्व्वाक्षिरोगजित् ॥ नीलाञ्जनं गुरु स्निग्धं नेत्रदोषत्रयापहम् । रसायनं सुवर्णघ्नं लौहमारणकारकम् ॥ अञ्जनानि विशुध्यन्ति भृङ्गराजद्रवैर्दिनम् । मनोह्वासदृशं सत्त्वमञ्जनानां समाहरेत् ॥" इति ज्ञेयम् ॥ २२५ ॥

अथ हिङ्गुलपर्य्यायाः।—

हिङ्गुले हिङ्गुलुर्याति दरदः शुकतुण्डकः।
रसगन्धकसम्भूतो हिङ्गुलो दैत्यरक्तकः॥ २२६ ॥

अथ हिङ्गुलशोधनम्।—

अम्लवर्गद्रवैः पिष्ट्वा दरदो माहिषेण च।
दुग्धेन सप्तधा पिष्टः शुष्कीभूतो विशुध्यति ॥ २२७ ॥

अन्यच्च।—

मेषीदुग्धेन दरदमम्लवर्गैर्विभावितम्।
सप्तवारं प्रयत्नेन शुद्धिमायाति निश्चितम् ॥ २२८ ॥

अन्यमतम्।—

दरदं दोलिकायन्त्रे पक्वं जम्बीरजैर्द्रवैः।
सप्तवारमजामूत्रैर्भावितं शुद्धिमेति हि ॥ २२९ ॥

अथान्यत्।—

आर्द्रकैर्लकुचद्रावैः सप्तधा भावितो यदि।
हिङ्गुलः शुद्धतां याति निर्दोषो जायते खलु ॥ २३० ॥

अथ हिङ्गुलस्य पर्य्यायमाह, हिङ्गुल इत्यादि।—हिङ्गुलं त्रिविधम्; यथा—"दरदस्त्रिविधः प्रोक्तश्चर्मारः शुकतुण्डकः। हंसपादस्तृतीयः स्याद्गुणवानुत्तरोत्तरः॥ चर्मारः शुक्लवर्णः स्यात् स पीतः शुकतुण्डकः। जवाकुसुमसङ्काशो हंसपादो महोत्तमः॥" इति ।२२६॥

शोधनमाह,—अम्लवर्गेत्यादि। आर्द्रकैरित्यादौ।—लकुचद्रावैः,—डहुकरसैः॥ २२७—२३०॥

अथ शुद्धहिङ्गुललक्षणं गुणाश्च ।—

विम्बाभं हिङ्गुलं दिव्यं रसगन्धकसम्भवम् ।
मेहकुष्ठहरं रुच्यं बल्यं मेधाग्निवर्द्धनम् ॥ २३१ ॥

अथ शिलाजतुनामानि ।—

शिलाजतुनि शैलेयमद्रं गिरिजमश्मजम् ।
धातुजमश्मजतुकं शैलजं चाश्मसम्भवम् ॥ २३२ ॥

अथ हिङ्गुललक्षणमाह,—विम्बाभमित्यादि ।—विम्बाभं—पक्वविम्बीफलाभम् । दिव्यं—श्रेष्ठम् । एवं शोधितहिङ्गुलस्य गुणमाह,—मेहकुष्ठेति । रुच्यं—रुचिकरम् ॥ २३१ ॥

शिलाजतुपर्य्यायमाह,—शिलाजतुनीत्यादि ।—शिलाजतु च धातुनिःस्रवः ; उक्तं हि—"हेमाद्याः सूर्य्यसन्तप्ताः स्रवन्ति गिरिधातवः । जत्वाभं मृदु मृत्स्नाभं यत् मलं तत् शिलाजतु ॥" तच्च चतुर्विधं, स्वर्णादीनां मलभेदात् । उक्तं हि—"अनम्लञ्च कषायञ्च कटुपाकि शिलाजतु । नात्युष्णशीतं धातुभ्यश्चतुर्भ्यस्तस्य सम्भवः । हेम्नोऽथ रजतात् ताम्रात् वरं कृष्णायसादपि ॥" तेषां लक्षणं गुणाश्च यद्यप्यत्र नोक्तास्तथाऽपि तन्त्रान्तरेऽनुसर्त्तव्याः । यथा—"मधुरश्च सतिक्तश्च जवापुष्पनिभश्च यत् । विपाके कटु शीतञ्च (तिक्तञ्च) स सुवर्णस्य निःस्रवः ॥ राजतं कटुकं शीतं श्वेतं स्वादु विपच्यते ; ताम्रात् वर्हिणकण्ठाभं तीक्ष्णोष्णं पच्यते कटु ॥ यत्तु गुग्गुलसङ्काशं तिक्तकं लवणान्वितम् । विपाके कटु शीतञ्च सर्वश्रेष्ठं तदायसम् ॥ गोमूत्रगन्धि सर्वेषां सर्वं सर्वत्र यौगिकम् । रसायनप्रयोगेषु पश्चिमन्तु विशिष्यते ॥ यथाक्रमं वातपित्ते श्लेष्मपित्ते कफे त्रिषु । विशेषेण प्रशस्यन्ते मला हेमादिधातुजाः ॥" एषां मध्ये चायसः श्रेष्ठत्वात् रसायनत्वात् सर्वरोगोपशान्तिकरत्वाच्च सर्वत्रैवाद्रियते । तल्लक्षणं यथा,—"लौहकिट्टायते

तच्छुद्धिः।—

गोदुग्धत्रिफलाभृङ्ग-द्रवैः पिष्टं शिलाजतु।

दिनैकं लौहजे पात्रे शुद्धिमायात्यसंशयम् ॥ २३३ ॥

वह्नौ विधूमं दह्यतेऽम्भसि। तृणात्यग्रे कृतं श्रेष्ठमधो गलति तन्तुवत् ॥" इति। ["तृणाति" इत्यत्र "स्तृणाति—स्रवते" इति चक्रदत्तटीकायां शिवदासः] ॥ १३२ ॥

साधारणशुद्धिमाह, गोदुग्धेत्यादि।—गोदुग्धे तथा त्रिफलाक्वाथे तथा भृङ्गराजद्रवैश्च दिनैकमात्रसंयोगात् शिलाजतु शोधयेदित्यर्थः। अत्र यद्यपि सामान्येन एव उक्तं, तथाऽपि हारीतोक्तविधानमत्र विशेषतो ज्ञेयम्; तद्यथा,—विन्ध्याद्रौ बहुलं तत्तु तत्र लौहं यतोऽधिकम्। तच्छोधनमृते व्यर्थमेकैकमलमेलनात् ॥ शिलाजतु समानीय सूक्ष्मं खण्डं विधाय च। निक्षिप्यात्युष्णपानीये यामैकं स्थापयेत् सुधीः ॥ मर्दयित्वा ततो नीरं गृह्णीयात् वस्त्रगालितम्। स्थापयित्वा च मृत्पात्रे धारयेदातपे बुधः ॥ उपरिस्थं घनं यत् स्यात् तत् क्षिपेदन्यपात्रके। एवं पुनः पुनर्नीतं द्विमासाभ्यां शिलाजतु ॥ भवेत् कार्य्यक्षमं वह्नौ क्षिप्तं लिङ्गोपमं भवेत्। निर्धूमञ्च ततः शुद्धं सर्वकर्मसु योजयेत् ॥" इति। केचित्तु तत्र प्रथमतस्तस्य वह्निर्मलमपाकर्त्तुं जलेन प्रक्षालनं कर्त्तव्यं, ततस्तदन्तर्गतमृत्तिकासिकतादिदोषदूरीकरणाय हारीतोक्तशिलाजतुशोधनप्रकरणोक्तक्रमेन भावनादेयेत्याहुः। तदुक्तं,—"शिलाजतु जले धौतं कीटादिदुष्टेश्चधिदोषविनाशाय अगुरुतुवरीनिम्बपत्रयवगुडूचीघृतैर्धूपयित्वा, तदनु शुष्कं चूर्णीकृत्य लौहपात्रे कृत्वा दशमूलकषायं त्रिफलाक्वाथं केरलोष्णोदकं वा प्रक्षिप्य लौहमुष्टलिकया तरलीकृत्य प्रचण्डातपे स्थापनीयम्; ततस्तु सरवत् यद्दूर्द्ध्वमुत्तिष्ठेत् तत् पुनः

अथ शुद्धशिलाजतुगुणाः ।—

शिलाजतु भवेत् तिक्तं कटुकञ्च रसायनम् ।
चयशोथोदरार्शांसि हन्ति वस्तिरुजां जयेत् ॥ २३४ ॥

अथ सौवीरादिशोधनम् ।—

सौवीरं टङ्कणं शङ्खं कङ्कुष्ठं गैरिकं तथा ।
एते वराटवच्छोध्या भवेयुर्दोषवर्जिताः ॥ २३५ ॥

कङ्कुष्ठादीनां शोधनम् ।—

कङ्कुष्ठं गैरिकं शङ्खं काशीशं टङ्कणं तथा ।
नीलाञ्जनं शुक्तिभेदाः खुल्वकाः सवराटकाः ॥ २३६ ॥
जम्बीरवारिणा स्विन्नाः चालिताः कोष्णवारिणा ।
शुद्धिमायान्त्यमी योज्याः भिषग्भिर्योगसिद्धये ॥ २३७ ॥

अथ टङ्कणपर्य्यायाः ।—

टङ्कणं क्षारमणष्टङ्कः सम्यक्क्षारश्च पाचनः ।
सुभगो मालतीजातो द्रावी लौहविशुद्धिदः ॥ २३८ ॥

अथ टङ्कणशुद्धिः ।—

आदौ टङ्कणमादाय काञ्जिकाम्ले विनिक्षिपेत् ।
एकरात्रात् समुद्धृत्य रौद्रयन्त्रे विभावयेत् ॥ २३९ ॥

गृहीत्वा काचादिपात्रे स्थापनीयम्" इत्याहुः । विस्तरस्तु अग्निवेश-संहितायां वाग्भटे च ज्ञेयः ॥ २३३ ॥

शोधितशिलाजतुगुणमाह,—शिलाजतु भवेदित्यादि ॥ २३४ ॥

सौवीरादीनां साधारणशोधनमाह,—सौवीरमित्यादि । तथा पुनः कङ्कुष्ठादीनां साधारणशोधनमाह,— कङ्कुष्ठमित्यादि । जम्बीरवारिणा स्विन्नेति—जम्बीररसैः दोलायन्त्रे स्विन्ना ॥ २३५—२३७ ॥

नरमूत्रगतं टङ्कं गवां मूत्रगतं तथा।
दिनान्ते तत् समुद्धृत्य जम्बीराम्बुगतं ततः ॥ २४० ॥
जम्बीराम्लात् समुद्धृत्य नारिकेलस्य पात्रके।
मरीचचूर्णसंयुक्तं चालयेच्छीतलाम्बुना।
एवं टङ्कं समादाय सर्वरोगेषु योजयेत् ॥ २४१ ॥

गुणाः।—

टङ्कणोऽग्निकरो रूक्षः कफघ्नो रेचनो लघुः ॥ २४२ ॥

अथ शङ्खशोधनम्।—

अन्धमूषागतं शङ्खं पलमेकं विचक्षणः।
माषार्द्धटङ्कणैर्मिश्रं दण्डयन्त्रेण मारयेत् ॥ २४३ ॥

अथ शुद्धशङ्खगुणाः।—

शङ्खः सर्वरुजां हन्ति विशेषादुदरामयम्।
शूलाम्लपित्तविष्टम्भ-मेहहृत् वह्निदीपनः ॥ २४४ ॥

[इति उपरसशोधनाद्यधिकारः]।

अथ सपर्य्यायटङ्कणशोधनादिकमाह,—टङ्कणमित्यादि। आर्द्रा-वित्यादौ।—काञ्जिकाम्ले—अम्लकाञ्जिके। एकरात्रादिति अहोरात्रात् ॥ २३८—२४२ ॥

अथ शङ्खशुद्धिमाह, अन्धमूषागतमित्यादि।—अत्र पचेदिति शेषः। अन्धमूषागतं पक्वं शङ्खम् अर्द्धमाषटङ्कणैः सह दण्डयन्त्रेण मारयेदिति। शुद्धशङ्खस्य गुणमाह,—शङ्ख इत्यादि। उदरामयम्—अतिसारादिकम् ॥ २४३।२४४ ॥

अथ स्वर्णादिशोधनम् ।—

हेमादिलौहकिट्टान्तं शोधनं मारणं शृणु ।
तैले तक्रे गवां मूत्रे काञ्जिकेऽथ कुलत्थजे ॥ २४५ ॥
तप्ततप्तानि सिञ्चेत तत्तद्द्रावे च सप्तधा ।
एवं स्वर्णादिलौहानि शुद्धिमायान्त्यसंशयम् ॥ २४६ ॥

स्वर्णादीनां साधारणशोधनमाह,—हेमादीत्यादि ।—स्वर्णादीनां पत्राणि तप्ततप्तानि पृथक् तैलादिषु सप्तधा सिञ्चेदिति । सप्तधेति सामान्येन एव उक्तः ; यत एकादिशतपर्य्यन्तनिषेको विधीयते । प्रत्येकेन सप्तधेति केचित् । मनाक् तप्तलौहपत्राणि द्विगुणे तद् द्रवे क्षिपेत् इति तद् द्रवमानम् । तेषु अष्टलौहेषु नागं वङ्गञ्च कथं तप्तं निषेक्तव्यम् ; यतस्ते अल्पतापेन गलतः ? उच्यते,—स्वल्पभाण्डे क्षत्वैव गलिते ते नागवङ्गे तेषु निषिञ्चेत् इति । सद्रवं सर्वलौहं दिनमेकं रक्षेत् । रात्रौ च निर्द्रवं नैव रक्षेत् ; एवं रजनीमेकां विश्राम्य कर्मान्तरञ्च समाचरेदिति । इदानीं विशेषशुद्धिमाह ।—तत्रादौ सुवर्णस्य विशेषशोधनादिकं वक्तव्यम् ; यद्यपि अत्र मारणयोग्यसुवर्णस्य लक्षणादिकं नोक्तं, तथाऽपि तज्ज्ञानार्थं तन्त्रान्तरमनुसर्तव्यम् ; यथा,—"दाहेऽतिरक्तमथ यच्च सितं छिदायां, काश्मीरकान्ति च विभाति निकाषपट्टे । स्निग्धञ्च गौरवमुपैति च यत् तुलायां, जात्या तदेव कनकं मृदुरक्तपीतम् ॥ तत्रैकं रसवेधजं तदपरं जातं स्वयं भूमिजं, किञ्चान्यत् बहुलौहसङ्करभवं चेति त्रिधा काञ्चनम् । तत्राद्यं किल पीतरक्तमपरं रक्तं ततोऽन्यत् तथा, गौराभं तदिति क्रमेण गदितं स्यात् पूर्वपूर्वोत्तमम् ॥" इति राजनिघण्टुः । मृत्युञ्जयतन्त्रे तु—"दाहे रक्तं सितं छेदे निकषे कुङ्कुमप्रभम् । तारशुल्वोज्झितं स्निग्धं कोमलं गुरु हेम सत् ॥ तत् श्वेतं कठिनं रूक्षं

अशुद्धामृतस्वर्णस्य दोषाः।—

सौख्यं वीर्य्यं बलं हन्ति नानारोगं करोति च।
अशुद्धममृतं स्वर्णं, तस्मात् शुद्धन्तु मारयेत्॥ २४७॥

स्वर्णशोधनम् :—

मृत्तिकामातुलुङ्गाम्लैर्भावितं पञ्चवासरम्।
मृद्गस्म्लवणाद्धेम शोधयेत् पुटयेत् ततः॥ २४८॥

मतान्तरम्।—

वल्मीकमृत्तिका धूमं गैरिकं चेष्टका पटु।
इत्येता मृत्तिकाः पञ्च जम्बीरैरारनालकैः॥ २४९॥
पिष्ट्वा लेप्यं स्वर्णपत्रं पुटेन तु विशुध्यति।
धारयेत् स्वर्णपत्रोभिस्त्रिदिनं पञ्चमृत्तिकाः॥ २५०॥

[इति स्वर्णशोधनम्]।

अथ स्वर्णमारणम्।—

माक्षिकं नागचूर्णञ्च पिष्टमर्करसेन च।
हेमपत्रं पुटेनैव म्रियते क्षणमात्रतः॥ २५१॥

विवर्णं समलं दलम्। दाहे च्छेदेऽसितं श्वेतं कषे त्याज्यं लघु स्फुटम्॥"
इति। अशुद्धामृतस्य च सुवर्णस्य दोषमाह—सौख्यमित्यादि॥२४५—२४७॥

दोषपरिहारार्थं शोधनमाह,—मृत्तिकेति। मृत्तिका पञ्चमृत्तिका। मातुलुङ्गाम्लैः,—मातुलुङ्गरसैः॥ २४८॥

मतान्तरमाह,—वल्मीकेत्यादि। धूममिति धूममृत्तिका, कृष्णमृत्तिकेति ख्याता। पटु—पांशुजलवणम्। जम्बीरैः,—जम्बीररसैः। पुटेनेति लघुपुटेन॥ २४९।२५०॥

अथ स्वर्णमारणमाह,—माक्षिकमित्यादि। हेमपत्रमिति कण्टक

मतान्तरम् ।—

सुशुद्धं पारदं दत्त्वा कुर्य्यात् यत्नेन पीठिकाम् ।
दत्त्वोर्द्धाधो नागचूर्णं पुटेन म्रियते ध्रुवम् ॥ २५२ ॥

मतान्तरम् ।—

गलितस्य सुवर्णस्य षोड़शांशेन सीसकम् ।
योजयित्वा समुद्धृत्य निम्बुनीरेण मर्दयेत् ॥ २५३ ॥
गोलं कृत्वा गन्धचूर्णं समं दद्यादुपर्य्यधः ।
शरावसम्पुटे कृत्वा पुटेत् त्रिंशद्वनोपलैः ।
एवं मुनिपुटैर्हेम नोत्थानं लभते पुनः ॥ २५४ ॥

मतान्तरम् ।—

शुद्धसूतसमं स्वर्णं खल्ले कृत्वा तु गोलकम् ।
ऊर्द्धाधो गन्धकं दत्त्वा सर्वतुल्यं निरुध्य च ॥ २५५ ॥
त्रिंशद्वनोपलैर्दद्यात् पुटान्येवं चतुर्दश ।
निरुत्थं जायते भस्म गन्धो देयः पुनः पुनः ॥ २५६ ॥

वेध्यं स्वर्णपत्रम् । शोधितस्वर्णमाक्षिकचूर्णं तथा सीसकचूर्णञ्च अर्क-चीरेण सम्मर्द्य तेन स्वर्णपत्रं प्रलिप्य तं मूषायां संस्थाप्य प्रपुटेदिति ।२५१॥

मतान्तरमाह,—सुशुद्धमित्यादि ।—सुशुद्धं पारदं स्वर्णात् द्विगुणं दत्त्वा पीठिकां कुर्य्यात् ; तदूर्द्धाधः सीसकचूर्णं षोड़शांशं दत्त्वा मूषायां प्रपुटेदिति ॥ २५२—२५४ ॥

मतान्तरमाह, शुद्धसूतेति ।—कण्टकवेध्यं स्वर्णपत्रं तुल्येन सूतेन सम्मेलयेत्, ततो गोलकं कुर्य्यात् । आदौ अर्द्धांशं गन्धकं पात्रोपरि विन्यस्य, ततो गोलकं स्थापयेत्, तदुपरि गन्धकमर्द्धं निक्षिप्य, भाण्डमुखं रुद्ध्वा पुटो देयः । एवं चतुर्दश पुटा देयाः ; प्रतिपुटे तु तुल्यांशं गन्धं

अथ शुद्धस्वर्णगुणाः।—

कषायतिक्तमधुरं सुवर्णं गुरु लेखनम्।
हृद्यं रसायनं बल्यं चक्षुष्यं कान्तिदं शुचि ॥ २५७ ॥
आयुर्मेधावयःस्थैर्य्य-वाग्विशुद्धिस्मृतिप्रदम्।
क्षयोन्मादगराणाञ्च कुष्ठानां नाशनं परम् ॥ २५८ ॥

[इति स्वर्णमारणम्]।

अथ शुद्धरजतलक्षणम्।—

दग्धोत्तीर्णं सुशीतं यन्निर्मलं कुन्दसन्निभम्।
गुरु स्निग्धं कुमारञ्च तारमुत्तममिष्यते ॥ २५९ ॥

अथ अशुद्धरजतदोषाः।—

आयुः शुक्रं बलं हन्ति रोगसङ्घं करोति च।
अशुद्धञ्चामृतं तारं, शुद्धं मार्य्यमतो बुधैः ॥ २६० ॥

प्रदातव्यमिति। "लिंशद्दनोपलैः" इत्यत्र "विंशद्दनोपलैः" इति पाठ-भेदो दृश्यते ॥ २५५।२५६ ॥

मृतसुवर्णस्य गुणमाह,—कषायेत्यादि। कषायतिक्तमधुरमिति कषायादित्रिरसप्रधानम् ॥ २५७।२५८ ॥

अथ शुद्धरजतलक्षणमाह,—दग्धोत्तीर्णमित्यादि।—अग्नौ दग्धे सति यत् सुशीतं कुन्दसन्निभममलं तत् दग्धोत्तीर्णमिति; तन्त्रान्तरे तु—"गुरु स्निग्धं मृदु श्वेतं दाहच्छेदघनक्षमम्। वर्णाढ्यं चन्द्रवत् स्वच्छं तारं नवगुणं शुभम् ॥" अथायोग्यलक्षणमाह,—"कठिनं कृत्रिमं रूक्षं रक्तं पीतदलं लघु। दाहच्छेदघनैर्नष्टं रूप्यं दुष्टं प्रकीर्त्तितम् ॥" इति ॥ २५९ ॥

अथ रजतशोधनम् ।—

नागेन क्षारराजेन द्रावितं शुद्धिमृच्छति ।
रजतं दोषनिर्मुक्तं किंवा क्षाराम्लपाचितम् ॥ २६१ ॥

[इति रजतशोधनम्] ।

अथ रजतमारणम् ।—

माक्षिकं गन्धकञ्चैवमर्कक्षीरेण मर्दयेत् ।
तेन लिप्तं रूप्यपत्रं पुटेन म्रियते ध्रुवम् ॥ २६२ ॥

मतान्तरम् ।—

कण्टवेध्ये तारपत्रे दत्त्वा द्विगुणहिङ्गुलम् ।
पातयन्त्रे रसो ग्राह्यो रजतं मृतमुच्यते ॥ २६३ ॥

मतान्तरम् ।—

तालं गन्धं रौप्यपत्रं मर्दयेत् निम्बुकद्रवैः ।
त्रिपुटैश्च भवेद्भस्म योज्यमेतद्रसादिषु ॥ २६४ ॥

मतान्तरम् ।—

तारपत्रं चतुर्भागं भागैकं शुद्धतालकम् ।
मर्द्यं जम्बीरजैर्द्रावैस्तारपत्राणि लेपयेत् ॥ २६५ ॥
रुद्ध्वा त्रिभिः पुटैः पाच्यं पञ्चविंशद्वनोपलैः ।
म्रियते नात्र सन्देहो गन्धो देयः पुनः पुनः ॥ २६६ ॥

अथाशुद्धस्य तारस्य दोषमाह,—आयुरित्यादि । अथ शोधनमाह,—नागेनेत्यादि ।—क्षारराजेनेति टङ्कणक्षारेण ॥ २६०।२६१ ॥

अथ मारणमाह,—माक्षिकमित्यादि ।—स्वर्णमाक्षिक-गन्धक-रौप्याणां तुल्यो भागः । पुटनमत्र मूषायाम् ॥ २६२ ॥

मतान्तरमाह,—कण्टवेध्ये इत्यादि ।—पातयन्त्रे इत्यूर्द्ध्वपातनायन्त्रे ॥ २६३—२६६ ॥

अथ शुद्धरजतगुणाः।—

शीतं कषायं मधुरमम्लं वातप्रकोपजित्।
दीपनं बलकृत् स्निग्धं गुल्माजीर्णविनाशनम्।
आयुष्यं दीर्घरोगघ्नं रजतं लेखनं स्मृतम्॥ २६७॥

[इति रजतमारणम्।]

अथ अशुद्धताम्रदोषाः।—

न विषं विषमित्याहुस्ताम्रञ्च विषमुच्यते।
एको दोषो विषे त्वष्टौ दोषास्ताम्रे प्रकीर्त्तिताः॥ २६८॥
भ्रमो मूर्च्छा विदाहश्च उत्क्लेदशोषवान्तयः।
अरुचिश्चित्तसन्ताप एते दोषा विषोपमाः।
तस्माद्विशुद्धं ताम्रं हि ग्राह्यं रोगोपशान्तये॥ २६९॥

अथ ताम्रशुद्धिः।—

पट्ना रविदुग्धेन ताम्रपत्राणि लेपयेत्।

एवंविधमृतस्य रौप्यस्य गुणमाह,—शीतमित्यादि। दीर्घरोगघ्नमिति।—दीर्घकालजातरोगनाशनम्॥ २६७॥

अशुद्धस्य ताम्रस्य दोषमाह,—न विषमित्यादि। शोधनयोग्यताम्रस्य लक्षणं यद्यपि अत्र न उक्तं, तथाऽपि प्रयोगार्थं तल्लक्षणं विशेषतो ज्ञेयम्। यथा—"जवाकुसुमसङ्काशं स्निग्धं मृदु घनक्षमम्। लौहनागोज्झितं ताम्रं मारणाय प्रशस्यते॥ कृष्णरूक्षमतिस्तब्धं श्वेतञ्चापि घनासहम्। लौहनागयुतञ्चापि शुल्वं दुष्टं प्रकीर्त्तितम्॥" इति। ताम्रञ्च विषमिति—अशुद्धताम्रं विषवद्गुणकारकमिति भावः। ताम्रस्याष्टौ दोषानाह,—भ्रम इत्यादि। शोधनप्रयोजनमाह,—तस्मात् इत्यादि॥ २६८।२६९॥

अग्नौ सन्ताप्य निर्गुण्डी-रसे सिञ्चेत् पुनः पुनः ॥ २७० ॥

मतान्तरम् ।—

गोमूत्रेण पचेद्यामं ताम्रपत्रं दृढाग्निना ।
शुध्यते नात्र सन्देहो मारणञ्चात्र कथ्यते ॥ २७१ ॥

[इति ताम्रशोधनम्] ।

अथ ताम्रमारणम् ।—

सूतमेकं द्विधा गन्धं यामं मर्द्यन्तु कन्यया ।
द्वयोस्तुल्यं ताम्रपत्रं लिप्त्वा स्थाल्यां निधापयेत् ॥ २७२ ॥
सम्यक् शूरणजैः सार्द्धं पार्श्वे भस्म निधापयेत् ।
चतुर्यामं पचेच्चुल्ल्यां पात्रपृष्ठे सगोमये ॥ २७३ ॥
जलं पुनः पुनर्देयं स्वाङ्गशीतं विमर्दयेत् ।
म्रियते नात्र सन्देहः सर्वरोगेषु योजयेत् ॥ २७४ ॥

मतान्तरम् ।—

जम्भाम्भसा सैन्धवसंयुतेन सगन्धकं स्थापय शुल्वपत्रम् ।

ताम्रस्य शोधनमाह, पटुनेति ।—पटुना—सैन्धवेन । रविदुग्धेन—अर्कदुग्धेन ; अग्नौ सन्ताप्येति ।—अर्कक्षीरेण सैन्धवं मर्द्दयित्वा तेन ताम्रपत्राणि प्रलिप्य अग्नौ सन्ताप्य तप्ततप्तानि तानि ताम्रपत्राणि सिन्धुवाररसे सप्तधा अभिषिञ्चेत् ॥ २७० ॥

मतान्तरमाह,—गोमूत्रेणेति । लवणलिप्तं ताम्रपत्रं दिनत्रयानन्तरं दृढाग्निना गोमूत्रेण सह याममात्रं पचेत् इत्युपदिशन्ति वृद्धाः ॥२७१॥

अथ मारणमाह,—सूतमेकमित्यादि । "सम्यक्···निधापयेत्" इत्यत्र "सम्यक् लवणयन्त्रस्थमतो भस्म निधापयेत्" इत्यपि पाठः दृश्यते ॥ २७२—२७४ ॥

पच्यमानं पुटयेत् सुयुक्त्या वान्त्यादिकं यावदुपैति शान्तिम् ॥२७५॥

अन्यमतम्।—

शुद्धं ताम्रदलं विमर्द्य पटुना क्षारेण जम्बीरजैः
नीरैर्घस्रमिदं स्नुगर्कपयसा लिप्तं धमेत् सप्तधा।
निर्गुण्ड्यम्बु हिमं रसेन्द्रकलितं दुग्धाज्यगन्धेन तत्
तुल्येनाथ मृतं भवेत् सुपुटितं पञ्चामृतेन त्रिधा ॥ २७६ ॥

अथ शुद्धताम्रगुणाः।—

वान्तिभ्रान्तिविवर्जितं क्षयरुजाकुष्ठानि पाण्ड्वामयं
शूलं मेहगुदाङ्कुरानिलगदानुक्तानुपानैर्जयेत्।

मतान्तरमाह,—जम्भाम्भसेति। ताम्रतुल्यं सैन्धवं गन्धकञ्च संगृह्य जम्बीररसेन मर्दयेत्, तेन ताम्रपत्रं लेपयेत्, ततः स्थालीमध्ये संस्थाप्य स्वल्पशरावेण आच्छाद्य सन्धिं लेपयेत्, ततो बालुकाभिरूर्द्धमापूर्य्य विपचेत्। मृते च सञ्चूर्ण्य पञ्चगव्यैर्वारंवारं प्रपुटेद् यावद्वान्त्यादि शान्तिमुपैतीति। [पञ्चगव्यम्,—"पञ्चगव्यं दधिक्षीर-घृतगोमूत्रगोमयैः" इत्युक्तं दध्यादिपञ्चकम्] ॥ २७५ ॥

मतान्तरमाह,—शुद्धमित्यादि। सैन्धवं क्षारत्रयञ्च ताम्रतुल्यं संगृह्य जम्बीररसैस्तथा स्नुह्यर्कदुग्धेन सह मर्दयेत्। तेन लिप्तं ताम्रपत्रं सप्तधा धमेत् निर्गुण्डीरसैश्च सिञ्चेत्। यत् गैरिकाभचूर्णमधः पतति, तत् सङ्गृह्य प्रक्षाल्य तुल्येन गन्धकेन सूतेन च संमर्द्य दुग्धाज्याभ्यां पीठिकां कृत्वा प्रपुटेत्, ततः पञ्चामृतेन त्रिधा पुटेदिति। पञ्चामृतं यथा,—"दुग्धं सशर्करञ्चैव घृतं दधि तथा मधु। पञ्चामृतमिदं प्रोक्तं विधेयं सर्वकर्मसु॥" इति ॥ २७६ ॥

एवंविधमृतताम्रस्य गुणमाह,—वान्तिभ्रान्तीत्यादि। गुदाङ्कुरम्—

गुञ्जामात्रमिदं ततो द्विगुणितं तच्छुद्धकायेन चेत्
भुक्तः स्थौल्यजराऽपमृत्युशमनं पथ्याशिना वत्सरात् ॥ २७७ ॥

ताम्रमुष्णं गरहरं यकृत्प्लीहोदरापहम् ।
क्रिमिशूलामवातघ्नं ग्रहण्यर्शोऽम्लपित्तजित् ॥ २७८ ॥

[इति ताम्रमारणम् ।]

अथ पित्तलकांस्ययोः शोधनादिकम् ।—

पित्तलञ्च तथा कांस्यं ताम्रवत् मारयेत् पृथक् ।
ताम्रवच्छोधनं तेषां ताम्रवत् गुणकारकम् ॥ २७९ ॥

[इति पित्तलकांस्यशोधनमारणम्] ।

अथ नागवङ्गयोः शोधनम् ।—

नागवङ्गे च गलिते रविदुग्धेन सेचिते ।
त्रिवारान् शुद्धिमायातः सच्छिद्रे हण्डिकान्तरे ॥ २८० ॥

मतान्तरम् ।—

वङ्गं चूर्णोदके स्विन्नं यामार्द्धेन विशुध्यति ॥ २८१ ॥

[इति नागवङ्गशुद्धिः] ।

अर्शोरोगम् । गुञ्जामात्रमिदमिति—रोगोपशमनार्थं गुञ्जामात्रं ताम्रं प्रयोक्तव्यम् ; रसायनार्थञ्च गुञ्जाद्वयमिति ॥ २७७।२७८ ॥

कांस्यपित्तलयोः शोधनमारणादिकमाह, पित्तलञ्चेत्यादि ।—स्पष्टम् ॥ २७९ ॥

नागवङ्गयोः शोधनमाह, नागवङ्गे इति ।—गलिते ते नागवङ्गे सच्छिद्रहण्डिकान्तरनिविष्टे त्रिवारञ्च अर्कक्षीरेण अभिषिञ्चेत् इति ॥२८०॥

वङ्गशोधनमाह, वङ्गमिति ।—वङ्गपत्रं चूर्णोदके यामार्द्धं दोलायन्त्रे स्वेदयेदिति ॥ २८१ ॥

अथ सीसकमारणम् ।—

भुजङ्गममगस्त्यस्य पिष्ट्वा पत्रं प्रलेपयेत् ।
तत्र संविद्रुते नागे वासाऽपामार्गसम्भवम् ॥ २८२ ॥
क्षारं विमिश्रयेत् तत्र चतुर्थांशं गुरूक्तितः ।
प्रहरं पाचयेच्चुल्ल्यां वासादर्व्या च चालयेत् ॥ २८३ ॥
तत उद्धृत्य तच्चूर्णं वासानीरेण मर्दयेत् ।
एवं सप्तपुटैर्नागं सिन्दूरं जायते ध्रुवम् ॥ २८४ ॥

अन्यमतम् ।—

त्रिभिः कुम्भीपुटैर्नागो वासारसविमर्दितः ।
सशिलो भस्मतामेति तद्रजः सर्वमेहजित् ॥ २८५ ॥
दशनागबलं धत्ते वीर्य्यायुःकान्तिवर्द्धनम् ।
मेहान् हन्ति हतं नागं सेव्यं वङ्गञ्च तद्गुणम् ॥ २८६ ॥

अथ शुद्धनागगुणाः ।—

तारस्य रञ्जनो नागो वातपित्तकफापहः ।
ग्रहणीकुष्ठगुल्मार्शः-शोषव्रणविषापहः ॥ २८७ ॥

[इति नागमारणम्] ।

अथ नागमारणमाह, भुजङ्गममिति ।- भुजङ्गमं—सीसकम् । अगस्त्यं—वकपुष्पम् । तत्र संविद्रुते नाग इति ।—पिष्टागस्त्यपत्र-लिप्तं सीसकं हण्डिकान्तर्निवेश्य अग्नौ प्रतापयेत् ; गलिते सति वासकापामार्गयोः क्षारं नागात् चतुर्थांशं वारंवारं क्षिपेत् । एवं प्रहरं यावत् पक्त्वा उद्धृत्य वासकरसैः मर्दयेत, ततः सप्तधा पुटेदिति ॥२८२—२८४॥

मतान्तरमाह, त्रिभिरित्यादि ।—सशिलः,—मनःशिलया सहितः । कुम्भीपुटैः,—गजपुटैः । एवंविधमृतस्य सीसकस्य गुणमाह,—सर्व-

अथ वङ्गमारणम् ।—

वङ्गं सतालमर्कस्य पिष्ट्वा दुग्धेन सम्पुटेत् ।
शुष्काश्वत्थभवैर्वल्कैः सप्तधा भस्मतां नयेत् ॥ २८८ ॥

मतान्तरम् ।—

विशुद्धवङ्गपत्राणि द्रावयेद् हण्डिकान्तरे ।
अपामार्गोद्भवं चूर्णं तत्तुल्यं तत्र मेलयेत् ॥ २८९ ॥
स्थूलाग्रया लौहदर्व्या शनैस्तदभिमर्दयेत् ।
यावद्भस्मत्वमाप्नोति तावन्मर्द्यन्तु पूर्ववत् ॥ २९० ॥
ततस्त्वेकीकृतं चूर्णं कृत्वा चाङ्गारवर्जितम् ।
नूतनेन शरावेण रोधयेच्च भिषग्वरः ।
पश्चात् तीव्राग्निना पक्वं वङ्गभस्म भवेद् ध्रुवम् ॥ २९१ ॥

मेहजिदित्यादि। अथ सीसकगुणं वङ्गेऽप्यतिदिशति,—वङ्गञ्च तद्गुणम् इति ॥ २८५—२८७ ॥

अथ वङ्गमारणमाह, वङ्गमित्यादि ।—यद्यप्यत्र मारणयोग्यं वङ्गं नोक्तं तथाऽपि दोषलवङ्गपरिहारार्थं तल्लक्षणं विशेषतो ज्ञेयम् ; यथा,—"श्वेतं मृदु लघु स्वच्छं स्निग्धमुष्णसहं हिमम् । मूलपत्रकरं कान्तं लघु श्रेष्ठमुदाहृतम् ॥ चुरकं मिश्रकञ्चापि द्विविधं वङ्गमुच्यते । उत्तमं चुरकं तत्र मिश्रकं त्वहितं मतम् ॥" इति। वङ्गमित्यादौ हरितालं वङ्गञ्च समभागं गृह्णीयात् ; अर्कदुग्धेन हरितालं निष्पिष्य तेन वङ्गपत्रं लेपयेत्। ततोऽश्वत्थस्य शुष्कवल्कलैः सह सप्तधा प्रपुटेत् ; एवं भस्मतां याति ॥ २८८ ॥

मतान्तरमाह, विशुद्धवङ्गपत्राणीत्यादि ।—विशुद्धवङ्गपत्राणि हण्डिकामध्ये निक्षिप्य अग्नौ प्रतापयेत्। गलिते सति तुल्यांशम् अपामार्ग-

मतान्तरम् ।—

वङ्गं खर्परके कृत्वा चुल्ल्यां संस्थापयेत् सुधीः ।
द्रवीभूते पुनस्तस्मिन् चूर्णान्येतानि दापयेत् ॥ २९२ ॥
प्रथमे रजनीचूर्णं द्वितीये च यमानिकाम् ।
तृतीये जीरकञ्चैव ततश्चिञ्चात्वगुद्भवम् ॥ २९३ ॥
अश्वत्थवल्कलोत्थञ्च चूर्णं तत्र विनिक्षिपेत् ।
एवं विधानतो वङ्गं म्रियते नात्र संशयः ॥ २९४ ॥

गुणाः ।—

वङ्गं तिक्ताम्लकं रूक्षं किञ्चिद्वातप्रकोपणम् ।
मेदःश्लेष्मामयघ्नञ्च क्रिमिघ्नं मेहनाशनम् ॥ २९५ ॥

[इति वङ्गमारणम्] ।

अथ लौहशोधनम् ।—

तप्तानि सर्वलौहानि कदलीमूलवारिणि ।

क्षारं वारंवारं दत्त्वा लौहदर्विकया मर्दयेत् यावत् भस्मतामाप्नोति ; ततो जले वारंवारं प्रक्षाल्य च अङ्गाररहितं कुर्य्यात् ; तत आतपे संशोष्य दुग्धेन मर्दयेत् ; तदनु नूतनशरावद्वयान्तर्निहितं कृत्वा सन्धिमालिप्य मृत्तिकावस्त्रेणावेष्ट्य तीव्राग्निना पचेदिति ॥ २८८—२९१ ॥

मतान्तरमाह, वङ्गमित्यादि ।—वङ्गं स्थालीमध्ये संस्थाप्य अग्नौ प्रतापयेत् । द्रवीभूते च प्रथमे तुल्यांशं हरिद्राचूर्णं देयं, किञ्चित् विश्राम्य तदनन्तरं यमानिकाचूर्णं तत्तुल्यं प्रक्षेप्यम् ; एवं सर्वत्र । चिञ्चात्वगुद्भवमिति ।—चिञ्चायास्त्वक्चूर्णम् ; एवमश्वत्थवल्कलोद्भवं चूर्णं प्रदेयमिति । एवं मृतवङ्गस्य गुणमाह—वङ्गमित्यादि ॥ २९२—२९५ ॥

इदानीं लौहशोधनमाह, तप्तानीति ।—सर्वलौहानीति—सर्वाणि कान्तपाण्डिवज्रादीनि । यद्यपि अत्र लौहशोधनं सामा-

सप्तधा त्वभिषिक्तानि शुद्धिमायान्त्यनुत्तमाम् ॥ २८६ ॥

न्येनैव उक्तं, तथाऽपि पातञ्जलोक्तशोधनविधिना लौहं निर्म्मलं कार्य्यम्; अन्यथा तत् सुशोधितं न स्यात्। उक्तं हि—"लौहं प्रथमतः शाणादिना निर्म्मलीकृत्य पत्तलं कार्य्यं, तदनु चाङ्गेरीमातुलुङ्गाम्लवेतसेन अम्लयित्वा प्रत्येकेन सप्तवारम् आतपे संशोष्य, ततः काञ्जिकादौ दिनद्वयं त्रयं वा स्थाप्यम्; एवमम्लभावनां विधाय, तदनु गोमूत्रपिष्टत्रिफलाकल्केन आलिप्य आतपे शोषणीयम्; ततश्च मनःशिलावल्मीकमृत्तिकाकुठारिकामूल-चाङ्गेरीश्वेतदूर्वासैन्धवैश्च जले पिष्टैः क्रमेण प्रलिप्य आतपे शोषणीयम्; ततश्च पत्तलं निर्म्मलं कृत्वा लौहम् अम्लीकृतं पुनः मूत्रपिष्टत्रिफलया वारिपिष्टमनोह्वया च तत् भावितं कारयेत्; तदनु भस्त्रया वह्निं ध्मापयित्वा नातितप्तं कृत्वा लौहापेक्षया द्विगुणेषु गव्यदुग्धकाञ्जिकगोमूत्रत्रिफलाक्वाथेषु पृथक् वारत्रयं निर्वापणीयम्; अथवा तप्तं कृत्वा सप्तवारं कदलीमूलवारिणि अभिषिञ्चेत्। निषेकमात्रा च,—"लौहपत्रं मनाक् तप्तं द्विगुणे तद्रसे क्षिपेत्। निषेक एष निर्दिष्टो निषेकार्थैकवादिभिः॥" इति। तदेवं निषेकं विधाय रात्रिमेकां विश्राम्य पुनरपि स्वच्छकाञ्जिकमात्रे लौहनिषेकं कर्त्तव्यम्। तदनु मारणादिषु योजयेदिति। एवं शोधितस्य लौहस्य पलपञ्चकं गृहीत्वा लौहार्द्धभागं षोड़शांशं वा स्वर्णमाक्षिकचूर्णं त्रिफलाक्वाथेन आलोड्य लेपयेत्, तदनु कुठारच्छिन्ना-त्रिफला-ऽपराजिता-ऽस्थिसंहार-हस्तिकर्णपलाशमूल-शतावरी-केशराज-शालिमूल-कुलिशमूल-पुनर्नवा-भृङ्गराजैः भेषजैः षोड़शांशैः आलिप्तम् आध्मापितभस्त्रामुक्तपवनेन प्रज्वालितवह्नौ स्थापयेत्; धलिमत् सर्वमस्वच्छं मलिनञ्च सर्वथा विवर्जयेदिति। यदा गलति लौहं, तदा यथोक्तत्रिफलाक्वाथे निक्षिपेत्। एवं सति यत् न मृतं, तत् पुनरपि ध्मात्वा त्रिफलाक्वाथे क्षेपणीयम्;

मतान्तरम् ।—

त्रिफलाऽष्टगुणे तोये त्रिफला षोड़शं पलम् ।
तत्क्काथे पादशेषे तु लौहस्य पलपञ्चकम् ॥ २९७ ॥
कृत्वा च तप्तपत्राणि सप्तवारं निषिचयेत् ।
एवं प्रलीयते दोषो गिरिजे ! लौहसम्भवः ॥ २९८ ॥

[इति लौहशोधनम्] ।

निरुत्थोकरणोपायः ।—

भानुपाकात् तथा स्थाली-पाकाच्च पुटपाकतः ।
निरुत्थो जायते लौहो यथोक्तफलदो भवेत् ॥ २९९ ॥

अथ भानुपाकविधिः ।—

लौहे दृषदि लौहञ्च मुद्गरेण हतं मुहुः ।
कृत्वाम्बुगलितं शुद्धं जलेन त्रैफलेन वा ॥ ३०० ॥

एवं सप्तवारकृतेऽपि यत् न मृतं, तत् परित्याज्यम् अलौहत्वात् । उक्तं हि—"सप्तवारं तथा लौहं पूर्ववत् पूर्वभेषजैः । ध्मात्वा ततः समुत्थाप्य निक्षिपेत् त्रिफलाऽम्भसि । एवं नामात्र यो लौहो न मृतस्त्याज्य एव सः ॥" इति ॥ २९६ ॥

शोधनाय लौहनिर्वापणार्थं यथा त्रिफलाक्काथः कर्त्तव्यः तदाह, त्रिफलाऽष्टगुण इति ।—ध्मातलौहनिर्वापणावशिष्टः त्रिफलाक्काथः भानुपाकार्थं स्थापनीय इति ॥ २९७।२९८ ॥

एवं मृतस्य लौहस्य भानुपाकादिभिः निरुत्थीकर्त्तव्यम् । निरुत्थीकरणोपायमाह,—भानुपाकात् इत्यादि ॥ २९९ ॥

भानुपाकविधिमाह,—लौहे इत्यादि ।—जारणानन्तरं लौहोदूखले लौहमुद्गरेण मुद्गसन्निभं सञ्चूर्ण्य सलिलं त्रिफलाक्काथं वा बहुशो दत्त्वा

चालयेद्बहुश: पश्चात् कृत्वा द्रवान्तरं पृथक् ।
शोषितं भानुभिर्भानोर्भानुपाके प्रयोजयेत् ॥ ३०१ ॥
चालने भानुपाके तु लौहतुल्यं फलत्रिकम् ।
जलं द्विगुणितं दत्त्वा चतुर्भागावशेषितम् ॥ ३०२ ॥
एवमुक्तं फलक्वाथ-जलं दत्त्वा पुन: पुन: ।
शोषयेत् सूर्य्यतेजोभिर्निरन्तरमहस्त्रयम् ॥ ३०३ ॥
अथवा तत्र तत्क्वाथं दत्त्वा दत्त्वा भिषग्वर: ।
सप्तसप्तविधैरेव सप्त वारान् विशोधयेत् ॥ ३०४ ॥

[इति भानुपाकविधि:] ।

अथ स्थालीपाकविधि: ।—

इत्थमादित्यपाकान्ते स्थाल्यां पाकमुपाचरेत् ।
स्थालीपाके फलं ग्राह्यमयसस्त्रिगुणीकृतम् ॥ ३०५ ॥
तस्य षोड़शिकं तोयमष्टभागावशेषितम् ।
मृदुमध्यकठोराणामन्येषामयसा समम् ॥ ३०६ ॥

वारंवारं प्रक्षाल्य च अङ्गाररहितं कुर्य्यात् । ततोऽग्नौ आतपे वा, शुष्कीकृत्य तीक्ष्णलौहखल्ले मर्दयेत् ; ततो यथोक्तत्रिफलाक्वाथसहितं भानुपाके योजयेत् ॥ ३००।३०१ ॥

चालनार्थं भानुपाकार्थं वा कियन्माना त्रिफला ग्राह्या ? जलं वा कियन्मानम् ? तदाह—चालने इत्यादि । निरन्तरमहस्त्रयम् इति ।—एवं कृतं क्वाथं निरन्तरं त्रिदिनं दत्वा सूर्य्यांशुभि: शोषयेत् ; अथवा क्वाथं सप्तधा विभज्य सप्तवारं दत्त्वा शोषयेत् ; एवं सप्तधा कुर्य्यादिति भाव: ॥ ३०२—३०४ ॥

भानुपाकानन्तरं स्थालीपाक: कर्त्तव्य: । तत्र कियत्त्रिफलामानं

क्वथनीयं समादाय चतुरष्टौ च षोड़श।
गुणानां स्थाप्यते तोयं शेषयेदयसा समम्॥ ३०७॥
स्वरसस्यापि लौहेन स्थालीपाके समानता।
स्थाल्यां क्वाथादिकं दत्त्वा यथाविधि विनिर्मितम्।
पाकेन चीयते यस्मात् स्थालीपाक इति स्मृतः॥ ३०८॥
हस्तिकर्णपलाशस्य मूलञ्च शतमूलिका।
भृङ्गराजाख्यराजानामेषां निजरसैः सह॥ ३०९॥
मिलित्वा वा विधातव्यं स्थालीपाके फलादनु।
यथादोषौषधेनापि स्थालीपाको विधीयते॥ ३१०॥

[इति स्थालीपाकविधिः]।

कर्त्तव्यम्? कियन्मानं वा जलं देयम्? इत्यत आह,—स्थालीपाक इत्यादि। यद्दोषप्रत्यनीकं व्याधिप्रत्यनीकञ्च स्थालीपाकार्थमुक्तं तेषां स्वरसाप्राप्तौ क्वाथः कीदृशः कर्त्तव्यः? इत्यत आह, मृदु-मध्येति।—मृदुमध्यकठोराणां द्रव्याणां क्वाथ्यम्; अयसा समं गृहीत्वा यथाक्रमं चतुरष्टौ षोड़शगुणं वा तोयं दत्त्वा लौहसमं ग्रहणीयमिति। केचित्तु—व्याध्यनुरूपस्थालीपचनीयद्रव्याणामन्तरे कस्यचित् यदि स्वरस-प्राप्तिर्नास्ति तत्र स्थालीपाकार्थं त्रिफलाक्वाथानुसारेण एव क्वाथ्यजला-दिकं दत्त्वा क्वथनीयम्। तच्च क्वाथं स्थालीपाके प्रयोजयेदित्याहुः। स्वरसमानार्थमाह,—स्वरसस्येति। स्थालीपाकस्य निरुक्तिमाह—स्थाल्यामित्यादि। प्रथमतः स्थाल्यां लौहचूर्णं त्रिफलाक्वाथेन आलोड्य वह्निपाकं विधाय ततोऽनन्तरं हस्तिकर्णपलाशादीनां व्यस्तानां समस्तानां वा स्वरसैरपि पूर्ववत् स्थालीपाकः कार्य्यः। यथा-निर्दिष्टद्रव्याणां मध्ये लौहोद्दिष्टजनस्य यद्दोषप्रत्यनीकं न भवति, तत् परित्याज्यम्; यद्दोषप्रत्यनीकं तदनुक्तमपि देयमित्यत आह,—

अथ पुटपाकविधिः ।—

स्थालीपाके सुसंपक्कं प्रक्षाल्य स्वच्छवारिणा ।
शुष्कं सञ्चूर्ण्य यत्नेन पुटपाके प्रयोजयेत् ॥ ३११ ॥
पुटाद्दोषविनाशः स्यात् पुटादेव गुणोदयः ।
म्रियते च पुटाल्लौहस्तस्मात् पुटं समाचरेत् ॥ ३१२ ॥
यथा यथा प्रदीयन्ते पुटाः सुबहुशो यदि ।
तथा तथा प्रकुर्वन्ति गुणानेव सहस्रशः ॥ ३१३ ॥
पुटपाकेन पक्वन्तु शस्यते रसकर्मसु ।
दशादिशतपर्य्यन्तो गदे पुटविधिर्मतः ॥ ३१४ ॥
शतादिषु सहस्रान्तः पुटो देयो रसायने ।
वाजीकर्मणि विज्ञेयो दशादिशतपञ्चकः ॥ ३१५ ॥
तावदेव पुटेल्लौहं यावच्चूर्णीकृतं जले ।
निस्तरङ्गे लघुत्वेन समुत्तरति हंसवत् ॥ ३१६ ॥

यथादोषेति। दोषप्रत्यनीकद्रव्याणां स्वरसैः क्वाथैर्वा स्थालीपाकः कार्य्यः इति ॥ ३०५—३१० ॥

स्थालीपाकानन्तरं स्वच्छवारिणा लौहं प्रक्षाल्य आतपे शोषयेत्, ततः सञ्चूर्ण्य वक्ष्यमाणविधिना पुटपाकं कुर्य्यात् इति। पुटपाकस्य प्रयोजनम् आह,—पुटादित्यादि। यैः द्रव्यैः पुटो देयः तेषां गुणाः सहस्रशो लौहेऽपि वर्त्तन्ते इत्यत आह,—यथा यथेति। पुटानां सङ्ख्याभेदेन कर्मभेदानाह,—दशादीत्यादि।—दशादिशतपर्य्यन्तं व्याधिनिवारकम्; एवमन्यच्च। एतच्च विशिष्टज्ञानार्थम्; यदा तु प्रतिपुटानन्तरं पिष्टं वस्त्रपूतञ्च लौहं केतकीरजःसदृशं भवति, तदा सङ्ख्याविभेदप्रयोजनं नास्ति, सप्ताष्टाभिरेव विशिष्टफलदं भवतीति। यदा सङ्ख्याविभेदो न

पुटपाकौषधस्यापि क्काथो वा स्वरसोऽपि वा ।
वच्यमाणप्रमाणेन कर्त्तव्यो भिषजां वरैः ॥ ३१७ ॥
रसाभावे तु सर्वेषां क्काथो ग्राह्यो मनीषिभिः ।
अभावे स्वरसस्यापि क्काथ एव फलत्रिकात् ॥ ३१८ ॥

अथ त्रिफलादिगणः ।—

त्रिफला त्रिवृता दन्ती कटुकी तालमूलिका ।
वृद्धदारश्च वृश्चीर-वृषपत्रक-चित्रकाः ॥ ३१९ ॥
शृङ्गबेरविड़ङ्गौ च भृङ्गभल्लातकौषधम् ।
दाड़िमस्य च पत्राणि शतपुत्री पुनर्नवा ॥ ३२० ॥
कुठारः क्रामकः कन्दः तन्त्री भेकस्य पर्णिका ।
हस्तिकर्णपलाशश्च कुलिशः केशराजकः ॥ ३२१ ॥
माणः खण्डितकर्णश्च गोजिह्वा लोहमारकः ।
गिरिशान्तनकः प्रोक्तस्त्रिफलादिरयं गणः ।
सामान्यपुटपाकार्थमेतानीच्छन्ति सूरयः ॥ ३२२ ॥

कार्य्यस्तथा विभेदेऽपि यथाविधलौहं कर्त्तव्यं तदर्थमाह—तावदेवेति ॥ ३११—३१६ ॥

अथ पुटपाकौषधस्य क्काथः स्वरसो वा यथा प्रयोज्यः तदर्थं साधारणविधानमाह,—पुटपाकेत्यादि ॥ ३१७।३१८ ॥

साधारणपुटपाकार्थं त्रिफलादिगणमाह, त्रिफलेत्यादि ।—त्रिवृता—रक्ततेउड़ीति ख्याता । चित्रकं—चित्रकमूलम् । औषधम्—शुण्ठी । शतपुत्री—शतमूली । कुठारः,—कुड़ालिया इति ख्याता । क्रामकः,—कान्तक्रामकः । कन्दः,—शूरणकन्दः । कुलिशः,—अस्थिसंहारः ॥ ३१९—३२२ ॥

अथ एरण्डादिगणः ।—

विशेषपुटपाकाय गणानन्यान् शृणूदितान् ।
एरण्डः शारिवा द्राक्षा शिरीषश्च प्रसारणी ॥ ३२३ ॥
माषमुद्गाख्यपर्णिन्यौ विदारीकन्द-केतकी ।
एरण्डादिगणो ह्येष सर्ववातविकारनुत् ॥ ३२४ ॥

अथ किराताादिगणः ।—

किरातममृता निम्बं कुस्तुम्बुरु शतावरी ।
पटोलं चन्दनं पद्मं शाल्मल्युडुम्बरी जटा ।
पैत्तिकामयहन्ताऽयं किरातादिगणो मतः ॥ ३२५ ॥

अथ शृङ्गबेरादिगणः ।—

शृङ्गबेरस्य मूलानि निर्गुण्डी कौटजं फलम् ।
करञ्जद्वितयं मूर्वा शोभाञ्जन-शिरीषकौ ॥ ३२६ ॥
वरुणश्चार्कपर्णञ्च पटोलं कण्टकारिका ।
शृङ्गबेरादिको ह्येष गणः श्लेष्मगदापहः ॥ ३२७ ॥

विशेषपुटपाकार्थमाह,—विशेषेत्यादि । एरण्डादिगणमाह—एरण्ड इति ।—एरण्डादिगणश्च वातघ्नः । तेन पुटनादिना लौहोऽपि वातघ्नो भवति । विदारीकन्दः,—शुक्लभूमिकुष्माण्डः ॥ ३२३।३२४ ॥

किरातादिगणमाह,—किरातमित्यादि । कुस्तुम्बुरु—धन्याकम् ; जटा—जटामांसी । किरातादिगणः पित्तघ्नः ॥ ३२५ ॥

शृङ्गबेरादिगणमाह,—शृङ्गबेरस्येति ।—शृङ्गबेरादिगणः कफघ्नः । शृङ्गबेरस्य मूलानि—आर्द्रकम् । कौटजं फलम्—इन्द्रयवम् ॥३२६।३२७॥

अथ गोक्षुरादिगणः।—

गोक्षुरक्षुरकौ व्याघ्री सिंहपुच्छोद्वयं स्थिरा।
गोक्षुरादिरिति प्रोक्तो वातश्लेष्महरो गणः ॥ ३२८ ॥

अथ पटोलादिगणः।—

पटोलपत्रकोशीर-कासमर्दापराजिताः।
लोध्रेन्दीवर-कह्लार-वाराही कान्तया सह।
पटोलादिरिति ज्ञेयः पित्तश्लेष्मगदापहः ॥ ३२९ ॥

अथ किंशुकादिगणः।—

किंशुकः काश्मरी विश्वमग्निमन्थस्त्रिकण्टकः।
श्योनाकः शालपर्णी च सिंहपुच्छोद्वयं स्थिरा ॥ ३३० ॥
पाटला कण्टकारी च वृहती विल्व एव च।
किंशुकादिगणो ह्येष दोषत्रयहरो मतः ॥ ३३१ ॥

अथ शतावर्य्यादिगणः।—

शतावरीबलाधात्री-गुडूचीवृद्धदारक-।
वानरीभृङ्गराजाख्य-विदारीगोक्षुरक्षुरैः।
वाजिगन्धाकणायुक्तैर्वाजीकर्म्मसु शस्यते ॥ ३३२ ॥

गोक्षुरादिपटोलादिगणद्वयमाह, गोक्षुरेति।—गोक्षुरादिगणश्च वातश्लेष्मघ्नः। एवमन्यत्र। सिंहपुच्छोद्वयं—शालपर्णी पृश्निपर्णी च। कान्ता—प्रियङ्गुः ॥ ३२८।३२९ ॥

किंशुकादिगणमाह, किंशुक इति।—किंशुकः,—पलाशः, काश्मरी—गाम्भारी, विश्वं—शुण्ठी, अग्निमन्थः,—गणिकारिका, त्रिकण्टकः,—गोक्षुरः ॥ ३३०।३३१ ॥

विदारीकन्दादिगणः ।—

विदारीकन्दपिण्डाह्व-भृङ्गराजशतावरी ।
चोरकञ्चुकभल्लातामृतकाचित्रकैस्तथा ॥ ३३३ ॥
करिकर्णपलाशैश्च मुषलीमधुकैरपि ।
मुण्डिरीकेशराजैश्च पुटो देयो रसायने ॥ ३३४ ॥
सामान्ये तु विशेषे च पुटे यद्यत् प्रकीर्त्तितम् ।
मिलितैरेकशो वा तैर्यथेष्टं पुटयेत् ततः ।
पुटपाके फलादीनामयसा ग्रहणं समम् ॥ ३३५ ॥

अथ पुटपाकप्रकरणमाह ।—

हस्तमात्रमिते गर्त्ते करीषेणार्द्धपूरिते ।
अथवा तुषकाष्ठाभ्यां पूरितेऽर्द्धे निधापयेत् ।
लौहमग्निं ततो दत्त्वा तथैवोर्द्धं प्रपूरयेत् ॥ ३३६ ॥

वाजीकर्मसु येन प्रपुटेत् तमाह, शतावरीत्यादि ।—बला—श्वेतवाट्यालकम् । वाजिगन्धा—अश्वगन्धा ॥ ३३२ ॥

रसायनार्थं यैश्च पुटो देयः तानाह,—विदारीकन्देति ।—विदारीकन्दः,—शुक्लभूमिकुष्माण्डः ॥ ३३३।३३४ ॥

सान्यान्यविशेषपुटगणैर्व्यस्तैः समस्तैः वा पुटो देयः इत्यत आह, सामान्य इत्यादि ।—तैरेकैकशः समस्तैः वा । यथेष्टमिति ।—दशादिसहस्रपर्य्यन्तं निर्मलत्वेन लघुत्वेन वा यथा हंसवत् जले समुत्तरति तथा प्रपुटेदिति । पुटनार्थञ्च पुटकगणस्य स्वरसो ग्राह्यः ; स्वरसाभावे लौहसमं पुटनद्रव्यं सङ्गृह्य यथोक्तक्वाथः कर्त्तव्यः ; तेनायश्चूर्णं पङ्कोपमं कुर्य्यात् । ततो लौहे मृन्मये पात्रे वा लिप्त्वा तत्तुल्येन अपरपात्रेण आच्छाद्य सन्धिमालिप्य यथोक्तविधिना प्रपचेदिति ॥ ३३५ ॥

दिवा वा यदि वा रात्रौ विधिनानेन पाचयेत्।
चतुर्भिः प्रहरैरेव पुटपाकेन मारयेत्॥ ३३७॥
पुटपाके चणादूर्द्ध्वं स्थितो भवति भस्मसात्।
अधस्तादपकृष्टस्तु मन्दो भवति वीर्य्यतः॥ ३३८॥
कुण्डस्थो भस्मनाच्छन्न आकृष्टव्यः सुशीतलः।
समाकृष्टस्य तप्तस्य गुणहानिः प्रजायते॥ ३३९॥

मतान्तरम्।—

शुद्धस्य सूतराजस्य भागो भागद्वयं बलेः।
द्वयोः समं लौहचूर्णं मर्दयेत् कन्यकाद्रवैः॥ ३४०॥
यामद्वयं ततो गोलं स्थापयेत् ताम्रभाजने।
आच्छाद्यैरण्डजैः पत्रैरुष्णो यामद्वयाद्भवेत्॥ ३४१॥

पुटपाकप्रकारमाह, हस्तमात्रेति।—हस्तैकमात्रं सर्वतो हस्तैकपरिमाणं, तेन हस्तैकमात्रगभीरं सममध्यं कटाहसदृशं वर्त्तुलाकारं गर्त्तं कर्त्तव्यम्; वन्यकरीषेण तुषेण काष्ठेन वा अर्द्धपूरिते तस्मिन् अग्निं निधाय सम्पुटञ्च दत्त्वा अपरमर्द्धं करीषादिभिः पूरयेत्; एवंविधानेन चतुर्भिः प्रहरैरेव पुटपाकः कीर्त्तितः। प्रतिपुटान्ते लौहपात्रे सुपाषाणपात्रे वा केतकीरजःसदृशं चूर्णयेदिति। अन्यत् लौहमारणादिविशेषविधानं लौहप्रदीपादौ बोध्यम्॥ ३३६।३३७॥

पुटपाकस्य ग्राह्यतां त्यज्यताञ्चाह, पुटपाक इत्यादि।—सम्यक् निर्वाणतां गतेऽग्नौ कुण्डस्थो लौहादिर्ग्राह्यः; अन्यथा तप्तस्य समाकर्षणात् गुणहानिर्भवति॥ ३३८।३३९॥

पुटपाके मतान्तरमाह, शुद्धस्येत्यादि।—सूतराजस्य पारदस्य भागैकं, तथा बलेर्गन्धकस्य भागद्वयं, द्वयोः समं लौहचूर्णं सङ्गृह्य मर्दयेत् यावत्

त्रिरात्रं धान्यराशिस्थं तत् ततो मर्दयेद्दृढम् ।
रजस्तद्विस्त्रगलितं नीरे तरति हंसवत् ।
तीक्ष्णं मुण्डं कान्तलौहं निरुत्थं जायते मृतम् ॥ ३४२ ॥

मतान्तरम् ।—

क्षिपेद्वा द्वादशांशेन दरदं तीक्ष्णचूर्णतः ।
कन्यानीरेण संमर्द्य यामयुग्मञ्च सम्पुटेत् ।
एवं सप्तपुटे मृत्युं लौहचूर्णमवाप्नुयात् ॥ ३४३ ॥

[इति पुटपाकविधिः] ।

अथ लौहस्य निरुत्थीकरणम् ।—

सर्वमेतत् मृतं लौहं पक्तव्यं मित्रपञ्चकैः ।
यद्येवं स्यात् निरुत्थञ्च सेव्यं रक्तिचतुष्टयम् ॥ ३४४ ॥

अथ मित्रपञ्चकम् ।—

मधु सर्पिस्तथा गुञ्जा टङ्कणं गुग्गुलुस्तथा ।
मित्रपञ्चकमेतत् तु गणितं धातुमेलने ॥ ३४५ ॥

निरुत्थीकरणे मतान्तरम् ।—

गोघृतं गन्धकं लौहं तप्तखल्ले विमर्दयेत् ।

कज्जलतामुपैति ; ततः कन्याद्रवैः यामद्वयं पिष्ट्वा ताम्रपात्रे तत् गोलकं संस्थाप्य एरण्डपत्रैः आच्छाद्य प्रपुटेत् । तत उरुवूकपत्रैः पुनरावेष्ट्य धान्यराशौ त्रिदिनं स्थापयेत् ; तत उद्धृत्य मर्दयेत् । एवं पुनःपुनः कुर्य्यात् यावत् जले तरति ॥ ३४०—३४२ ॥

मतान्तरमाह, क्षिपेद्वेति ।—दरदं—हिङ्गुलं, तीक्ष्णं—लौहम् ॥३४३॥

अथ लौहस्य निरुत्थीकरणमाह, सर्वमित्यादि ।—मित्रपञ्चकैरिति—वक्ष्यमाणमधुसर्पिःप्रभृतिभिः ॥ ३४४ ॥

दिनैकं कन्यकाद्रावे रुद्धा गजपुटे पचेत्।
इत्येवं सर्व्वलौहानां कर्त्तव्यं स्यात् निरुत्थितम् ॥ ३४६ ॥

रसायने विशेषो यथा :—

मर्द्दयेच्च लौहभस्म गुञ्जामध्वाज्यटङ्कणैः।
धमेद्वह्नौ पुनर्लौहं तदा योज्यं रसायने ॥ ३४७ ॥

गुणाः।—

कषायः शोथशूलार्शः-क्रिमिपाण्डुत्वशोषनुत्।
वयस्यं गुरु चक्षुष्यं सर्वमेदोऽनिलापहम् ॥ ३४८ ॥
आयुःप्रदाता बलवीर्य्यकर्त्ता रोगापहर्त्ता मदनस्य कर्त्ता।
अयःसमानं न हि किञ्चिदस्ति रसायनं श्रेष्ठतमं नराणाम् ॥३४९॥

लौहसेवने वर्ज्जनीयानि।—

कुष्माण्डं तिलतैलञ्च रसोनं राजिकां तथा।
मद्यमम्लरसञ्चैव त्यजेत् लौहस्य सेवकः ॥ ३५० ॥

मित्रपञ्चकमाह,—मधु सर्पिरित्यादि। मतान्तरे निरुत्थीकरणमाह, गोघृतमित्यादि।—अत्र घृतं गन्धं लौहञ्च समभागम् ॥ ३४५।३४६ ॥

रसायने तु गुञ्जामध्वाज्यटङ्कणैः समं लौहं मर्द्दयित्वा वह्नौ धमेत्; यदि पूर्व्ववत् संश्लिष्टं न भवति तदा योज्यम्, अन्यथा परित्याज्यमिति ॥ ३४७ ॥

मृतलौहस्य गुणमाह, कषेत्यादि।—कषायः पाण्डिवज्रादिव्यतिरिक्तं लौहम्। "सर्वमेदोऽनिलापहम्" इत्यत्र "विषमेदोऽनिलापहम्" इति पाठान्तरम् ॥ ३४८।३४९ ॥

लौहसेवनकाले वर्ज्जनीयद्रव्याण्याह, कुष्माण्डमित्यादि।—कुष्माण्ड-

अथ वज्रपाण्ड्यादिगुणाः।—

सामान्याद्द्विगुणं क्रौञ्चं कालिङ्गोऽष्टगुणस्ततः।
कलेः शतगुणं भद्रं भद्राद्वज्रं सहस्रधा॥ ॥ ३५१ ॥
वज्रात् शतगुणं पाण्डि निरङ्गं दशभिर्गुणैः।
ततः कोटिसहस्रैर्वा कान्तलौहं महागुणम्॥ ३५२ ॥

[इति लौहमारणम्]।

अथ मण्डूरस्य उत्कर्षादिनिर्णयः।—

ये गुणा मारिते मुण्डे ते गुणा मुण्डकिट्टके।
तस्मात् सर्वत्र मण्डूरं रोगशान्त्यै प्रयोजयेत्॥ ३५३ ॥
शतोर्द्ध्वमुत्तमं किट्टं मध्यञ्चाशीतिवार्षिकम्।
अधमं षष्टिवर्षीयं ततो हीनं विषोपमम्॥ ३५४ ॥

मित्युपलक्षणम्; ककाराष्टकवर्जनाभिप्रायेण कुष्माण्डमित्युक्तम् ॥ ३५० ॥

कृष्णायसां गुणाः पूर्वमुक्ताः इदानीं वज्रपाण्ड्यादिगुणश्चाह,—सामान्यात् द्विगुणमित्यादि॥ ३५१।३५२ ॥

[इति लौहाध्यायः।

अथ मण्डूरस्योत्कर्षादिकमाह, ये गुणा इति।—मृतलौहे ये गुणाः प्रोक्ताः, मुण्डकिट्टे मण्डूरेऽपि ते गुणा वर्त्तन्ते; अत्र मुण्डं लौहोपलक्षितम्; यतो यल्लौहं यद्गुणं, तदुत्थितमण्डूरमपि तद्गुणम् इति। उक्तं हि—"यल्लौहं यद्गुणं प्रोक्तं तत्किट्टमपि तद्गुणम्" इति। यन्मण्डूरं श्रेष्ठं, यच्च हीनं, तदाह, शतोर्द्ध्वमित्यादि।—शतोर्द्ध्वं—शतवर्षादूर्द्ध्वम् ॥ ३५३।३५४ ॥

मण्डूरशोधनम् ।—

दग्ध्वाऽक्षकाष्ठैर्मलमायसन्तु गोमूत्रनिर्वापितमष्टवारान् ।
विचूर्ण्य लीढ़ं मधुनाऽचिरेण कुम्भाह्वयं पाण्डुगदं निहन्ति ॥३५५॥

किट्टाद्दशगुणं मुण्डं मुण्डात् तीक्ष्णं शताधिकम् ।
तीक्ष्णात् लक्षगुणं कान्तं भक्षणात् कुरुते गुणम् ॥ ३५६ ॥

[इति किट्टशोधनमारणम्] ।

नागैः सुवर्णं रजतञ्च ताप्यैर्गन्धेन ताम्रं शिलया च नागम् ।
तालेन वङ्गं त्रिविधञ्च लौहं नारीपयो हन्ति च हिङ्गुलेन ॥३५७॥

[इति स्वर्णादिशोधनमारणविधिः] ।

अथ मणिमुक्तादिशोधनम् ।—

स्वेदयेद्दोलिकायन्त्रे जयन्त्याः स्वरसेन च ।
मणिमुक्ताप्रवालानि यामैकेन च शोधयेत् ॥ ३५८ ॥

मणिमुक्तादिमारणम् ।—

मुक्ताफलानि शुद्धानि खल्ले पिष्ट्वा पुटेल्लघु ।
एवं भस्मत्वमाप्नोति वज्रकं काञ्जियोगतः ॥ ३५९ ॥

इदानीं शोधनमाह, दग्ध्वाऽक्षेत्यादि ।—आयसं मलं मण्डूरं विभीतककाष्ठानलैः दग्धव्यं, यदा अग्निवर्णं भवति, तदा गोमूत्रे निर्वापयेदिति ; एवमष्टवारं कृत्वा शोधयेदिति ॥ ३५५ ॥

मण्डूरात् मुण्डादिलौहानां गुणविभेदमाह,—किट्टादित्यादि ॥३५६॥

अथ स्वर्णादीनां साधारणमारणद्रव्यं समासत आह,— नागैरित्यादि ॥ ३५७ ॥

अथ मणिमुक्ताप्रवालादीनां साधारणशोधनमाह,—स्वेदयेदित्यादि ॥ ३५८ ॥

मतान्तरम् ।—

कुमार्य्या तण्डुलीयेन तुल्येन च निषेचयेत् ।
प्रत्येकं सप्तवारांश्च तप्ततप्तानि कृत्स्नशः ॥ ३६० ॥
मौक्तिकानि प्रवालानि तथा रत्नान्यशेषतः ।
चणादिविविधवर्णानि म्रियन्ते नात्र संशयः ॥ ३६१ ॥

प्रवालमारणम् ।—

क्षीरदुग्धेन प्रवालञ्च भावयित्वा तु हण्डिके ।
मध्येऽपि तक्रसहितं स्थापयेत् तां निरोधयेत् ।
चुल्ल्यामग्निप्रतापेन म्रियते प्रहरद्वये ॥ ३६२ ॥

सर्वरत्नानां शोधनम् ।—

कुलत्थस्य पलशतं वारिद्रोणेन पाचयेत् ।
तस्मिन् पादावशेषे च क्वाथेऽष्टौ मणयः शिलाः ॥ ३६३ ॥
आतपे त्रिदिनं शोध्याः क्वाथसिक्ताः पुनःपुनः ।
शुध्यन्ते सर्वरत्नानि मणयश्च न संशयः ॥ ३६४ ॥

[इति मुक्तादिशोधनमारणम्] ।

[इति धात्वादिशोधनमारणविधिः] ।

तेषां साधारणमारणमाह, मुक्ताफलानीति ।—विशुद्धानि मुक्ताफलानि खल्ले पिष्ट्वा लघुपुटे पचेत्; वज्रकन्तु काञ्जिकसहितं पुटे पचेदिति । अथवा विविधानि मणिमुक्ताप्रवालानि सप्तवारान् तप्ततप्तानि कुमार्य्यादिस्वरसे प्रक्षिप्याणि ॥ ३५८—३६१ ॥

प्रवालमारणमाह, क्षीरदुग्धेनेति ।—स्पष्टम् ॥ ३६२ ॥

कुलत्थस्येत्यादि ।—अष्टौ मणयः,—मुक्तादयः । शिला—मनःशिला ॥ ३६३।३६४ ॥

अथ विषशुद्धिः ।—

छित्त्वा चणकसंस्थानं गोमूत्रैर्भावयेत् त्र्यहम् ।
समटङ्कणसंपिष्टं मृतमित्युच्यते विषम् ॥ ३६५ ॥

अथ विषोपविषशोधनादिकमाह ।—विषं हि द्विविधं, स्थावरजङ्गमभेदात् । मूलाद्यात्मकं स्थावरविषं दशविधम् । सर्पादिसम्भवं जङ्गमविषं षोड़शात्मकम् । मूलं पत्रं फलं पुष्पं त्वक् चीरं सारः निर्य्यासो धातवः कन्दः स्थावरस्याश्रया दश । तत्र मूलविषं करवीरादि ; पत्रविषं विषपत्रादि ; फलविषं कर्कोटकादि ; पुष्पविषं वेत्रादि । त्वक्सारनिर्य्यासविषाणि करम्भादीनि ; चीरविषं स्नुह्यादि ; धातुविषं हरितालादि ; कन्दविषं वत्सनाभ-शक्तुकादि । तत्र कन्दजविषञ्चाष्टादशविधं, यथा,—दार्विकं वत्सनाभञ्च सैकतं शक्तुकं मुस्तकं सार्षपं कौर्मं शृङ्गी कालकूटं दर्दुरं हालाहलं यमदंष्ट्रा मेषशृङ्गी हारिद्रं कर्कटं रक्तशृङ्गी ग्रन्थिकं केशरञ्च कन्दजविषम् । तेषामाद्यञ्चाष्टविधविषं यौगिकम् ; अन्त्यं दशविधञ्च विवर्जनीयमिति । जङ्गमविषस्य षोड़शाश्रयानाह,—"दृष्टिनिश्वासदंष्ट्राश्च नखमूत्रमलानि च । शुक्रं लालामुखं स्पर्शः सन्दंशश्वावमर्दितम् । गुदास्थिपित्तशूकानि दशषट् जङ्गमाश्रयाः ॥" दृष्टिनिश्वासविषाः दिव्याः सर्पाः । दंष्ट्राविषाः भौमाः सर्पाः । नखविषाः व्याघ्रादयः । मूत्रपुरीषविषाः गृहगोधिकादयः । शुक्रविषाः मूषिकादयः । लालाविषाः उच्चिटिङ्गादयः । लालास्पर्शमूत्रपुरीषार्त्तवशुक्रमुखसन्दंशदंष्ट्रास्पर्शावमर्दितगुदपुरीषविषाश्चित्रशीर्षादयः । अस्थिविषाः सर्पादयः । पित्तविषाः नकुलमत्स्यादयः । शूकविषाः भ्रमरादयः । एषां स्थावरोपलक्षितं यौगिकमष्टविधकन्दविषं यदुक्तं, तेषां शोधनमाह, छित्त्वा चणकेति ।—चणकसंस्थानं—

मतान्तरम् ।—

अथवा त्रैफले क्वाथे विषं शुध्यति पाचितम् ।
दोलायां त्रिफलाक्वाथे छागीक्षीरे च पाचितम् ॥ ३६६ ॥
गोमूत्रपूर्णपात्रे च दोलायन्त्रे विषं पचेत् ।
दशतोलकमानेन चादौ वैद्यो दिवानिशम् ॥ ३६७ ॥

मतान्तरम् ।—

विषभागांश्चणकवत् स्थूलान् कृत्वा तु भाजने ।
तत्र गोमूत्रकं दत्त्वा प्रत्यहं नित्यनूतनम् ॥ ३६८ ॥
शोषयेत् त्रिदिनादूर्द्ध्वं धृत्वा तीव्रातपे ततः ।
प्रयोगेषु प्रयुञ्जीत भागमानेन तद्विषम् ॥ ३६९ ॥

[इति विषशुद्धिः] ।

अथोपविषमाह ।—

अर्कसेहुण्डधुस्तूर-लाङ्गलीकरवीरकाः ।
गुञ्जाऽहिफेनावित्येताः सप्तोपविषजातयः ॥ ३७० ॥

तच्छुद्धिः ।—

धुस्तूरस्य च यद्वीजमन्यच्चोपविषञ्च यत् ।
तच्छोध्यं दोलिकायन्त्रे चीरपूर्णेऽथ पात्रके ॥ ३७१ ॥

[इत्युपविषशुद्धिः] ।

चणकसदृशम् । गोमूत्रैः भावयेदिति—गोमूत्रैः दोलायन्त्रे स्वेदयेदिति ॥ ३६५ ॥

अथवेत्यादौ ।—पाचितमित्यत्र त्र्यहमिति शेषः । एवं क्षीरे च पाचितमिति ॥ ३६६—३६९ ॥

अथोपविषमाह, अर्केत्यादि ।—उपविषाः,—गौणविषाः । अर्को-

अथ जैपालशुद्धिः।—

निस्तुषं जयपालञ्च द्विधा कृत्वा विचक्षणः।
एतद्वीजस्य मध्यन्तु पत्रवत् परिवर्जयेत्॥ ३७२॥
अष्टमांशेन चूर्णेन टङ्कणस्य च मेलयेत्।
केशयन्त्रे च तद्भाव्यं पाच्यं दुग्धेन संप्लुतम्।
त्रिरात्रं शुद्धिमायाति जैपालममृतोपमम्॥ ३७३॥

अथ सुहीचौरशुद्धिः।—

चिञ्चापत्ररसे कर्षं वस्त्रपूते पलद्वयम्।
सुहीचौरं रौद्रयन्त्रे भावयेद् यत्नतः सुधीः।
द्रवे शुष्के समुत्तार्य्य सर्वरोगेषु योजयेत्॥ ३७४॥

अथ जलौकाशोधनम्।—

चिरन्तनीं जलौकान्तु ताम्रपात्रेषु रक्षयेत्।
चतुर्माषं निशाचूर्णं जलाष्टकपले क्षिपेत्॥ ३७५॥
तस्मिन् क्षिपेत् जलौकां तां स्वयं लालां परित्यजेत्।
त्यक्तलाला जलौका च सा योज्या रक्तमोक्षणे॥ ३७६॥

दयश्च स्थावरविषान्तर्भूता एव। तेषां शोधनमाह,—धुस्तूरस्येति॥३७०। ३७१॥

अथ फलविषाणामन्तरे जैपालशोधनमाह, निस्तुषमित्यादि।— तुषरहितं जेपालं द्विधाकृत्य मध्यस्थ पत्रवत् द्रव्यं परित्यज्य नूतनशरावोपरि घर्षणीयं यावत् निःस्नेहतां व्रजेत्। ततोऽष्टमांशटङ्कणेन सह मिश्रीकृत्य केशयन्त्रेण भाव्यं, दुग्धेन च पाच्यमिति॥३७२।३७३॥

क्षीरविषाणां मध्ये सुहीक्षीरशोधनमाह,—चिञ्चापत्रेति॥ ३७४

रोमपृष्ठा च कपिला रक्तरेखा च दुर्बला ।
वर्जनीया विशेषेण भिषजा कीर्त्तिमिच्छता ॥ ३७७ ॥

अथ वृद्धदारकवीजशोधनम् ।—

वीजमादौ समादाय रौद्रयन्त्रे विशोषयेत् ।
ईषत्सैन्धवयुक्तेन द्रवेण यत्नतः सुधीः ।
अपामार्गस्य वा तोयैर्वार्द्धक्यवीजशोधनम् ॥ ३७८ ॥

मतान्तरम् ।—

वृद्धदारकवीजन्तु पक्वं दोलाकृतं पचेत् ।
दुग्धपूर्णेषु पात्रेषु ततः शुध्यति निश्चितम् ॥ ३७९ ॥

[इति वृद्धदारकवीजशोधनम्] ।

अथ नानावीजशोधनम् ।—

अपामार्गकषायेण निम्बुवीजं विशोधयेत् ।
मूलक्काथैः कुमार्य्याश्च जैपालवीजशोधनम् ॥ ३८० ॥
इन्द्रवारुणिकाक्काथैः राजवृक्षस्य वीजकम् ।
समूलोत्तरवारुण्या धुस्तूरवीजशोधनम् ॥ ३८१ ॥
शिग्रुकार्पासवीजानि अपामार्गस्य वीजकम् ।
घर्मेण शोधनं तेषां न दद्यात् सैन्धवं ततः ॥ ३८२ ॥

अथ जलौकाशोधनमाह,—चिरन्तनीमित्यादि । वर्जनीयजलौकामाह,—रोमपृष्ठेति ॥ ३७५ – ३७७ ॥

वृद्धदारकशोधनमाह,—वीजमित्यादि । वार्द्धक्यवीजमिति—वृद्धदारकवीजम् ॥ ३७८-३७९ ॥

तिक्ता कोषातकी दन्ती पटोली चेन्द्रवारुणी।
कटुतुम्बी देवदाली काकतुण्डी च शुध्यति ॥ ३८३ ॥
धात्रीफलरसेनैव महाकालस्य शोधनम्।
करञ्जयुग्मयोर्वीजं भृङ्गराजेन शोधयेत् ॥ ३८४ ॥
गुञ्जादिसर्ववीजानां नरमूत्रैः पटुं विना।
नारिकेलाम्बुना शोध्यं वीजं भल्लातकोद्भवम् ॥ ३८५ ॥
गुडूचीत्रिफलाक्वाथे क्षीरे चैव विशेषतः।
पक्वा च खण्डशः शुद्धं गृह्णीयात् मृदु गुग्गुलुम् ॥ ३८६ ॥

[इति विषोपविषादिशोधनम्]।

इति रसेन्द्रसारसङ्ग्रहे प्रथमोऽध्यायः। १।

अन्येषां वीजानां साधारणशोधनमाह, अपामार्गेति।—स्पष्टम्। निम्बुवीजमित्यत्र निम्बवीजमिति पाठान्तरम् ॥ ३८०—३८६ ॥

द्वितीयोऽध्यायः ।

अथ विरेकाधिकारः ।—

क्षीराब्धेरुत्थितं देवं पीतवस्त्रं चतुर्भुजम् ।
वन्दे धन्वन्तरिं भक्त्या नानागदनिसूदनम् ॥ १ ॥
प्रायशो वपुषः शुद्धिं कृत्वा देयं तदौषधम् ।
अतः पूर्वं चिकित्सायां रेचकौषधमुच्यते ॥ २ ॥

द्रव्यादीनां शोधनादिपरिव्यक्त्यनन्तरं धर्मार्थकाममोक्षाणां मूलस्य आरोग्यस्य श्रेयसो जीवितस्य च अपहन्तॄणां रोगाणामुपशमनार्थमिदानीं चिकित्साध्यायः। शिष्टाचारानुमतश्रुतिबाधितकर्त्तव्यताकं प्रारिप्सिताध्यायसमाप्तिफलकं तत्प्रतिबन्धकविघ्नविध्वंसमात्रफलकं वा स्वयङ्कृतमादिदेवधन्वन्तरिनमस्कारं शिष्यशिक्षार्थं प्राक् प्राबंधीत्। अथवा धन्वन्तरिनामोत्कीर्त्तनमेव सर्वरोगनिवारकत्वात् गरीयस्त्वाच्च नमस्कारपूर्वं तन्नाम आदौ निबध्नाति, क्षीराब्धेरित्यादि।—क्षीराब्धेरुत्थितः क्षीरसमुद्रमन्थनादमृतैः सह उत्थितः, स च धन्वन्तरिः विष्णोरवतारविशेषः, व्याधिपीड़ितानां देवानां रोगनिरासार्थं प्रजाहितार्थञ्च अनुकम्पया प्रादुर्भूतः। देवमिति—आदिदेवम्। नानागदनिसूदनमिति—चिकित्सया किंवा तन्नामस्मरणादेव व्याधयो दूरादेव पलायन्ते॥ १॥

शरीरशोधनानन्तरमौषधं प्रदेयमाशुकारित्वादत आह,—प्रायश इत्यादि॥ २॥

अथ इच्छाभेदी रसः।—

तुल्यं टङ्कणपारदं समरिचं तुल्यांशकं गन्धकं
विश्वा च द्विगुणा ततो नवगुणं जैपालचूर्णं क्षिपेत्।
गुञ्जैकप्रमितो रसो हिमजलैः संसेवितो रेचयेत्
यावन्नोष्णजलं पिवेदपि वरं पथ्यञ्च दध्योदनम् ॥ ३ ॥

प्रकारान्तरम्।—

जैपालाष्टौ द्विको गन्धस्त्रिशुण्ठी मरिचं द्विकम्।
एकः सूतः टङ्कणैको गुञ्जामात्रा वटी कृता ॥ ४ ॥
शूलव्याधिप्रभृतयः कुष्ठैकादशपित्तजाः।
भगन्दरादिहृद्रोगाः सर्वे नश्यन्ति भक्षणात् ॥ ५ ॥

अथ गदमुरारिः इच्छाभेदी।—

रसबलिगगनार्कं शुद्धतालं विषञ्च
त्रिकटुत्रिफलमेतत् टङ्कणं भृङ्गमेभिः।
सममिह जयपालोद्भूतचूर्णं विमर्द्य
द्विनिशमनिशमेतद् भृङ्गराजोत्थवारा ॥ ६ ॥

तुल्यमिति।—प्रत्येकमेकभागतुल्यं, विश्वा च द्विगुणा। तत इति—विश्वाया एकभागापेक्षया द्वैगुण्यम्; एवं जैपालचूर्णस्यापि नवगुणत्वम्। हिमजलैरिति—शिशिरजलैः ॥ ३ ॥

प्रकारान्तरमाह, जैपालेति।—जैपालस्याष्टौ भागाः, तथा गन्धकस्यापि द्वौ भागौ; एवं शुण्ठीमरिचादीनां यथोक्तौ भागौ ग्राह्यः ॥ ४।५ ॥

गदमुरारिरसे।—बलिः,—गन्धकः। गगनम्—अभ्रम्। अर्कः,—

भवति गदमुरारिः स्वेच्छया भेदकोऽयं
हरति सकलरोगान् सन्निपातानशेषान् ।
इह हि भवति पथ्यं मत्स्यमांसादि सर्वं
घृतविलुलितमस्मिन् भोजनं भूरि देयम् ॥ ७ ॥

अथ रुक्मिणो रसः ।—

अभयाचूर्णमादाय नूतनैर्जयपालकैः ।
पञ्चमांशेन मिलितैः स्नुहीदुग्धेन मर्दिता: ॥ ८ ॥
गुड़िकास्तस्य कर्त्तव्या वर्त्तुलाश्चणकप्रभाः ।
एकैकस्यास्य टङ्कस्य रेचनैश्च रसैस्तथा ॥ ९ ॥
रुक्मिणो न च दाहः स्यान्न च मूर्च्छा भ्रमः क्लमः ।
वेगतः सारयेदेषा विशेषादामनाशिनी ॥ १० ॥
निरूहेण तथा नैव तथा बिन्दुघृतेन च ।
विवृता न तथा रेच्या यथा स्याद् गुड़िकोत्तमा ॥ ११ ॥
अतिशुद्धं भवेद् देहमतिप्रबलमुत्तमम् ।
अतिरूपमतिप्रौढ़मत्यायुष्करमुत्तमम् ॥ १२ ॥
विष्टम्भे गुड़िका देया चोदरे दारुणामये ।
अधोदेशेषु सर्वेषु गुदेषु च महौषधिः ।
दीयते चीयते सामः कामकायविवर्द्धनः ॥ १३ ॥

ताम्रम् । समभिहेति ।—जैपालचूर्णस्य सर्वचूर्णसमत्वं ज्ञेयम् । एतत् सर्वमेकीकृत्य भृङ्गराजोत्थरसैः निरन्तरं दिनद्वयं घर्षणीयम् ॥ ६।७ ॥

अभयेत्यादौ पञ्चमांशेन मिलितैरिति ।—हरीतकीचूर्णात् पञ्चमांशेन मिलितैः जयपालकैः ॥ ८—१३ ॥

अथ इच्छाभेदी गुड़िका।—

पारदं गन्धकं कुर्य्यात् सौभाग्यं पिप्पलीसमम्।
समानि जयपालानि क्रियन्ते रेचनाय च।
शीतेन रेचयेत् सम्यगुष्णेनैव प्रशाम्यति ॥ १४ ॥

अन्यश्चेच्छाभेदी रसः।—

शुण्ठी मरिचसंयुक्तं रसगन्धकटङ्गणम्।
जैपालास्त्रिगुणाः प्रोक्ताः सर्वमेकत्र चूर्णयेत् ॥ १५ ॥
इच्छाभेदो द्विगुञ्जः स्यात् सितया सह दापयेत्।
यावन्तश्चुलुकाः पीतास्तावद्वारान् विरेचयेत्।
तक्रौदनं खादितव्यमिच्छाभेदी यथेच्छया ॥ १६ ॥

अथ पुष्परेचनी गुड़िका।—

देवदाली स्वर्णपुष्पं गुड़ेन गुड़िका कृता।
गुदमध्ये प्रदेयैषा पातयेच्च महागदम् ॥ १७ ॥
अधश्च साममायाति पुनः सा दीयते गुदे।
प्रक्षाल्य वारिणा चैषा वारं वारं प्रयच्छति ॥ १८ ॥
अनेन क्रमयोगेन मलमामविरेचनम्।
जायते सकलं देहं शुद्धवर्णं निरामयम् ॥ १९ ॥

इच्छाभेदिगुड़िकायाम्।—सौभाग्यं—टङ्गणक्षारम्। समानि जयपालानीति—सर्वैस्तुल्यं जैपालचूर्णमित्यर्थः। शीतेनेति—शीताचारेण ॥ १४ ॥

इच्छाभेदिरसे।—जैपालास्त्रिगुणा इति।—एकभागापेक्षया जैपालचूर्णस्य त्रैगुण्यमित्यर्थः ॥ १५।१६ ॥

पुष्परेचनी गुड़िकायाम्।—देवदाली—हस्तिघोषकः। स्वर्णपुष्पम्

अथ सर्वाङ्गसुन्दरो रसः ।—

शुद्धसूतञ्च गन्धञ्च विषञ्च जयपालकम् ।
कटुत्रयञ्च त्रिफला टङ्गणञ्च समांशकम् ॥ २० ॥
अस्य मात्रा प्रयोक्तव्या गुञ्जात्रयसमा ततः ।
सर्वेषु ज्वररोगेषु सामवाते विशेषतः ॥ २१ ॥
नाशयेत् श्वासकासञ्च अग्निमान्द्यं विशेषतः ।
ब्रह्मणा निर्मितः पूर्वं रसः सर्वाङ्गसुन्दरः ॥ २२ ॥

निषिद्धविरेचकानाह ।—

बालवृद्धकृशक्षीण-पीनसार्त्तभयार्दिताः ।
रूक्षशोषतृषायुक्ताः गर्भिणी च नवज्वरी ॥ २३ ॥
अधो गच्छति यस्यासृक् सूतिकाऽऽतङ्कपीड़िता ।
नैते विरेकयोग्याः स्युरन्येषाञ्च बलाबलम् ॥ २४ ॥
नवज्वरे च ये योगाः भेदकाः परिकीर्त्तिताः ।
ते तथैव प्रयोक्तव्याः वीक्ष्य देहबलादिकम् ॥ २५ ॥

[इति विरेकाधिकारः] ।

—आरग्वधः, तस्य फलमज्जा ग्राह्या । गुड़ेन गुड़िकेति ।—मिलित-चूर्णात् गुड़स्य द्वैगुण्यम् ॥ १७—२२ ॥

निषिद्धविरेचकानाह, बालवृद्धेति ।—बालस्य सुकुमारत्वात्, वृद्धस्य क्षीणधातुत्वात्, कृशस्य क्षीणप्राणत्वात्, भीतस्य व्याकुलमनस्त्वात्, रूक्षस्य विरेचनं ग्रहणीदूषकत्वात्, शोषिणः पुरीषस्य उपस्तम्भकत्वात्, तृष्णा-र्त्तस्य रोगवर्द्धकत्वात्, नवज्वरे अविपक्वदोषनिर्हरणैः मरणप्रसङ्गात् । एवं सर्वत्र निषिद्धम् ॥ २३—२५ ॥

अथ ज्वरचिकित्सा।—

—०*०—

नवज्वराङ्कुश:।—

क्रमेण वृद्धान् रसगन्धहिङ्गुलान्
नैकुम्भबीजान्यथ दन्तिवारिणा।
पिष्ट्वाऽस्य गुञ्जाऽभिनवज्वरापहा
जलेन चार्द्रासितया प्रयोजिता॥ १॥

हिङ्गुलेश्वरो रस:।—

तुल्यांशं मर्दयेत् खल्ले पिप्पली हिङ्गुलं विषम्।
द्विगुञ्जा मधुना देया वातज्वरनिवृत्तये॥ २॥

ज्वरधूमकेतु: रस:।—

भवेत् समं सूतसमुद्रफेन-हिङ्गुलगन्धं परिमर्द्य यत्नात्।
नवज्वरे वल्लमितं त्रिघस्रमार्द्राम्बुनाऽयं ज्वरधूमकेतु:॥३॥

मृत्युञ्जयो रस:।—

अव्यक्त: सिद्धिद: शुद्धो रोगघ्न: कीर्त्तिवर्द्धन:।
यश:प्रद: शिव: साक्षात् मृत्युञ्जयरस: स्मृत:॥ ४॥

सर्वरोगप्राधान्यात् प्रथमं ज्वरचिकित्सामाह, क्रमेणेत्यादि।—नैकुम्भबीजानि—दन्तीबीजानि। दन्तिवारिणेति।—"भाव्यद्रव्यसमं क्वाथ्यं क्वाथ्यादष्टगुणं जलम्" इत्यादिपरिभाषया दन्तीक्वाथो ग्राह्य:; तेन क्वाथेन पिष्ट्वा सप्तधा भावना कार्य्या॥ १॥

हिङ्गुलेश्वरे।—वातज्वरेति—वातप्रधानज्वरे इत्यर्थ:॥ २।

धूमकेतुरसे।—सूतादिद्रव्यचतुष्टयं समं—समभागम्। परिमर्द्य त्रिघस्रमिति—आर्द्रकरसेन त्रिदिनं परिमर्द्य धूमकेतु: भवेदित्यर्थ:॥३॥

विषस्यैकस्तथा भागो मरिचं पिप्पलीकणः ।
गन्धकस्य तथा भागो भागः स्यात् टङ्गणस्य च ॥ ५ ॥
सर्वत्र समभागः स्यात् हिङ्गुलन्तु द्विभागिकम् ।
चूर्णयेत् खल्लमध्ये तु मुद्गमानां वटीं चरेत् ॥ ६ ॥
जम्बीरस्य रसेनात्र कार्य्यं हिङ्गुलशोधनम् ।
रसश्चेत् समभागः स्यात् हिङ्गुलं नेष्यते तदा ॥ ७ ॥
गोमूत्रशोधितञ्चात्र विषं सौरविशोधितम् ।
मृत्युरूपं ज्वरं हन्ति मृत्युञ्जयरसः स्मृतः ॥ ८ ॥
मृत्युर्विनिर्जितो यस्मात् तेन मृत्युञ्जयो रसः ।
मधुना लेहनं प्रोक्तं सर्वज्वरनिवृत्तये ॥ ८ ॥
दध्युदकानुपानेन वातज्वरनिवर्हणः ।
आर्द्रकस्य रसैः पानं दारुणे सान्निपातिके ॥ १० ॥
जम्बीरद्रवयोगेन अजीर्णज्वरनाशनः ।
अजाजीगुड़संयुक्तो विषमज्वरनाशनः ॥ ११ ॥
तीव्रज्वरे महाघोरे पुरुषे यौवनान्विते ।
पूर्णमात्रा प्रदातव्या पूर्णं वटीचतुष्टयम् ॥ १२ ॥
स्त्रीबालवृद्धक्षीणेषु चार्द्धमात्रा प्रकीर्त्तिता ।
अतिवृद्धे च क्षीणे च शिशौ चाल्पवयस्यपि ॥ १३ ॥
तुर्य्यमात्रा प्रदातव्या व्यवस्थासारनिश्चिता ।
नवज्वरे महाघोरे यामैकात् नाशयेद् ध्रुवम् ॥ १४ ॥

मृत्युञ्जयरसे—पिप्पलीकणा इति षष्ठीसमासः, न तु कणः जीरकम् । यदाह सोमेश्वरः,—"विषस्यैकं तथा भागं पिप्पल्या मरिचस्य च । गन्ध-

मध्यज्वरे तथा जीर्णे त्रिरात्रात् नाशयेद् ध्रुवम्।
सप्ताहात् सन्निपातोत्थं ज्वराजीर्णकसंज्ञकम् ॥ १५ ॥

जयावटी।—

विषं त्रिकटुकं मुस्तं हरिद्रा निम्बपत्रकम्।
विड़ङ्गमष्टमं चूर्णं छागमूत्रैः समं समम्।
चणकाभा वटी कार्य्या स्यात् जया योगवाहिका ॥ १६ ॥

जयन्ती वटिका।—

विषं पाठाऽश्वगन्धा च वचा तालीशपत्रकम्।
मरिचं पिप्पली निम्बमजामूत्रेण तुल्यकम्।
वटिका पूर्ववत् कार्य्या जयन्ती योगवाहिका ॥ १७ ॥

जया-जयन्ती-वटीप्रयोगविधिः।—

जयन्ती वा जया वाऽथ चीरैः पित्तज्वरापहा।
मुद्गामलकयूषेण पथ्यं देयं घृतं विना ॥ १८ ॥
जयन्ती वा जया वाऽथ सक्षौद्रमरिचान्विता।
सन्निपातज्वरं हन्ति रसश्चानन्दभैरवः ॥ १९ ॥
जयन्ती वा जया वाऽथ विषमज्वरनुद् घृतैः।
सर्वज्वरं मधुव्योषैः गवां मूत्रेण शीतकम् ॥ २० ॥
चन्दनस्य कषायेण रक्तपित्तज्वरापहा।

कस्य तथा भागं भागं स्यात् टङ्गणस्य च। सर्वत्र समभागं स्यात् हिङ्गुलन्तु द्विभागिकम् ॥" इत्यादि ॥ ४—१५ ॥

जयावटिकायाम्।—जयन्तीमूलचूर्णं तुल्यांशं देयं, योगवाहिकत्वात्; एवं जयन्तीवटिकायामपि ॥ १६।१७ ॥

जयन्ती वा जया वाऽथ माक्षिकेण च कामजित् ॥ २१ ॥
जयन्ती वा जया चौरैः पाण्डुशोथविनाशिनी ।
जयन्ती वा जया वाऽथ तण्डुलोदकपानतः ॥ २२ ॥
अश्मरीं हन्ति नो चित्रं मूत्रकृच्छ्रन्तु दारुणम् ।
जयन्तीं वा जयां वाऽथ गोमूत्रेण युतां पिबेत् ॥ २३ ॥
हन्त्याशु काकणं कुष्ठं सुलेपेन च तद् द्रुतम् ।
द्विनिष्कं केतकीमूलं पिष्ट्वा तोयेन पाययेत् ॥ २४ ॥
जयन्ती वा जया वाऽथ मेहं हन्ति सुराह्वयम् ।
जयन्ती वा जया वाऽथ मधुना मेहजित् भवेत् ॥ २५ ॥
लोध्रमुस्ताऽभयातुल्यं कट्फलञ्च जलैः सह ।
क्वाथयित्वा पिबेच्चानु मधुना सर्वमेहजित् ॥ २६ ॥
जयन्तीं वा जयां वाऽथ गुड़ैः कोष्णजलैः पिबेत् ।
त्रिदोषोत्थं हरेत् गुल्मं रसस्यानन्दभैरवः ॥ २७ ॥
जयन्ती वा जया हन्ति शुण्ठ्या सर्वं भगन्दरम् ।
जयन्ती वा जया वाऽथ तक्रेण ग्रहणीप्रणुत् ॥ २८ ॥
जयन्ती वा जया वाऽथ रसस्यानन्दभैरवः ।
रक्तपित्ते त्रिदोषोत्थे शीततोयेन पाययेत् ॥ २९ ॥
जयन्ती वा जया वाऽथ भृङ्गद्रावैर्निशान्ध्यनुत् ।
जयन्तीं वा जयां वाऽथ घृष्ट्वा स्तन्येन चाञ्जयेत् ।
स्रावणं सर्वदोषोत्थं मांसवृद्धिञ्च नाशयेत् ॥ ३० ॥

भस्मेश्वरयोगः ।—

भस्म षोड़शनिष्कं स्यादारण्योपलकोद्भवम् ।

निष्कत्रयञ्च मरिचं विषनिष्कञ्च चूर्णयेत्॥ ३१॥
अयं भस्मेश्वरो नाम सन्निपातनिकृन्तनः।
पञ्चगुञ्जामितं खादेदार्द्रकस्य रसेन तु॥ ३२॥

स्वच्छन्दभैरवरसः।—

ताम्रभस्म विषं हेम्नः शतधा भावितं रसैः।
गुञ्जाद्धं सन्निपातादि-नवज्वरहरं परम्॥ ३३॥
आर्द्राम्बुशर्करासिन्धु-युतः स्वच्छन्दभैरवः।
इक्षुद्राक्षासिताश्चापि दधि पथ्यं रुचौ ददेत्॥ ३४॥

ज्वरमुरारिरसः।—

हिङ्गुलञ्च विषं व्योषं टङ्कणं नागराभये।
जयपालसमायुक्तं सद्यो ज्वरविनाशनम्॥ ३५॥

नवज्वरेभाङ्कुशः।—

सगन्धटङ्कं रसतालकञ्च विमर्दितं भावय मीनपित्तैः।
दिनत्रयं वल्लमितं प्रदद्यात् वृन्ताकतक्रौदनमेव पथ्यम्।
नवज्वरेभाङ्कुशनामधेयः क्षणेन घर्मोद्गममातनोति॥ ३६॥

त्रैलोक्यडम्बररसः।—

सूतार्कगन्धचपलाजयपालतिक्ता
पथ्या त्रिवृच्च विषतिन्दुकजं समांशम्।
संमर्द्य वह्निपयसा मधुना द्विगुञ्जः
त्रैलोक्यडम्बररसोऽभिनवज्वरघ्नः॥ ३७॥

स्वच्छन्दभैरवरसे।—हेम्न इति धुस्तूरस्य॥ १८—३४॥

ज्वरमुरारिरसे।—सर्वचूर्णसमं जयपालचूर्णम्; सर्वं पिष्ट्वा कलायप्रमाणा वटी कार्य्या॥ ३५।३६॥

प्रतापमार्त्तण्डरसः ।—

विषहिङ्गुलजैपाल-टङ्कणं क्रमवर्द्धितम् ।
रसः प्रतापमार्त्तण्डः सद्यो ज्वरविनाशनः ॥ ३८ ॥

तरुणज्वरारिरसः ।—

जैपालगन्धं विषपारदञ्च तुल्यं कुमारीस्वरसेन पिष्टम् ।
अस्य द्विगुञ्जा हि सितोदकेन ख्यातो रसोऽयं तरुणज्वरारिः ॥ ३९ ॥
दातव्य एषोऽहनि पञ्चमे वा षष्ठेऽथवा सप्तम एव वाऽपि ।
जाते विरेके विजितो ज्वरः स्यात् पटोलमुद्गाम्बुनिषेवणेन ॥ ४० ॥

गदमुरारिः ।—

रसबलिशिललौहव्योषताम्राणि तुल्या-
न्यथ सदरदनागाभ्याञ्च भागः प्रदिष्टः ।
भवति गदमुरारिश्चास्य गुञ्जाद्वयं वै
क्षपयति दिवसेन प्रौढ़मामज्वराख्यम् ॥ ४१ ॥

विद्याधररसः ।—

रसो गन्धस्ताम्रस्त्रिकटुकटुकीटङ्कणवरा-
विवृद्दन्ती हेम द्युमणिविषमेतत्समिदम् ।

त्रैलोक्यडम्बररसे ।—अर्कः,—ताम्रं, चपला—पिप्पली, तिक्ता—कटुकी, विषतिन्दुकजं—मधुरतिन्दुकफलम् ॥ ३७ ॥

तरुणज्वरारिरसे ।—तुल्यमिति—सर्वं समभागं, न तु स्वरसेन तुल्यम् ॥ ३८—४० ॥

गदमुरारिरसे ।—शिलं—मनःशिला, छान्दसत्वात् ह्रस्वः । नागं—सीसकम् ॥ ४१ ॥

समस्तैस्तुल्यं स्याद्विमलजयपालोद्भवरज:
तत: स्नुक्क्षीरेण प्रचुरमृदितं दन्तिसलिलै: ॥ ४२ ॥
द्विगुञ्जाऽस्य प्रौढ़ं जयति वटिका साममतुलं
ज्वरं पाण्डुं गुल्मं ग्रहणिगुदकीलोद्भवरुज:।
मरुच्छूलाजीर्णं प्रबलमथ सामं क्रिमिगदं
विबन्धं प्लीहानं प्रबलमपि विद्याधररस: ॥ ४३ ॥

अमृतमञ्जरी।—

हिङ्गुलं मरिचं टङ्कं पिप्पली विषमेव च।
जातीकोषं समं सर्वं जम्बीराद्भिर्विमर्दितम् ॥ ४४ ॥
गुञ्जाद्वयं त्रयं वाऽपि देयञ्च सान्निपातिके।
कासश्वासौ जयत्याशु सर्वज्वरविनाशन: ॥ ४५ ॥

महाज्वराङ्कुश:।—

सूतं गन्धं विषं तुल्यं धूर्त्तवीजं त्रिभि: समम्।
चतुर्णां द्विगुणं व्योष-चूर्णं गुञ्जाद्वयं हितम् ॥ ४६ ॥
जम्बीरस्य च मज्जाभिरार्द्रकस्य रसैर्युतम्।
महाज्वराङ्कुशो नाम ज्वराष्टकनिसूदन: ॥ ४७ ॥
ऐकाहिकं द्व्याहिकं वा त्र्याहिकञ्च चतुर्थकम्।
विषमञ्च त्रिदोषोत्थं हन्ति सर्वं न संशय: ॥ ४८ ॥

विद्याधररसे।—वरा—त्रिफला, हेम—धुस्तूरवीजं, द्युमणि:,—अर्क-मूलं, विमलजयपालोद्भवरज इति—शोधितजयपालवीजचूर्णम्। "प्रचुर-मृदितम्" इत्यत्र "त्रिदिनमृदितम्" इति पाठान्तरम् ॥ ४२—४५ ॥

महाज्वराङ्कुशे।—व्योषचूर्णमिति—मिलितत्रिकटुचूर्णं सर्वापेक्षया द्विगुणम् ॥ ४६—४८ ॥

ज्वरकेशरिका ।—

शुद्धसूतं विषं व्योषं गन्धं त्रैफलमेव च ।
जयपालं समं कुर्य्याद् भृङ्गतोयेन मर्दयेत् ॥ ४९ ॥
वटिकां गुञ्जमात्रान्तु कृत्वा वैद्यः प्रयत्नतः ।
प्रमाणं सर्षपाकारं बालानाञ्च प्रशस्यते ॥ ५० ॥
नारिकेलाम्बुना वाऽपि सर्वज्वरविनाशिनी ।
नारिकेलजलं शस्तं कर्षत्रयं पिबेदनु ॥ ५१ ॥
सितया च समं पीता पित्तज्वरविनाशिनी ।
मरिचेन च पीता सा सन्निपातज्वरं जयेत् ॥ ५२ ॥
पिप्पलीजीरकाभ्यान्तु दाहज्वरविनाशिनी ।
विषमज्वरभूतोत्थं ज्वरं प्लीहानमेव च ॥ ५३ ॥
अग्निमान्द्यमजीर्णञ्च श्वयथुञ्च सुदारुणम् ।
शूलाजीर्णं तथा गुल्मं कुष्ठाष्टादश पित्तजान् ।
ज्वरकेशरिका ख्याता तरुणज्वरनाशिनी ॥ ५४ ॥

नवज्वरेभसिंहः ।—

शुद्धसूतं तथा गन्धं लौहं ताम्रञ्च सीसकम् ।
मरिचं पिप्पली विश्वं समभागं विचूर्णयेत् ॥ ५५ ॥
अर्द्धभागं विषं दद्यात् मर्दयेत् वासरद्वयम् ।
शृङ्गबेरानुपानेन दद्यात् गुञ्जाद्वयं भिषक् ॥ ५६ ॥
नवज्वरे महाघोरे वातसङ्ग्रहणीगदे ।
नवज्वरेभसिंहोऽयं सर्वरोगे प्रयोजयेत् ॥ ५७ ॥

ज्वरकेशरिकायाम् ।—त्रैफलमिति—त्रिफलाचूर्णम् ॥ ४९—५४ ॥
नवज्वरेभसिंहे ।—विश्वं—शुण्ठीचूर्णम् ॥ ५५—५७ ॥

अथ निरामज्वरे।—

उदकमञ्जरीरसः।—

सूतो गन्धष्टङ्गणः सोषणः स्यादेतैस्तुल्या शर्करा मत्स्यपित्तैः।
भूयो भूयो भावयेत्तु त्रिरात्रं वल्लो देयः शृङ्गबेरस्य वारा॥ ५८॥
सम्यक् तापे वारिभक्तं सतक्रं वृन्ताकाढ्यं पथ्यमेतत् प्रदिष्टम्।
आशुं रोगं हन्ति सामं प्रभावात् पित्ताधिक्ये मूर्ध्नि वारिप्रयोगः॥ ५९

चन्द्रशेखरो रसः।—

विहाय शर्करां यदा प्रदीयते मनःशिला।
तदा निरामकज्वरारिरेष चन्द्रशेखरः॥ ६०॥

पञ्चवक्त्ररसः।—

रसो गन्धकष्टङ्गणः सोषणोऽयं फणी पिप्पलीत्येष धुस्तूरपिष्टः।
जयेत् सन्निपातं द्विगुञ्जाऽनुपानं भवेदर्कमूलाम्बु सव्योषचूर्णम्॥ ६१

पर्पटरसः।—

शुद्धसूतं द्विधा गन्धं मर्द्यं भृङ्गरसेन च।
मृतं ताम्रं लौहभस्म पादांशेन तयोः क्षिपेत्॥ ६२॥
लौहपात्रे च विपचेत् चालयेत् लौहचाटुना।
तत् क्षिपेत् कदलीपत्रे गोमयोपरिसंस्थिते॥ ६३॥

उदकमञ्जरीरसे।—ऊषणं,—मरिचं, शर्करा—विषम्; तच्च सर्वद्रव्यसमम्। त्रिरात्रमिति—चतुर्विंशतिप्रहरपर्य्यन्तं, शृङ्गबेरस्य वारा—आर्द्रकरसेन, वृन्ताकः,—वार्त्ताकुफलम्॥ ५८—६०॥

पञ्चवक्त्ररसे।—धुस्तूरपिष्ट इति—धुस्तूररसैः पिष्टः॥ ६१॥

पश्चात् सञ्चूर्णयेत् खल्ले निर्गुण्ड्या भावयेद्दिनम् ।
जयन्तीत्रिफलाकन्या-वासाभार्गीकटुत्रिकैः ॥ ६४ ॥
भृङ्गाग्निमूलमुण्डीभिर्भावयेत् दिनसप्तकम् ।
अङ्गारैः स्वेदयेत् किञ्चित् पर्पटाख्यो महारसः ॥ ६५ ॥
चतुर्गुञ्जामितो भक्ष्यः सम्यक् श्लेषज्वरं हरेत् ।
पथ्याशुण्ठ्यमृताक्काथमनुपानं प्रयोजयेत् ॥ ६६ ॥

वातपित्तान्तकरसः ।—

मृतसूताभ्रमुस्तार्क-तीक्ष्णमाक्षिकतालकम् ।
गन्धकं मर्दयेत् तुल्यं यष्टिद्राक्षाऽमृतारसैः ॥ ६७ ॥
धात्रीशतावरीद्रावैः द्रवैः क्षीरविदारिजैः ।
दिनं दिनं विभाव्याथ सिताक्षौद्रयुता वटी ॥ ६८ ॥
माषमात्रं निहन्त्याशु वातपित्तज्वरं क्षयम् ।
दाहं तृषां भ्रमं शोषं वातपित्तान्तको रसः ।
सिताक्षीरं पिबेच्चानु यष्टिक्काथं सितायुतम् ॥ ६९ ॥

विश्वेश्वररसः ।—

मृतसूतार्कतीक्ष्णाभ्र तालं गन्धञ्च कट्फलम् ।
मेषशृङ्गी वचा शुण्ठी भार्गी पथ्या च बालकम् ॥ ७० ॥
धन्याकं मर्दयेत् तुल्यं पर्पटोत्थद्रवैर्दिनम् ।
मद्यं माषं लिहेत् क्षौद्रैः कफपित्तमदात्यये ॥ ७१ ॥
रसो विश्वेश्वरो नाम प्रोक्तो नागार्जुनेन च ।
काकमाचीरसं चानु सैन्धवेन युतं पिबेत् ॥ ७२ ॥

पर्पटरसे ।—तयोरिति—रसगन्धकयोः ॥ ६२—६६ ॥

वातपित्तान्तकरसे ।—तीक्ष्णं—लौहं, तालकं- हरितालम् ॥ ६७—७२ ॥

शीतारिरसः ।—

पारदं गन्धकं शुद्धं टङ्कणञ्च समं समम् ।
पारदात् द्विगुणं देयं जैपालं तुषवर्जितम् ॥ ७३ ॥
सैन्धवं मरिचं चिञ्चा-त्वग्भस्म शर्कराऽपि च ।
प्रत्येकं सूतकं तुल्यं जम्बीरैर्मर्दयेत् दिनम् ॥ ७४ ॥
द्विगुञ्जस्तप्ततोयेन वातश्लेष्मज्वरापहः ।
रसः शीतारिनामायं शीतज्वरहरः परः ॥ ७५ ॥

चिन्तामणिरसः ।—

रसविषगन्धकटङ्कणताम्रयवक्षारकञ्च सव्योषम् ।
तालकफलत्रयञ्च क्षौद्रं दत्त्वा शतं वारान् ॥ ७६ ॥
संमर्द्य रक्तिविमिता वटिका कार्य्या भिषग्वरैः प्राज्ञैः ।
शुण्ठीपिष्टेन समं चैकां द्वे वाऽथवा तिस्रः ॥ ७७ ॥
संप्राश्य नारिकेलज-जलमनुपेयञ्च विमलमतिमद्भिः ।
सैन्धवजीरकसहितं तक्रं पथ्यं प्रयोक्तव्यम् ॥ ७८ ॥
प्रशमयति सन्निपात-ज्वरं तथा जीर्णकज्वरं विविधम् ।
प्लीहानं चाध्मानं कासं श्वासं वह्निमान्द्यम् ।
चिन्तामणी रसोऽयं किल स्वयं भैरवेण निर्दिष्टः ॥ ७९ ॥

चिन्तामणिरसः (प्रकारभेदेन) ।—

रसं गन्धं विषं लौहं धूर्त्तवीजन्तु तत्समम् ।
द्वौ भागौ ताम्रवह्निञ्च व्योषचूर्णञ्च तत्समम् ॥ ८० ॥

शीतारिरसे ।—शर्करा—विषम् ॥ ७३—७५ ॥

चिन्तामणिरसे ।—व्योषं—त्रिकटुकं, फलत्रयं—त्रिफला ॥७६—७९॥

जम्बीरस्य च मज्जाभिरार्द्रकस्य रसैर्युतम् ।
अस्यानुपानेन वटी ज्वरे देया प्रयत्नतः ॥ ८१ ॥
गुञ्जाद्वयां वटीं खादेत् सद्यो ज्वरविनाशिनाम् ।
वातिकं पैत्तिकञ्चापि श्लैष्मिकं सान्निपातिकम् ॥ ८२ ॥
ऐकाहिकं द्व्याहिकञ्च चातुर्थकविपर्य्ययम् ।
असाध्यञ्चापि साध्यञ्च ज्वरञ्चैवातिदुस्तरम् ॥ ८३ ॥
अग्निमान्द्येऽप्यजीर्णे च आध्मानेऽनिलसम्भवे ।
अतिसारे च्छर्दिते च अरोचकनिपीड़िते ॥ ८४ ॥
ज्वरान् सर्वान् निहन्त्याशु भास्करस्तिमिरं यथा ।
चिन्तामणिरसो नाम सर्वज्वरकुलान्तकः ॥ ८५ ॥

अथ सन्निपातज्वरे ।—

कुलबधूरसः ।—

शुद्धसूतं मृतं ताम्रं मृतं नागं मनःशिला ।
तुत्थकं तस्य तुल्यांशं दिनमेकं विमर्दयेत् ॥ ८६ ॥
द्रवैश्चोत्तरवारुण्याश्चणमात्रा वटी कृता ।
सन्निपातं निहन्त्याशु नस्यमात्रेण दारुणम् ।
एषा कुलब नाम जले घृष्ट्वा प्रयोजयेत् ॥ ८७ ॥

अन्यचिन्तामणिरसे ।—"धूर्त्तबीजन्तु तत्समम्" इति—मिलितसर्व-चूर्णसमं धुस्तूरबीजम् ॥ ८०—८५ ॥

कुलबधूरसे ।—तस्य तुल्यांशमिति—एकभागतुल्यम् । यद्यपि नस्य-मित्युक्तं तथाऽपि अत्र अञ्जनेन व्यवहरन्ति वृद्धाः ॥ ८६।८७ ॥

जयमङ्गलरसः।—

भस्मसूताभ्रकं तारं मुण्डतीक्ष्णालमाक्षिकम्।
वह्निटङ्गणकव्योषं समं संमर्दयेत् दिनम्॥ ८८॥
पाठानिर्गुण्डिकायष्टि-विल्वमूलकषायकैः।
ततो मूषागतं रुद्ध्वा विपचेद् भूधरे पुटे॥ ८९॥
माषैकं दशमूलस्य कषायेण प्रयोजयेत्।
अञ्जनेनाथवा नस्यात् सन्निपातं जयेद् ध्रुवम्॥ ९०॥

नस्यभैरवरसः।—

मृतसूतार्कतीक्ष्णाग्निं टङ्गणं खर्परं समम्।
सव्योषमर्कदुग्धेन दिनञ्च मर्दयेत् दृढ़म्।
अर्कक्षीरयुतं नस्यं सन्निपातहरं परम्॥ ९१॥

अञ्जनभैरवरसः।—

सूततीक्ष्णकणागन्धमेकांशं जयपालकम्।
सर्वैस्त्रिगुणितं जम्बू-वारिणा च सुपेषितम्।
नेत्राञ्जनेन हन्त्याशु सर्वोपद्रवमुद्धतम्॥ ९२॥

अञ्जनो रसः।—

गन्धेशं लशुनाम्भोभिर्मर्दयेद् याममात्रकम्।
तस्योदकेन संयुक्तं नस्यं तत् प्रतिबोधकृत्।
मरिचेन समायुक्तं हन्ति तन्द्राप्रलापकान्॥ ९३॥

जयमङ्गले।—वह्निः,—चित्रकः॥ ८८—९१॥
अञ्जनभैरवे।—एकांशमिति—प्रत्येकमेकांशम्॥ ९२॥
अञ्जनरसे।—ईशं,—पारदम्॥ ९३॥

अञ्जनो रसः (प्रकारभेदेन) ।—

वाह्लीकं रसकं तुत्थं कर्पूरं मृतशुल्वकम् ।
कासमर्द्दरसैर्मर्द्यं दिनार्द्धं वटकीकृतम् ।
अञ्जनं ज्वरदाहघ्नं सर्वदोषनिसूदनम् ॥ ९४ ॥

त्रैलोक्यसुन्दरः रसः ।—

रसगन्धकयोर्माषौ प्रत्येकं कज्जलीकृतौ ।
शक्रश्च मुषली चैव धुस्तूरं केशराजकम् ॥ ९५ ॥
देवदाली जयन्ती च तथा मण्डूकपर्णिका ।
एषां पत्ररसैः शाणैः शिलायां खल्लयेत् पुनः ॥ ९६ ॥
शोषयित्वा वटी कार्य्या त्वेनका राजिकोपमा ।
त्रिदोषजं ज्वरं हन्ति तथा प्रबलकोष्ठकम् ॥ ९७ ॥
तप्ते तु नारिकेलस्य जलं देयं प्रयत्नतः ।
यदा वटी न कार्य्या तु तदा खाद्या तु रक्तिका ।
त्रैलोक्यसुन्दरो नाम सन्निपातहरो रसः ॥ ९८ ॥

अन्यस्वच्छन्दभैरवरसः ।—

रसगन्धकयोः शाणं प्रत्येकं कज्जलीकृतम् ।
सुवर्णमाक्षिकं शाणं शुद्धञ्चैकत्र कारयेत् ॥ ९९ ॥
रुद्रजटा निसिन्धुश्च नागदाऽऽमलकी तथा ।
विषकण्टालिका चैषां स्वरसं शाणमात्रकम् ॥ १०० ॥

अन्याञ्जनरसे ।—वाह्लीकं—हिङ्गु, रसकं—स्फटिकारिः "फटकिरी" इति लोके । कासमर्दः,—"काल्कासुन्दा" इति ख्यातः क्षुपविशेषः ॥९४॥

त्रैलोक्यसुन्दररसे ।—शक्रः,—कुटजः ; देवदाली—हस्तिघोषकः ; शाणैः,—अर्द्धतोलकमितैः, राजिकोपमा—सर्षपप्रमाणा ॥ ९५—९८ ॥

दत्त्वा संशोध्य संमर्द्य कार्य्या मुद्गसमा वटी।
आर्द्रकस्य रसैः पेया जीरकञ्चानु भक्षयेत् ॥ १०१ ॥
स्वच्छन्दभैरवाख्योऽयं सन्निपातौघरहृत् मतः।
ग्रहणीसूतिकाऽऽतङ्कं नाशयेदविचारतः ॥ १०२ ॥

अथ शीताङ्गसन्निपातलक्षणम्।—

शीतं शरीरं शीताङ्गे छर्द्यतीसारकम्पनम्।
क्षुद्विघातोऽङ्गमर्दश्च हिक्का श्वासः क्लमो वमिः।
सर्वाङ्गशिथिलत्वञ्च सन्निपाते प्रजायते ॥ १०३ ॥

आनन्दभैरवो रसः।—

हिङ्गुलञ्च विषं व्योषं मरिचं टङ्कणं कणा।
जातीकोषसमं चूर्णं जम्बीरद्रवमर्दितम्।
रक्तिमानां वटीं कुर्य्यात् खादेदार्द्रकसंयुताम् ॥ १०४ ॥
वटीद्वयं त्रयं वाऽपि सन्निपाते सुदारुणे।
ज्वरमष्टविधं हन्ति तथाऽतीसारनाशनः ॥ १०५ ॥

अन्यस्वच्छन्दभैरवरसे।—निसिन्धुः,—निर्गुण्डी, नागदा—हरीतकी, विषकण्टालिका—विषकाँटालीति ख्याता। "नागदाऽऽमलकी" इत्यत्र "बला मदनकं" तथा "नागं दमनकम्" इति पाठान्तरद्वयं दृश्यते ॥ ९९–१०२ ॥

शीतमिति।—वक्ष्यमाणानन्दभैरवीवटिकायां "शीताङ्गसन्निपात" इत्युक्तं, किन्तु रोगविनिश्चयसंग्रहे शीताङ्गसन्निपातलक्षणं नोक्तं, तस्मादत्र तल्लक्षणमाह,—शीतं शरीरमित्यादि। "क्लमो वमिः" इत्यत्र "भ्रमोऽरतिः" इति पाठान्तरम् ॥ १०३ ॥

आनन्दभैरवरसे।—व्योषं—त्रिकटकम्; कणा—पिप्पली। अत्र

जीर्णज्वरहरश्चैव तथा सर्वाङ्गभेदकः ।
आमवातादिरोगञ्च नाशयेदविकल्पतः ॥ १०६ ॥

आनन्दभैरवो वटिका ।—

विषं त्रिकटुकं गन्धं टङ्कणं मृतशुल्वकम् ।
धुस्तूरस्य च वीजानि हिङ्गुलं नवमं स्मृतम् ॥ १०७ ॥
एतानि समभागानि दिनैकं विजयाद्रवैः ।
मर्दयेत् चणकाभान्तु वटीञ्चानन्दभैरवीम् ॥ १०८ ॥
भक्षयेच्च पिबेच्चानु रविमूलकषायकम् ।
सव्योषं हन्ति नो चित्रं सन्निपातं सुदारुणम् ।
शीताङ्गे सन्निपाते वा सामान्ये वा त्रिदोषजे ॥ १०९ ॥
धन्याकपिप्पलीशुण्ठी-कटुकीकण्टकारिका- ।
पिप्पलीसंयुतं क्वाथं चतुर्गुञ्जा च पर्पटी ॥ ११० ॥
सन्निपातज्वरं हन्ति वटिकाऽऽनन्दभैरवी ।
मूलञ्च कटुरोहिण्याः समं विल्वं सजीरकम् ॥ १११ ॥
दध्ना पिष्टं पिबेच्चानु वटीं चानन्दभैरवीम् ।
सन्निपातातीसारघ्नीं पथ्यं शाकविवर्जितम् ॥ ११२ ॥
आनन्दभैरवीं पीत्वा क्वाथं वरुणसम्भवम् ।
पाययेदश्मरीं हन्ति सप्तरात्रात् न संशयः ॥ ११३ ॥

पिप्पल्या भागद्वयं, व्योषमध्ये पठितत्वात् पृथगुपादानाच्च ; एवं मरिचस्यापि ॥ १०४—१०६ ॥

आनन्दभैरवीवटिकायाम् ।—विजया—जयन्ती, त्रैलोक्यविजयेति केचित् । रविमूलकषायकम्—अर्कमूलक्वाथम् । कटुरोहिण्या मूलं—

वागुजीसम्भवैस्तैलैर्वटोऽप्यानन्दभैरवीम्।
लेहयेत् निष्कमात्रान्तु गलत्कुष्ठञ्च नाशयेत्॥ ११४॥
दधिमस्तुसिताक्षौद्रैः वटीञ्चानन्दभैरवीम्।
भक्षयेत् मूत्रकृच्छ्रार्त्तो यवक्षारं सिताऽन्वितम्॥ ११५॥
गोदुग्धं क्वथितञ्चानु शीतलं मधुना पिबेत्।
गुञ्जामूलं पिबेत् क्षीरैरनुपानं प्रशस्यते॥ ११६॥
अनेन चानुपानेन वटिकाऽऽनन्दभैरवी।
देया रुद्रजटाक्षौद्रैः सर्वमेहप्रशान्तये॥ ११७॥

प्राणेश्वरो रसः।—

शुद्धसूतं तथा गन्धं सूतार्द्धं विषसंयुतम्।
समं तत् मर्दयेत् ताल-मूलीनीरैस्त्र्यहं बुधः॥ ११८॥
पूरयेत् कूपिकाऽन्तश्च सन्निरुध्य विशोषयेत्।
सप्तभिर्मृत्तिकावस्त्रैर्वेष्टयित्वा तु शोधयेत्॥ ११९॥
पुटेत् कुम्भीप्रमाणेन स्वाङ्गशीतं समुद्धरेत्।
गृहीत्वा कूपिकायाश्च मर्दयेच्च दिनं ततः॥ १२०॥
अजाजी जीरकं हिङ्गु-सर्जिकाटङ्गणैर्युतम्।
गुग्गुलुः पञ्चलवणं यवक्षारो यमानिका॥ १२१॥
मरिचं पिप्पली चैव प्रत्येकञ्च समांशतः।
एषां कषायेण पुनर्भावयेत् सप्तधाऽऽतपे॥ १२२॥

कटुकीमूलम्। अन्तर्भावितण्यर्थत्वात् "पीत्वा" इत्यत्र "पाययित्वा" इति बोध्यम्। वागुजी—हाकुचीति ख्याता, सोमराजीति केचित्। रुद्र-जटा—स्वनामख्याता॥ १०७—११७॥

नागवल्लीदलयुतं पञ्चगुञ्जं रसेश्वरम् ।
दद्यात् नवज्वरे तीव्रे कोष्णं वारि पिबेदनु ॥ १२३ ॥
प्राणेश्वररसो नाम्ना सन्निपातप्रकोपजित् ।
शीतज्वरे दाहपूर्वे गुल्मे शूले त्रिदोषजे ॥ १२४ ॥
वाञ्छितं भोजनं दद्यात् कुर्य्याच्चन्दनलेपनम् ।
तापोद्रेकप्रशमनो नानाऽतीसारनाशनः ।
भवेच्च नात्र सन्देहः स्वास्थ्यञ्च लभते नरः ॥ १२५ ॥

सन्निपातभैरवरसः ।—

ताम्रं गन्धं रसं श्वेत-गुञ्जामरिचपूतनाः ।
समीनपित्तजैपालान् तुल्यानेकत्र मर्दयेत् ॥ १२६ ॥
गुञ्जाचतुष्टयञ्चास्य नवज्वरहरं परम् ।
ज्वराङ्कुशः सन्निपात-भैरवोऽयं प्रकाशितः ॥ १२७ ॥

शीतभञ्जीरसः ।—

रसो हिङ्गुलगन्धश्च जैपालं सम्मितं त्रिभिः ।
दन्तीक्वाथेन संमर्द्य रसो ज्वरहरः परः ॥ १२८ ॥
आर्द्रकस्य रसेनैव दापयेद्रक्तिकाद्वयम् ।
नवज्वरं महाघोरं नाशयेद् याममात्रतः ॥ १२९ ॥

प्राणेश्वररसे ।—कूपिका—काचकूपिका ; तस्या अन्तः,—मध्ये ; प्रत्येकञ्च समांशत इति ।—अजाज्यादिद्रव्यं प्रत्येकं सूततुल्यम् ॥११८–१२५॥

सन्निपातभैरवे ।—पूतना—हरीतकी ; मीनपित्तं—मत्स्यपित्तम् ॥ १२६।१२७ ॥

शीतभञ्जीरसमाह, रस इत्यादि ।—रसादिगन्धान्तैस्त्रिभिस्तुल्यं

शर्कारादधिभक्तञ्च पथ्यं देयं प्रयत्नतः।
शीततोयं पिबेच्चानु इक्षुमुद्गरसो हितः।
शीतभञ्जीरसो नाम सर्वज्वरकुलान्तकः॥ १३० ॥

उन्मत्तरसः।—

रसं गन्धञ्च तुल्यांशं धुस्तूरफलजैर्द्रवैः।
मर्दयेत् दिनमेकन्तु तुल्यं त्रिकटुकं क्षिपेत्॥ १३१ ॥
उन्मत्ताख्यो रसो नाम नस्ये स्यात् सन्निपातजित्।
सन्निपातार्णवे मग्नं योऽभ्युद्धरति रोगिणम्।
कस्तेन न कृतो धर्मः? काञ्च पूजां न सोऽर्हति?॥ १३२ ॥

मृतसञ्जीवनी रसः।—

म्लेच्छस्य भागाश्चत्वारो जैपालस्य त्रयो मताः।
द्वौ भागौ टङ्कणस्यैव भागैकममृतस्य च॥ १३३ ॥
तत्सर्वं मर्दयेत् श्लक्ष्णं शुष्कं यामं भिषग्वरः।
शृङ्गबेराम्बुना देयो व्योषचित्रकसैन्धवैः॥ १३४ ॥
माषद्वयमितस्तापं हरत्येष विनिश्चयः।
घनसारेण सारेण चन्दनेन विलेपनम्॥ १३५ ॥
विदध्यात् कांस्यपात्रे च सेचयेद्रोगिणं भिषक्।
शाल्यन्नं तक्रसहितं भोजयेदिक्षुसंयुतम्॥ १३६ ॥

जैपालं, रसादित्रयाणां त्रयो भागाः। "जैपालञ्च समं समम्" इति तन्त्रान्तरे पठ्यते॥ १२८—१३०॥

उन्मत्तरसे।—तुल्यं त्रिकटुकमिति।—त्रिकटुचूर्णं प्रत्येकं रसतुल्यं प्रदातव्यम्॥ १३१।१३२॥

मृतसञ्जीवनरसमाह, म्लेच्छस्येत्यादि।—म्लेच्छः—ताम्रस्य; अमृतस्य

सन्निपाते महाघोरे त्रिदोषे विषमज्वरे ।
आमवाते वातशूले गुल्मे प्लीह्नि जलोदरे ॥ १३७ ॥
शीतपूर्वे दाहपूर्वे विषमे सततज्वरे ।
अग्निमान्द्ये च वाते च प्रयोज्योऽयं रसेश्वरः ।
मृतसञ्जीवनो नाम विख्यातोऽयं रसायने ॥ १३८ ॥

स्वल्पबड़वानलरसः ।—

शुद्धताम्रस्य भागैकं मरिचस्य तथैव च ।
विषं तत्तुल्यकं दद्यात् तत्सर्वं श्लक्ष्णचूर्णितम् ॥ १३९ ॥
लाङ्गलीरससंयुक्तं तत्सर्वं पुटके पचेत् ।
रक्तिकाद्वितयं वाऽपि त्रितयं वा प्रकल्पयेत् ॥ १४० ॥
दोषे व्योषसमायुक्तो त्रिदोषशमनो भवेत् ।
भक्षयेत् पवने चोग्रे बड़वानलसंज्ञितम् ॥ १४१ ॥

वृहद्बड़वानलो रसः ।—

सूतकं गन्धकञ्चैव हरितालं मनःशिला ।
अभ्रकं वत्सनाभञ्च दारु जङ्गमजं विषम् ॥ १४२ ॥
जैपालात् सार्द्धशतकं सर्वं सञ्चूर्ण्य मर्दयेत् ।
मात्स्यमाहिषमायूर-च्छागपित्तैर्विभावयेत् ॥ १४३ ॥

—विषस्य, शृङ्गवेराम्बुना—आर्द्रकस्वरसेन ; घनसारेण—कर्पूरेण ; सारिणेति चन्दनेन सह सम्बन्धः ॥ १३३—१३८ ॥

स्वल्पबड़वानलरसे ।—विषं तत्तुल्यकमिति—एकभागसमं विषम् । लाङ्गली—विषलाङ्गलीति ख्याता । पुटके—गजपुटे ॥ १३९—१४१ ॥

वृहद्बड़वानलरसे ।—वत्सनाभः,—स्वनामख्यातमूलविषम् ; जङ्गम-

वटिकां शीततोयेन कुर्य्यात् गुञ्जाप्रमाणतः ।
बड़वानलनामाऽयं नारिकेलजलेन वै ।
भक्षयेत् सन्निपातार्त्तो मुक्तस्तस्मात् सुखी भवेत् ॥ १४४ ॥

सूचिकाभरणो रसः ।—

रसगन्धकनागञ्च विषं स्थावरजङ्गमम् ।
मात्स्यवाराहमायूर-च्छागपित्तैर्विभावयेत् ॥ १४५ ॥
सूचिकाभरणो नाम भैरवेण प्रकीर्त्तितः ।
सूचिकाग्रेण दातव्यः सन्निपातनिवर्हणः ॥ १४६ ॥

पञ्चाननरसः ।—

शम्भोः कण्ठविभूषणं समरिचं दैत्येन्द्ररक्तो रविः
पक्षौ सागरलोचनं शशियुगं भागोऽर्कसङ्ख्यान्वितः ।
खल्ले तत् परिमर्दितं रविजलैर्गुञ्जैकमात्रं ददेत्
सिंहोऽयं ज्वरदन्तिदर्पदलनः पञ्चाननाख्यो रसः ॥ १४७ ॥

त्रिदोषनीहारविनाशसूर्य्यो रसः ।—

रसेन गन्धं द्विगुणं कृशानो रसैर्विमर्द्याष्टदिनानि घर्मे ।
रसाष्टभागन्त्वमृतञ्च दद्यात् विमर्दयेत् वह्निरसेन किञ्चित् ॥ १४८ ॥

विषं—कालसर्पविषं, दारु—दारुमूषानामकं स्थावरविषं, "दामुंज" इति लोके । जैपालं सार्द्धशतकमिति आकृतिमानात् ॥ १४२—१४४ ॥

सूचिकाभरणरसे ।—विषं स्थावरजङ्गममिति ।—स्थावरविषम्—अमृतम् ; जङ्गमविषं—कृष्णसर्पविषम् । पेयोऽयमार्द्रकरसेन ॥१४५।१४६॥

पञ्चाननरसे ।—शम्भोः कण्ठविभूषणं—विषं, दैत्येन्द्रः,—गन्धकः, रक्तं—हिङ्गुलं, रविः,—ताम्रम् । विषादीनां यथाक्रमं पक्षौ द्विभागो इत्यादि भागो बोध्यः । रविजलैः,—अर्कमूलरसैः ॥ १४७ ॥

पित्तैस्तु सम्भावित एष देयः त्रिदोषनीहारविनाशसूर्य्यः ॥ १४९ ॥

रसराजेन्द्रः रसः ।—

पलं शुद्धस्य सूतस्य पलं ताम्रमयस्तथा ।
अभ्रं नागं पलं वङ्गं पलं गन्धकतालकम् ॥ १५० ॥
पलं शुद्धविषं चूर्णं सर्वमेकत्र कारयेत् ।
मर्दयेत् काकमाच्याश्च आर्द्रकस्य रसेन च ॥ १५१ ॥
मात्स्यवाराहमायूर-च्छागमाहिषपित्तकैः ।
मर्दयेद्‌ भिन्नभिन्नञ्च त्रिकटोरम्बुभिस्तथा ॥ १५२ ॥
सिद्धोऽयं रसराजेन्द्रो धन्वन्तरिसुसंस्कृतः ।
गुञ्जामात्रं रसं दद्यात् सुरसारससंयुतम् ॥ १५३ ॥
मेघवारिप्रवाहेण धारितं वारि मस्तके ।
अनिवारो यदा दाहस्तदा देया च शर्करा ।
भोजनं दधिसंयुक्तं वारमेकन्तु दापयेत् ॥ १५४ ॥
ईश्वरेण हतः कामः केशवेन च दानवः ।
पावकेन यथा शीतमनेन च तथा ज्वरः ॥ १५५ ॥

मृतसञ्जीवनो रसः ।—

शुद्धसूतं द्विधा गन्धं खल्ले तत् कज्जलीकृतम् ।
अभ्रलौहकयोर्भस्म ताम्रभस्म समं समम् ॥ १५६ ॥

त्रिदोषनीहारविनाशसूर्य्यरसे ।—कृशानुः,—चित्रकः, अमृतं—विषम् ; तच्च रसस्याष्टमांशम् ॥ १४८।१४९ ॥

रसराजेन्द्ररसे ।—अयः,—लौहम् ; तच्च पलं ग्राह्यम् ; एवं गन्धकं तालकमपि प्रत्येकं पलम् । त्रिकटोरम्बभिः,—त्रिकटुकक्वाथैः । सुरसा—तुलसी ॥ १५०—१५५ ॥

विषं तालं वराटञ्च शिलाहिङ्गुलचित्रकान् ।
हस्तिशुण्डी चातिविषा त्र्यूषणं हेममाक्षिकम् ॥ १५७ ॥
चूर्णं विमर्दयेद्द्रावैरार्द्रकस्य दिनत्रयम् ।
निर्गुण्डीविजयाद्रावैस्त्रिदिनं मर्दयेत् पुनः ॥ १५८ ॥
काचकूप्यां निवेश्याथ वालुकायन्त्रके पचेत् ।
द्वियामान्ते समुद्धृत्य मर्दयेदार्द्रकैर्द्रवैः ॥ १५९ ॥
मृतसञ्जीवनो नाम रसोऽयं शङ्करोदितः ।
मृतोऽपि सन्निपातार्त्तो जीवत्येव न संशयः ॥ १६० ॥

गन्धककज्जलीविधिः ।—

कण्टकारी सिन्धुवारस्तथा नाटाकरञ्जकम् ।
अमीषां रसमादाय कृत्वा खर्परखण्डके ॥ १६१ ॥
प्रक्षिप्य गन्धकं तत्र ज्वालां मृद्वग्निना ददेत् ।
गन्धके स्नेहतापन्ने पारदं तत्समं क्षिपेत् ॥ १६२ ॥
मिश्रीकृत्य ततो द्वाभ्यां द्रवं तमवतारयेत् ।
आमर्दयेत् तथा तन्तु यथा स्यात् कज्जलप्रभम् ॥ १६३ ॥
ततस्तु रक्तिकामस्य जीरकस्य च माषकम् ।
माषैकं लवणस्यापि पर्णे कृत्वा प्रदापयेत् ॥ १६४ ॥

मृतसञ्जीवनरसे।—समं सर्वमिति।—अभ्रादीनां प्रत्येकं गन्धकसममित्यर्थः। द्वियामान्ते समुद्धृत्येति।—तद्वालुकायन्त्रे प्रहरद्वयं पक्का, ततः कूपिकायाः समाकृष्य, पुनः आर्द्रकद्रवैः संमर्द्य वटिका कार्य्येत्यर्थः ॥ १५६—१६० ॥

गन्धककज्जलीमाह, कण्टकारीत्यादि।—कण्टकार्य्यादीनां स्वरसं खर्परे कृत्वा तत्र गन्धकं निक्षिप्य ज्वलद्बदराङ्गारोपरि स्थापयेत्; द्रवीभूते

ज्वरे त्रिदोषजे घोरे जलमुष्णं पिबेदनु ।
छर्द्यां शर्करया दद्यात् सामे दद्यात् तथा गुडम् ॥ १६५ ॥
क्षये च च्छागदुग्धं स्यादनुपानं प्रयोजितम् ।
रक्तातिसारे कुटज-मूलवल्कलजं रसम् ॥ १६६ ॥
रक्तक्षये तथा दद्यादुडुम्बरभवं रसम् ।
सर्वव्याधिहरश्चायं गन्धकः कज्जलीकृतः ।
आयुर्वृद्धिकरश्चायं मृतञ्चापि प्रबोधयेत् ॥ १६७ ॥

पित्तभावितौषधप्रयोगे उपचारः ।—

ये रसाः पित्तसंयुक्ताः प्रोक्ताः सर्वत्र शम्भुना ।
जलसेकावगाहैश्च बलिनस्ते तु नान्यथा ।
यथालाभेन पित्तेन रसाः सर्वे भवन्ति हि ॥ १६८ ॥

वेतालो रसः ।—

रसं गन्धं विषञ्चैव मरिचाऽऽलं समांशिकम् ।
शिलायां मर्दयेत् तावद् यावज्जायेत कज्जलम् ॥ १६९ ॥
गुञ्जामात्रं प्रयोक्तव्यं हरेद्वादशसंज्ञकम् ।
साध्यासाध्यं निहन्त्याशु सन्निपातं सुदारुणम् ॥ १७० ॥

गन्धके तत्तुल्यं पारदं निक्षिप्य, द्वयं मिश्रितमालोक्य अवतार्य्य कज्जली-कृत्य च पर्णादिभिः सह भक्षयेत् ॥ १६१—१६७ ॥

मत्स्यादिपित्तभावितरसव्यवहारे शैत्योपचारप्रयोजनमाह, ये रसा इति ।—मत्स्यादीनां पित्तैर्भावितम् औषधं प्रयुज्य शीतक्रिया अवश्यमेव कर्त्तव्या, तया च रसस्य शक्तिवृद्धिर्भवति ; अन्यथा तीव्रौषधसेवनात् रुग्णस्य अनिष्टसम्भावना भवति ॥ १६८ ॥

दन्तपङ्क्तिर्दृढ़ा यस्य लोचने भ्रान्ततारके।
चलिते चेन्द्रियग्रामे वेतालं विनियोजयेत्॥ १७१ ॥
म्लानेषु लिप्तदेहेषु मोहग्रस्तेषु देहिषु।
दातुमर्हति वेतालं यमदूतनिवारकम्॥ १७२ ॥

चन्द्रशेखरो रसः।—

शुद्धसूतं समं गन्धं मरिचं टङ्कणं तथा।
चतुस्तुल्या शिला योज्या मत्स्यपित्तेन भावयेत्॥ १७३ ॥
त्रिदिनं मर्द्दयेत् तेन रसोऽयं चन्द्रशेखरः।
द्विगुञ्जमार्द्रकद्रावैर्देयं शीतोदकं पुनः॥ १७४ ॥
तक्रभक्तञ्च वृन्ताकं भिषक् तत्र प्रयोजयेत्।
त्रिदिनात् श्लेष्मपित्तोत्थमत्युग्रं नाशयेत् ज्वरम्॥ १७५ ॥

कस्तूरीभैरवो रसः।—

हिङ्गुलञ्च विषं टङ्कः जातीकोषफलं तथा।
मरिचं पिप्पली चैव कस्तूरी च समांशिका।
रक्तिद्वयं ततः खादेत् सन्निपाते सुदारुणे॥ १७६ ॥

वृहत्कस्तूरीभैरवो रसः।—

मृतं वङ्गं खर्परञ्च कस्तूरी स्वर्णतारके।
एतेषां समभागेन कर्षमेकं पृथक् पृथक्॥ १७७ ॥
मृतं कान्तं पलं देयं हेमसारं द्विकार्षिकम्।

वेतालरसे।—आलं—हरितालम्। चलिते चेन्द्रियग्रामे इति।—स्वस्वविषयग्रहणाशक्ते इन्द्रियसमूहे॥ १६९—१७६ ॥

वृहत्कस्तूरीभैरवे।—तारकं—रौप्यं, हेमसारं—स्वर्णमाक्षिकं,

रसभस्म लवङ्गञ्च जातिकाफलमेव च ॥ १७८ ॥
वच्यमाणौषधैर्भाव्यं प्रत्येकं दिनसप्तकम् ।
द्रोणपुष्परसैर्वाऽपि नागवल्ल्या रसेन च ॥ १७९ ॥
दत्त्वा द्विचन्द्रत्रिकटू यत्नतो वटिकां चरेत् ।
वातात्मके सन्निपाते महाश्लेष्मगदेषु च ॥ १८० ॥
त्रिदोषजनिते घोरे सन्निपाते सुदारुणे ।
नष्टगर्भे नष्टशुक्रे प्रमेहे विषमज्वरे ॥ १८१ ॥
कासे श्वासे क्षये गुल्मे महाशोथे महागदे ।
स्त्रीणां शतं गच्छतश्च न च शुक्रक्षयो भवेत् ।
एतान् सर्वान् निहन्त्याशु भास्करस्तिमिरं यथा ॥ १८२ ॥

अन्यद्बृहत्कस्तूरीभैरवो रसः ।—

मृगमदशशिसूर्य्यौ धातकी शृङ्गशिम्बी
कनकरजतमुक्ता विद्रुमो लौहपाठाः ।
क्रिमिरिपुघनविश्वातोयतालाभ्रधात्री-
रविदलरसपिष्टः कस्तुरीभैरवोऽयम् ॥ १८३ ॥

कस्तूरीभैरवः ख्यातः सर्वज्वरविनाशनः ।
आर्द्रकस्य रसैः पेयो विषमज्वरनाशनः ॥ १८४ ॥
द्वन्द्वजान् भौतिकान् वाऽपि ज्वरान् कामादिसम्भवान् ।

रसभस्म—रससिन्दूरम् ; द्विचन्द्र इति—कर्पूरं द्विकर्षमित्यर्थः ; एवं त्रिकटुचूर्णान्यपि । तानि कर्पूरत्रिकटुचूर्णानि भावनाऽनन्तरं देयानि । महाश्लेष्मगदेष्विति—श्लेष्मणोऽत्युल्वणत्वे ॥ १७७ - १८२ ॥

अन्यद्बृहत्कस्तूरीभैरवे ।—मृगमदः,—कस्तूरी, शशी—कर्पूरं, सूर्य्यः,

अभिचारकृतांश्चैव तथा शुक्रकृतान् पुनः ।
निहन्याङ्क्षणादेव डाकिन्यादियुतांस्तथा ॥ १८५ ॥

सौभाग्यवटी ।—

सौभाग्यामृतजीरपञ्चलवणव्योषाभयाच्चामला-
निश्चन्द्राभ्रकशुद्धगन्धकरसानेकीकृतान् भावयेत् ।
निर्गुण्डीयुगभृङ्गराजकवृषापामार्गपत्रोल्लसत्-
प्रत्येकस्वरसेन सिद्धगुड़िका हन्ति त्रिदोषोदयम् ॥ १८६ ॥
येषां शीतमतीव देहमखिलं स्वेदद्रवार्द्रीकृतं
निद्रा घोरतरा समस्तकरणव्यामोहमुग्धं मनः ।
शूलश्वासबलासकाससहितं मूर्च्छाऽरुचिस्तद्‌ज्वरं
तेषां वै परिहृत्य मृत्युवदनात् प्रत्यानयेत् जीवनम् ॥ १८७ ॥

सन्निपातहरो रसः ।—

पारदं गन्धकं टङ्कं सोषणं गजपिप्पली ।
व्योषञ्च धुस्तूरजलैः पिष्टं गुञ्जाद्वयं द्रुतम् ।
सन्निपातं निहन्त्यर्क-कषायैर्व्योषचूर्णितैः ॥ १८८ ॥

—ताम्रं, क्रिमिरिपुः,—विड़ङ्गं, घनं—मुस्तकं, तोयं—बालकं, तालं—हरितालं, रविदलरसः,—अर्कपत्ररसः ॥ १८३—१८५ ॥

सौभाग्यवटीमाह, सौभाग्येत्यादि ।—सौभाग्यं—टङ्गणम्, अमृतं—विषम् ; सौभाग्यादि-सप्तदशद्रव्याणि समभागेन च एकीकृतानि लौह-पात्रे पाषाणपात्रे वा कृत्वा भावयेत् । युगभृङ्गराजः,—भृङ्गराजः, केशराजश्च । सिद्धगुड़िकेति—सिद्धफला गुड़िका ॥ १८६।१८७ ॥

सन्निपातबड़वानलो रसः ।—

रसाष्टकोऽमृतं सप्त स्यात् षष्ठो गन्धतालयोः ।

दन्तीवीजानि षड्भागाः पञ्चभागन्तु टङ्कणम् ॥ १८८ ॥

चत्वारि धूर्त्तवीजस्य व्योषस्य त्रितयो भवेत् ।

एतानि वह्निमूलस्य क्वाथेन परिमर्दयेत् ॥ १८० ॥

आर्द्रकस्य रसेनाथ देयं गुञ्जाद्वयं हितम् ।

बड़वानलसंज्ञोऽयं सन्निपातहरः परः ॥ १८१ ॥

सिंहनादरसः ।—

लौहपात्रगते गन्धे द्राविते तत्र निक्षिपेत् ।

शुद्धसूतं समं चाभ्रं भार्गीद्रावं तयोः समम् ॥ १८२ ॥

निर्गुण्ड्याः पल्लवोत्थञ्च तुल्यं तुल्यं प्रदापयेत् ।

पचेन्मृदग्निना तावत् यावत् शुष्कं द्रवद्वयम् ॥ १८३ ॥

विषपादयुतः सोऽयं सिंहनादरसोत्तमः ।

गुञ्जामात्रः प्रदातव्यः सन्निपातज्वरान्तकः ।

अनुपानं पिबेद् व्याघ्री-क्वाथं पुष्करचूर्णितम् ॥ १८४ ॥

सन्निपातसूर्य्यो रसः ।—

रसेन गन्धं द्विगुणं विमर्द्य तत्पादभागं रवितारहेम ।

भस्मीकृतं योजय मर्द्दयेत्तु दिनत्रयं वह्निरसेन घर्मे ॥ १८५ ॥

सन्निपातहररसे ।—धुस्तूरजलैः,—धुस्तूररसैः ॥ १८८—१८१ ॥

सिंहनादरसे ।—भार्गीद्रावं तयोः सममिति ।—रसगन्धकयोः समं भार्गीद्रावं, निर्गुण्ड्याः स्वरसञ्च । "तुल्यम्" इत्यत्र "तुल्यम्" इति पाठान्तरम् । विषपादयुत इति— गन्धकापेक्षया चतुर्थांशः ॥ १८२—१८४ ॥

विषञ्च दत्त्वाऽत्र कलाप्रमाणं मत्स्यादिपित्तैः परिभावयेच्च ।
वल्लद्वयं चास्य ददीत वह्नि-कटुत्रयार्द्रद्रवसंप्रयुक्तम् ॥ १९६ ॥
तैलेन चाभ्यञ्जनमेव कुर्य्यात् स्नानं जलेनापि च शीतलेन ।
यावद्भवेद् दुःसहशीतमस्य मूत्रं पुरीषञ्च शरीरकम्पः ॥ १९७ ॥
पथ्ये यदीहा परिजायतेऽस्य मरीचखण्डं दधिभक्तकञ्च ।
स्वल्पं ददीतार्द्रकमत्स्यशाकं दिनान्तरं स्नानविधिञ्च कुर्य्यात्॥१९८॥

अभिन्यासे।—

स्वच्छन्दनायको रसः।—

सूतगन्धकलौहानि रौप्यं संमर्दयेत् त्र्यहम् ।
सूर्य्यावर्त्तश्च निर्गुण्डी तुलसी गिरिकर्णिका ॥ १९९ ॥
अग्निवल्लयार्द्रकं वह्निः विजयाऽथ जया सह ।
काकमाचीरसैरेषां पञ्चपित्तैश्च भावयेत् ॥ २०० ॥
अन्धमूषागतं पश्चात् बालुकायन्त्रगं दिनम् ।
विपचेत् चूर्णितं खादेत् माषैकं चार्द्रकद्रवैः ॥ २०१ ॥
निर्गुण्डीदशमूलानां कषायं सोषणं पिबेत् ।

सन्निपातसूर्य्ये।—तत्पादभागमिति।—भस्मीकृतं रवितारहेम प्रत्येकं मिलितरसगन्धकयोः पादभागम्। कलाप्रमाणम्—मिलितचूर्णस्य षोड़शांशम्। "दिनान्तरम्" इत्यत्र "दिनाष्टकम्" इति साधीयान् पाठः ॥ १९५—१९८ ॥

अथाभिन्याससन्निपातचिकित्सामाह, सूतेत्यादि।—सूतगन्धकलौह-रौप्याणि सूर्य्यावर्त्तादिभिः पञ्चदशभिर्द्रव्यैः त्र्यहं भावयित्वा अन्धमूषा-

अग्निमान्द्यं निहन्त्याशु रसः स्वच्छन्दनायकः ।
छागीदुग्धेन मुद्गं वा पथ्यमत्र प्रयोजयेत् ॥ २०२ ॥
मायूरमात्स्यवाराह-च्छागमाहिषमेव च ।
पञ्चपित्तमिदं देयं भावनासु च सर्वदा ॥ २०३ ॥

सन्निपातान्तको रसः ।—

शुद्धसूतः समो गन्धः दरदः शुद्धखर्परम् ।
रसस्य द्विगुणौ देयौ मृतताम्राम्लवेतसौ ॥ २०४ ॥
भृङ्गराजद्रवैर्भाव्यं प्रत्यहं भावना पृथक् ।
दातव्यं तच्चतुर्गुञ्जमार्द्रकस्य रसैः सह ।
सन्निपातं निहन्त्याशु सन्निपातान्तको रसः ॥ २०५ ॥

विषमजीर्णज्वरे ।—

विषमज्वरलक्षणम् ।—

यः स्यादनियतात् कालाच्छीतोष्णाभ्यां तथैव च ।
वेगतश्चापि विषमः स ज्वरो विषमः स्मृतः ॥ २०६ ॥

गतानि कृत्वा बालुकायन्त्रेण पचेत्; पश्चात् समुद्धृत्य विचूर्ण्य च माषैकम् आर्द्रकरसेन सह खादेत्, व्यवहारिकी तु मात्रा रक्तिकाद्वयम्। सेवनात्परं निर्गुण्ड्या सह दशमूलीक्वाथः समरिचः पेयः। पथ्यं छागीदुग्धं मुद्गयूषश्च ॥ १९९—२०३ ॥

सन्निपातान्तकरसे ।—मिलितौ ताम्राम्लवेतसौ रसस्य द्विगुणौ देयौ ॥ २०४—२०५ ॥

अथ जीर्णज्वरलक्षणम्।—

त्रिसप्ताहव्यतीतस्तु ज्वरो यस्तनुतां गतः।
प्लीहाग्निसादं कुरुते स जीर्णज्वर उच्यते॥ २०७॥

अथ ज्वराङ्कुशो रसः।—

रसस्य द्विगुणं गन्धं गन्धतुल्यञ्च टङ्कणम्।
रसतुल्यं विषं योज्यं मरिचं पञ्चधा विषात्॥ २०८॥
दन्तीवीजं कट्फलञ्च प्रत्येकं मरिचोन्मितम्।
ज्वराङ्कुशो रसो नाम मर्द्दयेद् याममात्रकम्।
मासैकेन निहन्त्याशु ज्वरं जीर्णं त्रिदोषजम्॥ २०९॥

अथ ज्वरारि-अभ्रम्।—

अभ्रं ताम्रं रसं गन्धं विषञ्चैव समं समम्।
द्विगुणं धूर्त्तवीजञ्च व्योषं पञ्चगुणं मतम्॥ २१०॥
आर्द्रकस्य रसेनैव वटी कार्य्या द्विगुञ्जिका।
अनुपानं प्रयोक्तव्यं यथादोषानुसारतः॥ २११॥
अभ्रं ज्वरारिनामेदं सर्वज्वरविनाशनम्।
वातिकं पैत्तिकञ्चैव श्लैष्मिकं सान्निपातिकम्॥२१२॥
विषमाख्यान् ज्वरान् सर्वान् धातुस्थान् विषमज्वरान्।
प्लीहानं यकृतं गुल्ममग्रमांसं सशोथकम्॥ २१३॥
हिक्कां श्वासञ्च कासञ्च मन्दानलमरोचकम्।
नाशयेन्नात्र सन्देहो वृक्षमिन्द्राशनिर्यथा॥ २१४॥

ज्वरारि अभ्रे।—द्विगुणं धूर्त्तवीजमिति—एकभागापेक्षया द्विगुणम्; एवं व्योषमप्येकभागापेक्षया पञ्चगुणम्॥ २०६—२१४॥

अथ ज्वराशनि-रसः।—

रसं गन्धं सैन्धवञ्च विषं ताम्रं समांशिकम्।
सर्व्वचूर्णसमं लौहं तत्समं शुद्धमभ्रकम्॥ २१५॥
लौहे च लौहदण्डे च निर्गुण्डीस्वरसेन च।
मर्द्दयेत् यत्नतः पश्चात् मरिचं सूततुल्यकम्॥ २१६॥
नागवल्ल्या दलेनैव दातव्यो रक्तिसम्मितः।
सर्व्वज्वरहरः श्रेष्ठो ज्वरान् हन्ति सुदारुणान्॥ २१७॥
कासं श्वासं महाघोरं विषमाख्यं ज्वरं वमिम्।
धातुस्थं परमं दाहं ज्वरं दोषत्रयोद्भवम्॥ २१८॥

अथ अर्द्धनारीश्वरो रसः।—

रसगन्धौ समौ शुद्धौ विषं ग्राह्यञ्च तत्समम्।
जैपालं तत्समं ग्राह्यं मरिचञ्च चतुर्गुणम्॥ २१९॥
त्रिफलाया रसैर्मर्द्यं भावना पञ्चधा तथा।
जम्बीराणां द्रवैर्नस्यमेकस्मिन् नासिकापुटे॥ २२०॥
शरीरार्द्धगतं घोरं ज्वरं हन्ति न संशयः।
अर्द्धनारीश्वरो नाम रसः शम्भुप्रकीर्त्तितः॥ २२१॥

अर्द्धनारीश्वररसे।—विषं ग्राह्यञ्च तत्समिति।—मिलितरसगन्धयोः समम्। जैपालं तत्समिति—विषतुल्यं जैपालं देयम्। मरिचञ्च चतुर्गुणमिति।—एकभागापेक्षया मरिचस्य चातुर्गुण्यमिति श्रीकण्ठः; सोमेश्वरस्तु मिलितरसगन्धकापेक्षया चतुर्गुणमित्याह; व्यवहारोऽप्यनेनैव। "त्रिफलाया रसैः" इत्यत्र "विल्वमूलरसैः" इति क्वचित् पाठः॥ २१५—२२१॥

अथ चन्दनादिलौहम्।—

रक्तचन्दनह्रीबेर-पाठोशीरकणाशिवा-।
नागरोत्पलधात्रीभिस्त्रिमदेन समन्वितम्।
लौहं निहन्ति विविधान् समस्तान् विषमज्वरान्॥ २२२॥

अथ ज्वरारिरसः।—

शुद्धसूतं द्विधा गन्धं विषञ्चैव कटुत्रयम्।
नागभस्म शिला चैव प्रत्येकं कर्षमानकम्॥ २२३॥
शुद्धतालार्द्धकर्षञ्च शुल्वमेकत्र कारयेत्।
धुस्तूरस्य च वीजानि कार्षिकाणि प्रकल्पयेत्॥ २२४॥
रोहितमत्स्यपित्तेन अर्कक्षीरार्द्रकाम्बुना।
मर्द्दयेदुदयास्तञ्च चणकाभा वटी कृता॥ २२५॥
आर्द्रकस्य रसैः कर्षैर्मधुमाषसमायुतम्।
भक्षयेत् प्रातरुत्थाय ज्वरारिरससंज्ञितम्॥ २२६॥
वातिकं पैत्तिकञ्चैव कफजं नाशयेद् ध्रुवम्।
वातपित्तसमुद्भूतं वातश्लैष्मिकमेव च॥ २२७॥
भयादुत्पत्तिकं वाऽपि शोकोत्पन्नमथापि वा।
अभिचाराभिशापोत्थं भूतोत्थञ्च ज्वरं जयेत्॥ २२८॥
मेदःप्राप्तं सन्ततञ्च रसस्थे तु ज्वरे तथा।

चन्दनादिलौहे।—लौहं सर्वचूर्णसमं, लौहप्रधानयोगत्वात् जीर्णज्वरहरत्वम्॥ २२२॥

ज्वरारिरसे।—शुल्वमपि कर्षार्द्धमानम्। प्रथमतः रसगन्धकाभ्यां कज्जली करणीया, पश्चादन्यानि द्रव्याणि मेलयेत्; रोहितमत्स्यपित्तार्क-

सन्निपातज्वरे देयो मधुव्योषसमायुतः ॥ २२९ ॥
घर्मं पित्तं तथा कम्पं दाहं हन्ति न संशयः ।
इन्द्रवज्रो यथा वृक्षं तथा ज्वरविनाशनः ॥ २३० ॥
वर्जयेत् क्षीरमांसञ्च दधितक्रसुराघृतम् ।
ज्वरे मांसास्थिगे चैव रक्तस्थे तु ज्वरे नृणाम् ॥ २३१ ॥
शैत्ये दाहे तथा घर्मे प्रलापे चातुराह्निके ।
महावेगे ज्वरे चैव जीर्णे चापि प्रदापयेत् ॥ २३२ ॥

अथ सर्वज्वरहरलौहम् ।—

चित्रकं त्रिफला व्योषं विडङ्गं मुस्तकं तथा ।
श्रेयसी पिप्पलीमूलमुशीरं देवदारु च ॥ २३३ ॥
किराततिक्तकं पाठा कटुकी कण्टकारिका ।
शोभाञ्जनस्य वीजानि मधुकं वत्सकं समम् ॥ २३४ ॥
लौहतुल्यं गृहीत्वा तु वटिकां कारयेद्भिषक् ।
सर्वज्वरहरं लौहं सर्वरोगहरं तथा ॥ २३५ ॥
वातिकं पैत्तिकञ्चैव श्लैष्मिकं सान्निपातिकम् ।
द्वन्द्वजं विषमाख्यञ्च धातुस्थञ्च ज्वरं जयेत् ॥ २३६ ॥
शीतं कम्पं तृषां दाहं घर्मस्तुतिवमिभ्रमीन् ।
रक्तपित्तमतीसारं मन्दाग्निं कासमेव च ॥ २३७ ॥

चौराद्रकरसैश्च भावयित्वा वटी कार्य्या । "अर्कचौराद्रकाम्बुना।" इत्यत्र "चार्कचौरेण वा पुनः" इति पाठे—"वा पुनः" इति शब्दवलात् प्रत्येकेन उदयास्तं मर्दनीयमित्यवधातव्यम् ॥ २२३—२३२ ॥

सर्वज्वरहरलौहे ।—व्योषं—त्रिकटु, श्रेयसी—गजपिप्पली, उशीरं —वीरणमूलं, किराततिक्तकं—भूनिम्बं, वत्सकं—कुटजम् ; समभागेन

प्लीहानं यकृतं गुल्मं सामवातं सुदारुणम्।
अर्शांसि घोरमुदरं मूर्च्छां पाण्डुं हलीमकम्॥ २३८॥
अजीर्णं ग्रहणीञ्चैव यक्ष्माणं शोथमेव च।
बल्यं वृष्यं पुष्टिकरं सर्वरोगनिसूदनम्।
सर्वज्वरहरं लौहं चन्द्रनाथेन भाषितम्॥ २३९॥

अथ बृहत्सर्वज्वरहरलौहम्।—

पारदं गन्धकञ्चैव ताम्रमभ्रञ्च माक्षिकम्।
हिरण्यं तारतालञ्च कर्षमेकं पृथक् पृथक्॥ २४०॥
कान्तलौहं पलं देयं सर्वमेकीकृतं शुभम्।
वक्ष्यमाणौषधैर्भाव्यं प्रत्येकं दिनसप्तकम्॥ २४१॥
कारवेल्लरसैर्वाऽपि दशमूलरसेन च।
पर्पट्याश्च कषायेण त्रिफलाक्वाथकेन वा॥ २४२॥
गुडूच्याः स्वरसेनैव नागवल्लीरसेन च।
काकमाचीरसेनैव निर्गुण्ड्याः स्वरसैस्तथा॥ २४३॥
पुनर्नवाऽऽर्द्रकाम्भोभिर्भावना परिकीर्त्तिता।
रक्तिकादिक्रमेणैव वटिकां कारयेद्भिषक्॥ २४४॥
पिप्पलीगुड़संयुक्ता वटिका ज्वरनाशिनी।
ज्वरमष्टविधं हन्ति जीर्णज्वरहरं तथा॥ २४५॥
वारिदोषोद्भवञ्चैव नानादोषोद्भवं तथा।
सततादि ज्वरं हन्ति साध्यासाध्यमथापि वा॥ २४६॥

मिलितं चूर्णं लौहतुल्यं गृहीत्वा माषकोन्मिता वटिका कार्य्या। व्यवहारस्तु गुञ्जाचतुष्टयमितः॥ २३३—२३९॥

च्चयोद्भवञ्च धातुस्थं कामशोकभवं तथा ।
भूतावेशभवञ्चैव त्रिदोषजनितं तथा ॥ २४७ ॥
अभिघातज्वरञ्चैव तथाऽभिचारसम्भवम् ।
अभिन्यासं महाघोरं विषमं त्र्याह्निकं तथा ॥ २४८ ॥
शीतपूर्वं दाहपूर्वं त्रिदोषं विषमज्वरम् ।
प्रलेपकज्वरं घोरमर्द्धनारीश्वरं तथा ॥ २४९ ॥
प्लीहज्वरं तथा कासं चातुर्थकविपर्य्ययम् ।
पाण्डुरोगं कामलाञ्च अग्निमान्द्यं महागदम् ।
एतान् सर्वान् निहन्त्याशु पक्षार्द्धेन न संशयः ॥ २५० ॥
शाल्यन्नं तक्रसहितं भोजयेद्विड़संयुतम् ।
ककारपूर्वकं सर्वं वर्जनीयं न संशयः ॥ २५१ ॥
मैथुनं वर्जयेत् तावद् यावन्न बलवान् भवेत् ।
सर्वज्वरहरं लौहं दुर्लभं परिकीर्त्तितम् ॥ २५२ ॥

अथ महाराजवटी ।—

रसगन्धकमभ्रञ्च प्रत्येकं कर्षसम्मितम् ।
वृद्धदारकवङ्गञ्च लौहं कर्षार्द्धकं क्षिपेत् ॥ २५३ ॥
स्वर्णं ताम्रञ्च कर्पूरं प्रत्येकं कर्षपादिकम् ।
शक्राशनं वरी चैव श्वेतसर्ज-लवङ्गकम् ॥ २५४ ॥
कोकिलाक्षं विदारी च मुषली शूकशिम्बिकम् ।
जातीफलं तथा कोषं बला नागबला तथा ॥ २५५ ॥

बृहत्सर्वज्वरहरलौहे ।—माक्षिकं- स्वर्णमाक्षिकं, तारं—रौप्यं, तालं —हरितालं, नागवल्ली—पर्णपत्रम् ॥ २४०—२५२ ॥

माषद्वयमितं भागं तालमूल्या रसेन च।
पिष्ट्वा च वटिका कार्य्या चतुर्गुञ्जाप्रमाणतः॥ २५६॥
मधुना भक्षयेत् प्रातर्विषमज्वरशान्तये।
धातुस्थांश्च ज्वरान् सर्वान् हन्यादेव न संशयः॥ २५७॥
वातिकं पैत्तिकञ्चैव श्लैष्मिकं सान्निपातिकम्।
ज्वरं नानाविधं हन्ति कासं श्वासं क्षयं तथा॥ २५८॥
बलपुष्टिकरं नित्यं कामिनीं रमयेत् सदा।
न च शुक्रं क्षयं याति न बलं ह्रासतां व्रजेत्॥ २५९॥
ऊर्द्ध्वगश्लेष्मजं हन्ति सन्निपातं सुदारुणम्।
कामलां पाण्डुरोगञ्च प्रमेहं रक्तपित्तकम्।
महाराजवटी ख्याता राजयोग्या च सर्वदा॥ २६०॥

अथ अपरचिन्तामणिरसः।—

हाटकं राजतं तालं मुक्ता गन्धकपारदौ।
त्रिकटु कुनटी चैव कस्तूरी च पृथक् समम्॥ २६१॥
जलेन वटिका कार्य्या द्विगुञ्जाफलमानतः।
चिन्तामणिरसो ह्येष ज्वराष्टानां निकृन्तनः॥ २६२॥

अथ त्रैलोक्यचिन्तामणिरसः।—

भागद्वयं स्वर्णभस्म द्विभागं तारमभ्रकम्।
लौहात् पञ्च प्रवालञ्च मौक्तिकं त्रयसम्मितम्॥ २६३॥

महाराजवटिकायाम्।—वृद्धदारकं—वृद्धदारकवीजं, तत्र शोधितं ग्राह्यम्; शक्राशनं—त्रैलोक्यविजयावीजं, वरी—शतमूली, श्वेतसर्जः,—श्वेतधूनकः, मुषली—तालमूली, कोषं—जातीकोषम्॥२५३—२६२॥

भस्मसूतं सप्तकञ्च सर्वं मर्द्यन्तु कन्यया ।
छायाशुष्का वटी कार्य्या छागीदुग्धानुपानतः ॥ २६४ ॥
क्षयं हन्ति तथा कासं गुल्मञ्चापि प्रमेहनुत् ।
जीर्णज्वरहरश्चायं उन्मादस्य निकृन्तनः ।
सर्वरोगहरश्चापि वारिदोषनिवारणः ॥ २६५ ॥

अथ वृहच्चिन्तामणिरसः ।—

रसं गन्धं विषञ्चैव त्रिकटु त्रैफलं तथा ।
शिलाह्वा रौप्यकं स्वर्णं मौक्तिकं तालकं समम् ॥ २६६ ॥
मृगकस्तूरिकायाश्च ग्राह्यं षण्माषिकं भिषक् ।
भृङ्गराजरसेनैव तुलस्याः स्वरसेन वा ॥ २६७ ॥
आर्द्रकस्य रसेनैव वटीं कुर्य्यात् द्विगुञ्जिकाम् ।
चिन्तामणिरसो ह्येष सर्वरोगकुलान्तकः ॥ २६८ ॥
सन्निपातज्वरहरः कफरोगं विनाशयेत् ।
एकजं द्वन्द्वजञ्चैव विविधं विषमज्वरम् ॥ २६९ ॥
अग्निमान्द्यं शिरःशूलं विद्रधिं सभगन्दरम् ।
एतान्येव निहन्त्याशु भास्करस्तिमिरं यथा ॥ २७० ॥

त्रैलोक्यचिन्तामणिरसे ।—द्विभागं तारमभ्रकम् इति ।—तारमभ्रकं प्रत्येकं द्विभागम् । भस्मसूतं—रससिन्दूरम् । वटिका तु द्विगुञ्जामाना ॥२६३—२६५ ॥

वृहच्चिन्तामणिरसे ।—शिलाह्वा—मनःशिला, तालकं—हरितालम् ; रसादितालकान्तद्रव्येषु परिमाणस्यानुक्तत्वेऽपि तोलकप्रमाणं प्रत्येकस्येति बोध्यम् ॥ २६६—२७० ॥

अथ पुटपाक-विषमज्वरान्तकलौहम् ।—

हिङ्गुलसम्भवं सूतं गन्धकेन सुकज्जलम् ।
रसपर्पटीवत् पाच्यं सूतांघ्रि हेमभस्मकम् ॥ २७१ ॥
लौहं ताम्रमभ्रकञ्च रसस्य द्विगुणं क्षिपेत् ।
वङ्गञ्चैव प्रवालञ्च रसार्द्धञ्च विनिक्षिपेत् ॥ २७२ ॥
मुक्ता शङ्खं शुक्तिभस्म रसपादिकमेव च ।
मुक्तागर्ह्वे च संस्थाप्य पुटपाकेन साधयेत् ॥ २७३ ॥
भक्षयेत् प्रातरुत्थाय द्विगुञ्जाफलमानतः ।
अनुपानं प्रयोक्तव्यं कणाहिङ्गु ससैन्धवम् ॥ २७४ ॥
ज्वरमष्टविधं हन्ति वातपित्तकफोद्भवम् ।
प्लीहानं यकृतं गुल्मं साध्यासाध्यमथापि वा ॥ २७५ ॥
सन्ततं सतताख्यञ्च त्र्याहिकं चतुराहिकम् ।
कामलां पाण्डुरोगञ्च शोथं मेहमरोचकम् ॥२७६ ॥
ग्रहणीमामदोषञ्च कासं श्वासञ्च दारुणम् ।
मूत्रकृच्छ्रातिसारञ्च नाशयेदविकल्पतः ॥ २७७ ॥

पुटपाक-विषमज्वरान्तकलौहे ।—हिङ्गुलसम्भवं सूतं—हिङ्गुलोत्थ-पारदं, तुल्यांशगन्धकेन सह कज्जलीं कृत्वा वक्ष्यमाणरसपर्पटीवत् पर्पटीकृतम् ; ततः पारदाच्चतुर्थांशं स्वर्णभस्म, लौहं ताम्रमभ्रञ्च प्रत्येकं द्विगुणं, वङ्गं प्रवालञ्चार्द्धभागं, मुक्ता शङ्खं शुक्तिभस्म च पादांशं निक्षिप्य कन्यानीरेण मर्दयेत् ; ततः शुक्तिसम्पुटे कृत्वा वन्यकरीषाग्निना पुटपाकविधिना पचेत् । मात्रा च द्विगुञ्जामाना । अत्र वङ्गादि-शङ्खान्तम् यावत् "वङ्गकं गैरिकञ्चैव प्रवालञ्च रसार्द्धकम् । मुद्राशङ्खम्" इति पाठः आयुष्कल्पसुहृद्भिः समाहृत इति दिक् ॥ २७१—२७७ ॥

अथ वृहद्विषमज्वरान्तकलौहम् ।—

शुद्धसूतं तथा गन्धं कारयेत् कज्जलीं शुभाम् ।
मृतसूतं हेम तारं लौहमभ्रञ्च ताम्रकम् ॥ २७८ ॥
तालसत्त्वं वङ्गभस्म मौक्तिकं सप्रबालकम् ।
सुवर्णमाक्षिकञ्चापि चूर्णयित्वा विभावयेत् ॥ २७९ ॥
निर्गुण्डी नागवल्ली च काकमाची सपर्पटी ।
त्रिफला कारवेल्लञ्च दशमूली पुनर्नवा ॥ २८० ॥
गुडूची वृषकञ्चापि सभृङ्गकेशराजकः ।
एतेषाञ्च रसेनैव भावयेत् त्रिदिनं पृथक् ॥ २८१ ॥
गुञ्जामानां वटीं कुर्य्यात् शास्त्रवित् कुशलो भिषक् ।
पिप्पलीगुड़केनैव लिहेच्च वटिकां शुभाम् ॥ २८२ ॥
ज्वरमष्टविधं हन्ति निरामं साममेव वा ।
सप्तधातुगतञ्चापि नानादोषोद्भवं तथा ॥ २८३ ॥
सततादि ज्वरं हन्ति साध्यासाध्यमथापि वा ।
अभिघाताभिचारोत्थं ज्वरं जीर्णं विशेषतः ॥ २८४ ॥

अथ शीतभञ्जीरसः (प्रकारभेदेन) ।—

तालकं दरदोद्भूत-पारदो गन्धकः शिला ।
क्रमवृद्ध्या ताम्रपत्रीं द्रव्यैरेतैर्विलेपयेत् ॥ २८५ ॥
अधोमुखीं दृढ़े भाण्डे तां निरुध्याथ पूरयेत् ।
चुल्ल्यां बालुकया घस्रमग्निं प्रज्वालयेद्दृढ़म् ॥ २८६ ॥

वृहद्विषमज्वरान्तकलौहे ।—मृतसूतं—रससिन्दूरं, तालसत्त्वं—हरितालभस्म, सुवर्णमाक्षिकं—स्वर्णमाक्षिकम् । सप्तधातुगतं—रसासृङ्मांसमेदोऽस्थिमज्जशुक्रगतम् ॥ २७८—२८४ ॥

शीते संचूर्ण्य माषोऽस्य नागवल्लीदले स्थित: ।
भक्षितो मरिचैः सार्द्धं समस्तान् विषमज्वरान् ।
शीतदाहादिकं हन्यात् पथ्यं शाल्योदनं पयः ॥ २८७ ॥

अथ चिन्तामणिः (प्रकारभेदेन)।—

तालकं शुल्वकं चूर्णं शिखिग्रीवं समांशिकम् ।
संपिष्य कारयेत् सर्वं चक्रिकासन्निभं शुभम् ॥ २८८ ॥
शरावपिहितं रात्रौ पचेद् गजपुटेन तु ।
स्वाङ्गशीतं समुद्धृत्य भक्षयेत् माषमात्रकम् ।
शर्करासहितं सेव्यं सर्वज्वरहरं परम् ॥ २८९ ॥

अथ ज्वराङ्कुशः ।—

ताम्रतो द्विगुणं तालं मर्दयेत् सुषवीद्रवैः ।
प्रपुटेत् भूधरे शीते वज्रीक्षीरैर्विमर्दयेत् ॥ २९० ॥
प्रपुटेत् भूधरे पश्चात् पञ्चगुञ्जामितं शुभम् ।
आर्द्रकस्य रसेनैव सर्वज्वरनिकृन्तनः ॥ २९१ ॥
ऐकाहिकं द्व्याहिकञ्च त्र्याहिकञ्चातुराहिकम् ।
विषमञ्चापि शीताढ्यं ज्वरं हन्ति ज्वराङ्कुशः ॥ २९२ ॥

शीतभञ्जीरसे ।—दरदोद्भूतपारदः,—हिङ्गुलोत्थरसः । शिला—मनः-शिला ; क्रमवृद्धा इति—यथाक्रमं भागवृद्धा । अधोमुखीमिति ।—तां ताम्रपात्रीं भाण्डे अधोमुखीं निरुध्य बालुकया भाण्डं प्रपूर्य्य दृढ़ाग्नि-सन्तापे द्वादशप्रहरं यावत् पचेत् ॥ २८५—२८७ ॥

चिन्तामणौ ।—तालकं—हरितालं, शुल्वकं—ताम्रं, चूर्णं—शुक्ति-भस्म, शिखिग्रीवं—तुत्थकम् ; सर्वं समांशेन संगृह्य जलेन संपिष्य

अथ मेघनादो रसः ।—

आरं कांस्यं मृतं ताम्रं त्रिभिस्तुल्यञ्च गन्धकम् ।
रसेन मेघनादस्य पिष्ट्वा रुद्ध्वा पुटे पचेत् ॥ २८३ ॥
भक्षयेत् पर्णखण्डेन विषमज्वरनाशनम् ।
अस्य मात्रा द्विगुञ्जा स्यात् पथ्यं दुग्धौदनं हितम् ।
पश्चामृतपलञ्चैकमनुपानं प्रयोजयेत् ॥ २८४ ॥

अथ शीतज्वरहरो रसः ।—

सूतमाक्षिकगन्धानां भागश्चारुष्करस्य च ।
तथाऽष्टौ तालकाच्चूर्णात् रविदुग्धस्य षोड़श ॥ २८५ ॥
स्नुहीक्षीरस्य चैवाष्टौ सर्वं मृद्वग्निना पचेत् ।
साङ्गशीतं समुद्धृत्य ततः खल्ले विमर्दयेत् ।
शीतज्वरहरो नाम्ना रसोऽयं परिकीर्त्तितः ॥ २८६ ॥

चक्रिकाकारं कृत्वा शरावद्वयपिहितं रात्रौ गजपुटे पचेत् । व्यवहारस्तु द्विगुञ्जापरिमितः ; सशर्करः सेव्यः ॥ २८८—२८१ ॥

मेघनादरसे ।—मेघनादः,—रक्ततण्डुलीयकः । मात्रा चास्य द्विगुञ्जा-माना । ताम्रात् द्विगुणं हरितालं कारवेल्लरसेन मर्दयित्वा भूधरयन्त्रेण प्रपुटेत् ; पश्चात् शीतं समुद्धृत्य, स्नुहीक्षीरेण संमर्द्य, पुनरपि तथैव पुटेत् । व्यवहारिकी तु मात्रा गुञ्जामिता । आरमित्यत्र अभ्रमिति पाठान्तरम् ॥ २८३।२८४ ॥

शीतज्वरहररसे ।—सूतादीनामेकैको भागः, हरितालस्य अष्टौ भागाः, अर्कदुग्धस्य षोड़शभागाः, तथा स्नुहीदुग्धस्य अष्टौ भागाः ; एतत् सर्वमेकीकृत्य पुटपाकविधिना मृद्वग्नौ पचेदित्यर्थः ॥ २८५।२८६ ॥

अथ अन्यशीतभञ्जीरसः।—

पारदं रसकं तालं तुत्थं टङ्कणगन्धकम्।
सर्वमेतत् समं शुद्धं कारवेल्लरसैर्दिनम्॥ २९७॥
मर्द्दयेत् तेन कल्केन ताम्रपात्रोदरं लिपेत्।
अङ्गुलार्द्धार्द्धमानेन तं पचेत् सिकताह्वये॥ २९८॥
यन्त्रे यावत् स्फुटन्त्येव व्रीहयस्तस्य पृष्ठतः।
ततस्तत् शीतलं ग्राह्यं ताम्रपात्रोदरात् भिषक्॥ २९९॥
माषैकं पर्णखण्डेन भक्षयेत् मरिचैः समम्।
शीतभञ्जीरसो नाम त्रिदिनान्नाशयेज्ज्वरम्॥ ३००॥

अथ पञ्चाननो रसः।—

रसकं तालकं तुत्थं टङ्कणं रसगन्धकम्।
तुल्यांशं सुषवीतोयैर्मर्दयेत् यामयुग्मकम्॥ ३०१॥
कृत्वा गोलं ताम्रपात्रेणाधोवक्त्रेण रोधयेत्।
स्थालीं मृत्कर्पटे लिप्त्वा पचेत् चुल्ल्यां दिनं ततः॥ ३०२॥
तच्छीतं ताम्रभस्मापि गृह्णीयात् सुरसाजलैः।

अन्यशीतभञ्जीरसे।—रसकं—"खर्परम्" इति माधवः, "फट्किरी" इति चन्द्रिकाकारः। लिम्पेदित्यत्र लिपेदिति छन्दोऽनुरोधात्। पारदादिषड्द्रव्येण उदरलिप्तं ताम्रपात्रम् अधोमुखं कृत्वा स्थाल्यां संस्थाप्य पात्रान्तरेण आच्छाद्य बदरीपत्रकल्केन सन्धिं निरुध्य च बालुकाभिः स्थालीं प्रपूर्य्य तदुपरि व्रीहीन् प्रक्षिपेत्, ततः पात्राधो ज्वाला देया यावत् व्रीहयो न स्फुटन्ति; ततस्तत् पात्रमुद्धृत्य तुल्यांशमरिचैः सह चूर्णयेत्। मात्रा चास्य द्विगुञ्जामाना। "अङ्गुलार्द्धार्द्धमानेन" इत्यत्र "अङ्गुल्यर्द्धप्रमाणेन" इति पाठान्तरम्॥ २९७—३००॥

यामं मर्द्यं ततो वल्लं तुलसीमरिचैर्युतम् ॥ ३०३ ॥
हन्ति सर्वं ज्वरं घोरं विषमञ्च त्रिदोषजम् ।
धात्रीकल्केन वा युक्तं दाहाख्यं विषमं जयेत् ॥ ३०४ ॥
पथ्यं दुग्धौदनं दद्यात् मुद्गयूषं सशर्करम् ।
ज्वरे धातुगते दद्यात् पिप्पलीचौद्रसंयुतम् ।
अयं पञ्चाननो नाम विषमज्वरनाशनः ॥ ३०५ ॥

अथ वमनयोगः ।—

कुमारीमूलकर्षैकं पिबेत् कोष्णजलेन तु ।
विषमन्तु ज्वरं हन्ति वमनेन चिरन्तनम् ॥ ३०६ ॥

अथ विश्वेश्वरो रसः ।—

दरदं गन्धकं सूतं तुल्यांशं मर्दयेद् द्रवैः ।
अश्वत्थजैस्त्र्यहं पश्चात् रसैः कोलकमूलजैः ॥ ३०७ ॥
निदिग्धिकारसैः काक-माचिकाया रसैः पुनः ।
द्विगुञ्जां वा त्रिगुञ्जां वा गोक्षीरेण प्रदापयेत् ।
रात्रिज्वरं निहन्त्याशु नाम्ना विश्वेश्वरो रसः ॥ ३०८ ॥

अथ त्र्याहिकारिरसः ।—

रसकेन समं शङ्खं शिखिग्रीवञ्च पादिकम् ।
गोजिह्वया जयन्त्या च तण्डुलीयैश्च भावयेत् ॥ ३०९ ॥

पञ्चाननरसमपि शीतभञ्जीवत् द्वादशप्रहरं पचेत् ॥ ३०१—३०५ ॥

वमनयोगमाह, कुमारीति ।— कोष्णजलेन सह पिष्टं कुमारिकामूलं कोष्णजलेनैव पिबेत् ३०६ ॥

विश्वेश्वररसे ।— दरदं— हिङ्गुलम्, अश्वत्थजैरिति— अश्वत्थवल्कलरसैः ॥ ३०७,३०८ ॥

प्रत्येकं सप्त सप्ताथ शुष्कं गुञ्जाचतुष्टयम् ।
जरणेन घृतेनाद्यात् त्र्याहिकज्वरशान्तये ॥ ३१० ॥

अथ चातुर्थकारिः ।—

हरितालं शिला तुत्थं शङ्खचूर्णञ्च गन्धकम् ।
समांशं मर्दयेत् प्राज्ञः कुमारीरसभावितम् ॥ ३११ ॥
शरावसम्पुटे कृत्वा पश्चाद् गजपुटे पचेत् ।
कुमारिकारसेनैव वल्लमात्र वटीकृता ॥ ३१२ ॥
दत्ता शीतज्वरं हन्ति चातुर्थकं विशेषतः ।
मरिचघृतयोगेन तक्रं पीत्वा चरेद्दटीम् ।
एतया वमनं भूत्वा ज्वरस्तस्मात् विनश्यति ॥ ३१३ ॥

अथ चिन्तामणिरसः (प्रकारभेदेन) ।—

रसं गन्धं विषं शुल्वं मृतमभ्रं फलत्रिकम् ।
त्र्यूषणं दन्तीवीजञ्च समं खल्ले विमर्दयेत् ॥ ३१४ ॥
द्रोणपुष्पीरसैर्भाव्यं शुष्कं तद् वस्त्रगालितम् ।
चिन्तामणिरसोऽजीर्णे ह्येष वै शस्यते सदा ॥ ३१५ ॥
ज्वरमष्टविधं हन्ति सर्वशूलहरः परः ।
गुञ्जैकं वा द्विगुञ्जं वा देयमार्द्रकवारिणा ॥ ३१६ ॥

अथ वृहच्चिन्तामणिरसः (प्रकारभेदेन) ।—

रसगन्धकलौहानि ताम्रं तारं हिरण्यकम् ।

त्र्याहिकारिरसे ।—शिखिग्रीवं—तुत्थकं, पादिकमिति—रसक-शङ्खयोः पादिकम् ॥ ३०९—३१३ ॥

चिन्तामणिरसे ।—शुल्वं—ताम्रम् । त्र्यूषणं—त्रिकटुकम्, दन्ती-वीजं—जयपालवीजम् ॥ ३१४—३१६ ॥

हरितालं खर्परञ्च कांस्यं वङ्गञ्च विद्रुमम् ॥ ३१७ ॥
मुक्तामाक्षिककाशीशं शिला च टङ्कणं समम् ।
कर्पूरञ्च समं दत्त्वा भावना सप्त सप्तकम् ॥ ३१८ ॥
भार्गी वासा च निर्गुण्डी नागवल्ली जयन्तिका ।
कारवेल्लं पटोलञ्च शक्राशनपुनर्नवे ॥ ३१९ ॥
आर्द्रकञ्च ततो दद्यात् प्रत्येकं वारसप्तकम् ।
चिन्तामणिरसो नाम सर्वज्वरविनाशनः ॥ ३२० ॥
वातिकं पैत्तिकञ्चैव श्लैष्मिकं सान्निपातिकम् ।
द्वन्द्वजं विषमाख्यञ्च धातुस्थञ्च ज्वरं जयेत् ॥ ३२१ ॥
कासं श्वासं तथा शोथं पाण्डुरोगं हलीमकम् ।
प्लीहानमग्रमांसञ्च यकृतञ्च विनाशयेत् ॥ ३२२ ॥

महाज्वराङ्कुशः ।—

पारदं गन्धकं ताम्रं हिङ्गुलं तालमेव च ।
वङ्गं लौहं माक्षिकञ्च खर्परञ्च मनःशिला ॥ ३२३ ॥
मृताभ्रकं गैरिकञ्च टङ्कणं दन्तिवीजकम् ।
सर्वाण्येतानि द्रव्याणि चूर्णयित्वा विभावयेत् ॥ ३२४ ॥
जम्बीरविजयाचित्र-तुलसीतिन्तिड़ीरसैः ।
एभिर्दिनत्रयं भाव्यं निर्जने रौद्रसङ्कुले ॥ ३२५ ॥

वृहच्चिन्तामणिरसे ।—तारं—रौप्यम् ; हिरण्यकं—सुवर्णम् ; विद्रुमं —प्रवालभस्म ; माक्षिकं—स्वर्णमाक्षिकम् ; काशीशं—धातुकाशीशम् । शिला—मनःशिला ; भार्ग्यादिभिः प्रत्येकशः सप्त सप्तकं भावना देया ।

चणमात्रां वटीं कृत्वा छायाशुष्काञ्च कारयेत्।
मन्दाग्निदीपनी चैव सर्वज्वरविनाशिनी॥ ३२६॥
द्वन्द्वजं सर्वजञ्चैव चिरकालसमुद्भवम्।
ऐकाहिकं द्व्याहिकञ्च ज्वरञ्च सान्निपातिकम्॥ ३२७॥
चातुर्थकं तथाऽत्युग्रं जलदोषसमुद्भवम्।
सर्वान् ज्वरान् निहन्त्याशु भास्करस्तिमिरं यथा।
महाज्वराङ्कुशो नाम रसोऽयं मुनिभाषितः॥ ३२८॥

अथ तन्त्रान्तरोक्तमहाज्वराङ्कुशो रसः।—

पारदं हिङ्गुलं ताम्रं माक्षिकं तुल्यमेव च।
वङ्गं मृतञ्च गन्धञ्च खर्परञ्च मनःशिला॥ ३२९॥
तालकं घनपाषाणं गैरिकं टङ्कणं तथा।
दन्तीवीजानि सर्वाणि चूर्णयित्वा विभावयेत्।
भावना पूर्ववत् देया वटीं कुर्य्याच्च पूर्ववत्॥ ३३०॥

अथ सर्वतोभद्ररसः।—

विशुद्धं गगनं ग्राह्यं द्विकर्षं शुद्धगन्धकम्।
तोलकं तोलकार्द्धञ्च हिङ्गुलोत्थरसं तथा॥ ३३१॥
कर्पूरं केशरं मांसी तेजपत्रं लवङ्गकम्।
जातीकोषफलञ्चैव सूक्ष्मैला करिपिप्पली॥ ३३२॥

गुञ्जापरिमिता वटी कार्य्या। भावनाद्रव्याणां स्वरसाभावात् क्वाथो-ऽपि ग्राह्यः॥ ३१७—३२८॥

तन्त्रान्तरोक्तमहाज्वराङ्कुशरसे।—तुल्यमित्यत्र तुत्थमिति ग्रन्थान्तरे पाठो दृश्यते। घनपाषाणं—कान्तपाषाणम्॥ ३२९।३०॥

सर्वतोभद्ररसे।—गगनम्—अभ्रं पलार्द्धमानं, गन्धकं तोलक-

कुष्ठं तालीशपत्रञ्च धातकीचोचमुस्तकम् ।
हरीतकी च मरिचं शृङ्गबेरं विभीतकम् ॥ ३३३ ॥
पिप्पल्यामलकञ्चैव शाणभागं विचूर्णितम् ।
सर्वमेकीकृतं पिष्ट्वा वटीं कुर्य्याद् द्विगुञ्जिकाम् ॥ ३३४ ॥
भक्षयेत् पर्णखण्डेन मधुना सितयाऽपि वा ।
रोगं ज्ञात्वाऽनुपानञ्च प्रातः कुर्य्याद् विचक्षणः ॥ ३३५ ॥
हन्ति मन्दानलान् सर्वान् आमदोषं विसूचिकाम् ।
पित्तश्लेष्मभवं रोगं वातश्लेष्मभवं तथा ॥ ३३६ ॥
आनाहं मूत्रकृच्छ्रञ्च संग्रहग्रहणीं वमिम् ।
अम्लपित्तं शीतपित्तं रक्तपित्तं विशेषतः ॥ ३३७ ॥
चिरज्वरं पित्तभवं धातुस्थं विषमज्वरम् ।
कासं पञ्चविधं हन्ति कामलां पाण्डुमेव च ॥ ३३८ ॥
सर्वलोकहितार्थाय शिवेन कथितः पुरा ।
सर्वतोभद्रनामायं रसः साक्षात् महेश्वरः ॥ ३३९ ॥

अथ बृहज्ज्वरान्तकलौहम् ।—

रसं गन्धं तोलकञ्च जातीकोषफले तथा ।
हेमभस्म तु पादैकं तोलार्द्धं रूप्यलौहकम् ॥ ३४० ॥

मानम् । अन्यत् सर्वं तोलार्द्धम् । केशरं—नागकेशरं, फलं - जातीफलम । करिपिप्पली – गजपिप्पली । चोचं—गुड़त्वक् । शृङ्गबेरः, —शुण्ठी । प्रथमतः रसगन्धकाभ्यां कज्जली करणीया, ततः अन्यत् सर्वं प्रदेयम् ; जलेन मर्दयेत ॥ ३३१—३३९ ॥

बृहज्ज्वरान्तकलौहे, तोलकमिति ।—रसादिफलान्तं प्रत्येकं तोलक-

शिलाजत्वभ्रकञ्चैव भृङ्गराजञ्च मुस्तकम्।
केशराजमपामार्गं लवङ्गञ्च फलत्रिकम्॥ ३४१॥
वराङ्गवल्कलञ्चैव पिप्पलीमूलमेव च।
सैन्धवञ्च विड़ञ्चैव गुड़ूचीचूर्णमेव च॥ ३४२॥
कण्टकारीं रसोनञ्च धान्यकं जीरकद्वयम्।
चन्दनं देवकाष्ठञ्च दार्वीन्द्रयवमेव च॥ ३४३॥
किराततिक्तकं बालं तोलकञ्च समाहरेत्।
द्वितोलं मरिचं देयं भावयेदार्द्रकद्रवैः॥ ३४४॥
माषार्द्धं भक्षयेत् प्रातर्मधुना मधुरीकृतम्।
ज्वरं नानाविधं हन्ति शुक्रस्थं चिरकालजम्॥ ३४५॥
साध्यासाध्यविचारोऽत्र नैव कार्य्यो भिषग्वरैः।
अन्तर्धातुगतञ्चैव नाशयेन्नात्र संशयः॥ ३४६॥
भूतोत्थं श्रमजञ्चापि सन्निपातज्वरं तथा।
असाध्यञ्च ज्वरं हन्ति यथा सूर्य्योदयस्तमः॥ ३४७॥

भागं, हेमभस्म तु पादैकमिति एकभागापेक्षया पादैकम्। वराङ्ग-वल्कलं—गुड़त्वक्। गुड़ूचीचूर्णमित्यत्र गुड़ूचीसत्त्वमिति व्यवहरन्ति वृद्धाः। रसोनं—रसोनकन्दं, तच्च दुग्धेन परिशोधितं ग्राह्यम्। भाव-येदार्द्रकद्रवैरिति।—आर्द्रकरसैः सप्तवारं भावयेत्। मात्रा विचार्य्य प्रदेया। विचारस्तु दोषदूष्यबलापेक्षः। बृहज्ज्वरान्तकलौहं नागा-र्ज्जुनीयसिद्धप्रयोगतन्त्रोक्तम्। पूर्णमात्रकत्वात् तत्र पाठान्तरं दृश्यते; यथा,—"रसं गन्धं पलार्द्धञ्च जातीकोषफले तथा। हेमभस्म तु कर्षार्द्धं निरुत्थं तत्र निक्षिपेत्॥ किरातितिक्तकं बालं पलार्द्धञ्च समाहरेत्।

गरुड़ञ्च समालोक्य यथा सर्पः पलायते ।
तथैवास्य प्रसादेन ज्वरः सोपद्रवो ध्रुवम् ॥ ३४८ ॥
बलदं पुष्टिदञ्चैव मन्दाग्निनाशनं परम् ।
वीर्य्यस्तम्भकरञ्चैव कामलापाण्डुरोगनुत् ॥ ३४९ ॥
सदा तु रमते नारीं न वीर्य्यं चयतां व्रजेत् ।
प्रमेहं विविधञ्चैव विविधां ग्रहणीं तथा ।
अनुपानविशेषेण सर्वव्याधिं विनाशयेत् ॥ ॥ ३५० ॥

अथ चूड़ामणिरसः ।—

मृतं सूतं प्रबालञ्च स्वर्णं तारञ्च वङ्गकम् ।
शुल्वं मुक्ता तीक्ष्णमभ्रं सर्वमेकत्र योजयेत् ॥ ३५१ ॥
पिष्ट्वा जलेन वटिका कार्य्या वल्लप्रमाणतः ।
धातुस्थं सन्निपातोत्थं ज्वरं विषमसम्भवम् ॥ ३५२ ॥
कामशोकसमुद्भूतं त्रिदोषजनितं तथा ।
कासं श्वासञ्च विविधं शूलं सर्वाङ्गसम्भवम् ॥ ३५३ ॥

पलमूषणजं चूर्णं भावयेदार्द्रकै रसैः ॥" इति। ग्रन्थकारेण तु पाद-मात्रामवलम्ब्य प्रतिसंस्कृत्य च लिखितमिति । अत्र तोलकशब्देन पलं ग्रहणीयं, दीपिकाकारस्य अर्द्धव धिकाकारस्य च तथैव सम्मतत्वात् ; तस्मात् हीनमात्राऽन्वितस्याप्यस्य नैव गुणहानिः। दीपिकाकारस्तु— "तोलार्द्धं रूप्यलौहकम्" इत्यत्र रूप्यं लौहञ्च प्रत्येकमेव तोलार्द्धं ग्राह्य-मित्याह। केचित् तु "निरुत्थं तत्र निक्षिपेत्" इति ज्यायान् पाठः इत्याहुः। जीर्णज्वरविनाशकलौहप्रधानभेषजत्वात् अत्र लौहस्य मात्रा-याम् अनुक्तायाम् अपि सर्वद्रव्यसमत्वं ज्ञेयम्। इति ॥ ३४०—३५० ॥

चूड़ामणिरसे।—मृतसूतं—रससिन्दूरं, शुल्वं—ताम्रं, तीक्ष्णं—

शिरोरोगं कर्णशूलं दन्तशूलं गलग्रहम् ।
वातपित्तसमुद्भूतं ग्रहणीं सर्वसम्भवाम् ॥ ३५४ ॥
आमवातं कटीशूलमग्निमान्द्यं विसूचिकाम् ।
अर्शांसि कामलां मेहं मूत्रकृच्छ्रादिकञ्च यत् ॥ ३५५ ॥
तत्सर्वं नाशयत्याशु विष्णुचक्रमिवासुरान् ।
चूड़ामणिरसो ह्येष शिवेन परिकीर्त्तितः ॥ ३५६ ॥

अथ भानुचड़ामणिः ।—

सुवर्णं रससिन्दूरं प्रबालं वङ्गमेव च ।
लौहं ताम्रं तेजपत्रं यमानीं विश्वभेषजम् ॥ ३५७ ॥
सैन्धवं मरिचं कुष्ठं खदिरं द्विहरिद्रकम् ।
रसाञ्जनं माक्षिकञ्च समभागञ्च कारयेत् ॥ ३५८ ॥
वारिणा वटिका कार्य्या रक्तिद्वयप्रमाणतः ।
भक्षयेत् प्रातरुत्थाय सर्वज्वरकुलान्तकृत् ॥ ३५९ ॥

अथ वृहच्चूड़ामणिरसः ।—

कस्तूरिकाविद्रुमरौप्यलौहं तालं हिरण्यं रससिन्दुरञ्च ।
सुवर्णसिन्दूरलवङ्गमुक्ताः चोचं घनं माक्षिकराजपट्टम् ॥३६०॥

लौहम् ; अत्र सर्वं समभागम् ; वल्लप्रमाणतः,—गुञ्जाद्वयमिता ॥ ३५१
— ३५६ ॥

भानुचूड़ामणिरसे ।— द्विहरिद्रकमिति हरिद्रा दारुहरिद्रा च ॥३५७
—३५९ ॥

वृहच्चूड़ामणिरसे ।—विद्रुमं—प्रबालं, लौहं—कान्तलौहं, घनं—मुस्तकम् ; माक्षिकं—स्वर्णमाक्षिकम् ; राजपट्टं—कान्तपाषाणं,

गोक्षुरजातीफलजातिकोषं मरीचकर्पूरशिखिग्रिवञ्च ।
प्रगृह्य सर्वं हि समं प्रयत्नात् अथाश्वगन्धाद्विगुणं हि वैद्यैः ॥३६१॥

वक्ष्यमाणौषधैर्भाव्यं प्रत्येकं मुनिसंख्यया ।
निर्गुण्डीफञ्जिकावासा-रविमूलत्रिकण्टकैः ॥ ३६२ ॥
तद्योग्यं कथयिष्यामि वातिकं पैत्तिकं ज्वरम् ।
कफोद्भवं द्विदोषोत्थं त्रिदोषजनितं तथा ॥ ३६३ ॥
सन्ततं सततं हन्ति तृतीयकचतुर्थकौ ।
ऐकाहिकं द्व्याहिकञ्च विषमं भूतसम्भवम् ॥ ३६४ ॥
नाशयेदचिरादेव वृक्षमिन्द्राशनिर्यथा ।
चूड़ामणिरसो ह्येष शिवेन परिभाषितः ॥ ३६५ ॥

अथ बृहज्ज्वरचूड़ामणिरसः ।—

स्वर्णं सुवर्णसिन्दूरं लौहं तारं मृगाण्डजाम् ।
जातीफलं जातीकोषं लवङ्गञ्च त्रिकण्टकम् ॥ ३६६ ॥
कर्पूरं गगनञ्चैव चोचं मुषलतालकम् ।
प्रत्येकं कर्षमानन्तु तुरङ्गञ्च द्विकार्षिकम् ॥ ३६७ ॥

शिखिग्रीवं—तुत्थकं, सममित्येकभागसमम् ; अश्वगन्धाया एकभागापेक्षया द्वैगुण्यम् । मुनिसङ्ख्ययेति—सप्तवारं, फञ्जिका—ब्राह्मणयष्टिका । रविमूलम्—अर्कमूलम् । प्रयोगे चास्मिन् रससिन्दूर गोक्षुर-मरिच-शिखिग्रीव-शब्दान्तर्गत-उकार-ऊकार-ईकार-इकारादीनां ह्रस्व-दीर्घताव्यत्यासः छन्दोऽनुरोधान्न दोषावहः इति सङ्क्षेपः ॥ ३६०—३६५ ॥

बृहज्ज्वरचूड़ामणिरसे ।—मृगाण्डजा—कस्तूरी, त्रिकण्टकं—गोक्षुरं, गगनम्—अभ्रं, मुषलतालकम्—तालमूली. मुषलीतालकौ इत्यपरे,

विद्रुमं भस्मसूतञ्च मौक्तिकं माक्षिकं तथा।
राजपट्टं शिखिग्रीवं सर्वं सञ्चूर्ण्य यत्नतः।
खल्ले तु चूर्णमादाय भावयेत् परिकीर्त्तितैः॥ ३६८॥
निर्गुण्डीफञ्जिकावासा-रविमूलत्रिकण्टकैः।
ज्वरमष्टविधं हन्ति साध्यासाध्यमथापि वा॥ ३६९॥

इति रसेन्द्रसारसंग्रहे ज्वराधिकारः।

अथ ज्वरातीसार-चिकित्सा।—

अथ मृतसञ्जीवनी वटी।—

मागधी वत्सनाभश्च तयोस्तुल्यञ्च हिङ्गुलम्।
मृतसञ्जीवनी ख्याता जम्बीररसमर्दिता॥ १॥

तन्न युक्तम्; तन्त्रान्तरेषु हरितालस्य पृथक्तया निर्देशाभावात्, तुरङ्ग—गन्धकं, भस्मसूतं—रससिन्दूरं, राजपट्ट—कान्तपाषाणम्। स्वर्णसिन्दूरादितालान्तं प्रत्येकं कर्षमानं, तथा तुरङ्गादिशिखिग्रीव-पर्य्यन्तं प्रत्येकं द्विकर्षम्; एतत् सर्वमेकीकृत्य निर्गुण्ड्यादिरसैः सप्तवारं भावयेत्॥ ३६६—३६९॥

इति ज्वराधिकारः।

ज्वरे सति उपद्रवत्वेन अतीसारस्य सम्भवात् ज्वरानन्तरं ज्वरातीसार उच्यते। माधवेन तु तल्लक्षणं पृथक् नोक्तं, ज्वरातीसारयोः मेलकत्वात्।

मूलकस्य च वीजानां वटिका तुल्यरूपिणी ।
पानीया शीततोयेन ज्वरातीसारनाशिनी ।
विसूच्यां सन्निपाते च ज्वरे चैवातिदुस्तरे ॥ २ ॥

अथ आनन्दभैरवो रसः ।—

हिङ्गुलञ्च विषं व्योषं टङ्गणं गन्धकं समम् ।
जम्बीररससंयुक्तं मर्दयेत् यामकद्वयम् ॥ ३ ॥
कासश्वासातिसारेषु ग्रहण्यां सान्निपातिके ।
अपस्मारेऽनिले मेहेऽप्यजीर्णे वह्निमान्द्यके ।
गुञ्जामात्रः प्रदातव्यो रस आनन्दभैरवः ॥ ४ ॥

अथ अमृतार्णवो रसः ।—

हिङ्गुलोत्थो रसो लौहं टङ्गणं गन्धकं शटी ।
धान्यकं बालकं मुस्तं पाठाऽजाजी घुणप्रिया ॥ ५ ॥
प्रत्येकं तोलकं चूर्णं छागीदुग्धेन पेषयेत् ।
माषैका वटिका कार्य्या रसोऽयममृतार्णवः ॥ ६ ॥

उक्तं हि सिद्धसारे,—"ज्वरातिसारयोरुक्तं निदानं यत् पृथक् पृथक् । तत् स्यात् ज्वरातिसारस्य तेन नात्रोदितं पुनः ॥" इति । ननु एवं चिकित्साऽपि भविष्यतीति चेत्? नैवं, मिलितयोः वर्द्धनात् । उक्तं हि—"ज्वरातिसारयोरुक्तं भेषजं यत् पृथक् पृथक् । न तन्मिलितयोः कार्य्यमन्योऽन्यं वर्द्धयेत् यतः ॥" इति । प्रायेण हि ज्वरहरमौषधमनुलोमनम्, अतीसारहरञ्च स्तम्भनमिति परस्परविरुद्धत्वात् मिलितयोः न कार्य्यमित्यर्थः । मृतसञ्जीवनीवटिकायाम् ।—मागधी—पिप्पली ॥ १—४ ॥

अमृतार्णवरसे ।—अजाजी—जीरकम्; घुणप्रिया—अतिविषा;

वटिकां भक्षयेत् प्रातर्गहनानन्दभाषिताम्।
धान्यजीरकयूषेण विजयाशणबीजतः॥ ७॥
मधुना छागदुग्धेन मण्डेन शीतवारिणा।
कदलीमोचकरसैः कञ्चटद्रवकेण च॥ ८॥
अतिसारं जयेदुग्रमेकजं द्वन्द्वजं तथा।
दोषत्रयसमुद्भूतमुपसर्गसमन्वितम्॥ ९॥
शूलघ्नो वह्निजननो ग्रहण्यर्शोविकारनुत्।
अम्लपित्तप्रशमनः कासघ्नो गुल्मनाशनः॥ १०॥

अथ सिद्धप्राणेश्वरो रसः।—

गन्धेशाभ्रं पृथग्वेद-भागमन्यच्च भागिकम्।
स्वर्जिटङ्गयवक्षाराः पञ्चैव लवणानि च॥ ११॥
वराव्योषेन्द्रबीजानि द्विजीराग्नियमानिकाः।
सहिङ्गुबीजसारञ्च शतपुष्पा सुचूर्णिता॥ १२॥
सिद्धप्राणेश्वरः सूतः प्राणिनां प्राणदायकः।
माषैकं भक्षयेदस्य नागवल्लीदलैर्युतम्॥ १३॥
उष्णोदकानुपानञ्च दद्यात् तत्र पलत्रयम्।
ज्वरातिसारेऽतिसृतौ केवले वा ज्वरेऽपि वा॥ १४॥

धान्यजीरकयूषेणेति।—यूषयोनित्वात् प्रचुरतरं मुद्गं प्रदातव्यम्; "विजयाशणबीजतः" इत्यत्र "विजयाशालबीजतः" इति पाठान्तरम्। आणकमिता मात्रा व्यवह्रियतेऽधुना॥ ५—१०॥

सिद्धप्राणेश्वररसे।—ईशः,—पारदः। स्वर्जिः,—सर्जिक्षारः; टङ्ग—

ज्वरे त्रिदोषजे घोरे ग्रहण्यादिगदेऽपि च ।
वातरोगे तथा शूले शूले च परिणामजे ॥ १५ ॥

अथ अभ्रवटिका ।—

अथ शुद्धस्य सूतस्य गन्धकस्याभ्रकस्य च ।
प्रत्येकं कर्षमानन्तु ग्राह्यं रसगुणैषिणा ॥ १६ ॥
ततः कज्जलिकां कृत्वा व्योषचूर्णं प्रदापयेत् ।
केशराजस्य भृङ्गस्य निर्गुण्ड्याश्चित्रकस्य च ॥ १७ ॥
ग्रीष्मसुन्दरकस्याथ जयन्त्याः स्वरसं तथा ।
मण्डूकपर्ण्याः स्वरसं तथा शक्राशनस्य च ॥ १८ ॥
श्वेतापराजितायाश्च स्वरसं पर्णसम्भवम् ।
दापयेद्रसतुल्यञ्च विधिज्ञः कुशलो भिषक् ॥ १९ ॥
रसतुल्यं प्रदातव्यं चूर्णं मरिचसम्भवम् ।
देयं रसार्द्धभागेन चूर्णं टङ्कणसम्भवम् ॥ २० ॥
शुभे शिलामये पात्रे घर्षणीयं प्रयत्नतः ।
शुष्कमातपसंयोगाद् वटिकां कारयेद् भिषक् ॥ २१ ॥
कलायपरिमाणान्तु खादेत् तान्तु प्रयत्नतः ।
दृष्ट्वा वयश्चाग्निबलं यथाव्याध्यनुपानतः ॥ २२ ॥

टङ्गणक्षारः ; वरा—त्रिफला, इन्द्रवीजम्—इन्द्रयवः, वीजसारं—विड़ङ्गम् । अत्र पारदाभ्रगन्धकानां प्रत्येकं चतुर्गुणम्, अन्येषान्तु चतुर्थांशमितम् । द्विकर्षमिते पारदे कर्षार्द्धः स्वर्जिक्षारः ; एवमन्यत् । माषार्द्धमात्रं प्रयुज्यते ॥ ११—१५ ॥

अभ्रवटिकायां व्योषचूर्णमपि कर्षमानम् । केशराजादीनां स्वरसः

हन्ति कासं क्षयं श्वासं वातश्लेष्मभवां रुजम्।
परं वाजीकरः श्रेष्ठो बलवर्णाग्निवर्द्धकः॥ २३॥
ज्वरे चैवातिसारे च सिद्ध एष प्रयोगराट्।
नातः परतरः श्रेष्ठो विद्यतेऽभ्ररसायनात्॥ २४॥
भोजने शयने पाने नास्त्यत्र नियमः क्वचित्।
दधि चावश्यकं भक्ष्यं प्राह नागार्जुनो मुनिः॥ २५॥

अथ कनकसुन्दरो रसः।—

हिङ्गुलं मरिचं गन्धं टङ्गणं पिप्पलीं विषम्।
कनकस्य च वीजानि समांशं विजयाद्रवैः।
मर्दयेद् याममात्रन्तु चणमात्रा वटी कृता॥ २६॥
भक्षणाद् ग्रहणीं हन्ति रसः कनकसुन्दरः।
अग्निमान्द्यं ज्वरं तीव्रमतिसारञ्च नाशयेत्।
दध्यन्नं दापयेत् पथ्यं सदा तक्रौदनं हितम्॥ २७॥

अथ कनकप्रभा वटी।—

सुवर्णवीजं मरिचं मराल-पादं कणा टङ्गणकं विषञ्च।
गन्धं जयाऽह्निर्दिवसं विमर्द्य गुञ्जाप्रमाणां वटिकां विदध्यात्॥२८॥
ज्वरातिसारग्रहणीं ज्वराग्नि-मान्द्यं निहन्यात् कनकप्रभेयम्।
दध्योदनं भोज्यमनुष्णवारि मांसं भजेत्तित्तिरिलावकानाम्॥२९॥

सूतोऽन्मितो देयः। ग्रीष्मसुन्दरकः,—तिक्तरसः सूक्ष्मपत्रशाकविशेषः, "गीमा" इति वङ्गभाषा। टङ्गणसम्भवं चूर्णं—टङ्गणलाजाः॥ १६—२५॥

कनकसुन्दररसे।—टङ्गणमित्यत्र अभ्रकमिति केचित् पठन्ति। विजयाद्रवैरिति।—विजया—शक्राशनं, तस्या द्रवः क्वाथः॥ २६।२७॥

अथ कारुण्यसागररसः ।—

भस्मसूताद्विधा गन्धं तथा द्वित्वं मृताभ्रकम् ।
दिनं सार्षपतैलेन पिष्ट्वा यामं विपाचयेत् ॥ ३० ॥
रसैर्मार्कवमूलोत्थैः पिष्ट्वा यामं विपाचयेत् ।
त्रिक्षारपञ्चलवण-विषव्योषाग्निजीरकैः ॥ ३१ ॥
सविड़ङ्गैस्तुल्यभागैरयं कारुण्यसागरः ।
माषमात्रं ददीताऽस्य भिषक् सर्वातिसारके ॥ ३२ ॥
सज्वरे विज्वरे वाऽपि सशूले शोणितोद्भवे ।
निरामे शोथयुक्ते वा ग्रहण्यां सान्निपातिके ।
अनुपानं विनाप्येष कार्य्यसिद्धिं करिष्यति ॥ ३३ ॥

अथ वृहत्कनकसुन्दरो रसः ।—

शुद्धसूतं समं गन्धं मरिचं टङ्कणं तथा ।
स्वर्णवीजं समं मर्द्यं भार्गीद्रावैर्दिनार्द्धकम् ॥ ३४ ॥
सूततुल्यं मृतञ्चाभ्रं रसः कनकसुन्दरः ।
अस्य गुञ्जाद्वयं हन्ति पित्तातीसारमुग्रकम् ॥ ३५ ॥

कनकप्रभावटिकायाम् ।—सुवर्णवीजं—कृष्णधुस्तूरवीजम् । मराल-पादं—यानकुनीति ख्याता । जयाऽग्निरिति—विजयारसैः ॥ २८।२९ ॥

कारुण्यसागररसे ।—गन्धको द्विगुणः ; रसभस्मनोऽभावे शुद्धसूतस्य भागैकम् । विपाचयेदिति ।—वालुकायन्त्रके मृत्कर्पटे वा विपाचयेत् । मार्कवमूलं—भृङ्गराजमूलम् । समभागानि त्रिक्षारादिविड़ङ्गान्तानि पञ्चदश द्रव्याणि प्रत्येकं मिलितरसादीनां समानि मिश्रयेदित्यर्थः ॥ ३०—३३ ॥

वृहत्कनकसुन्दररसे ।—स्वर्णवीजं—कृष्णधुस्तूरवीजम् ॥ ३४।३५ ॥

अथ मृतसञ्जीवनो रसः ।—

रसगन्धौ समौ ग्राह्यौ सूतपादं विषं क्षिपेत् ।
सर्वतुल्यं मृतञ्चाभ्रं मर्द्यं धुस्तूरजैर्द्रवैः ॥ ३६ ॥
सर्पाक्ष्याश्च द्रवैर्यामं कषायेणाथ भावयेत् ।
धातक्यतिविषा मुस्तं शुण्ठी-जीरक-बालकम् ॥ ३७ ॥
यमानी धान्यकं विल्वं पाठा पथ्या कणान्विता ।
कुटजस्य त्वचं वीजं कपित्थं दाड़िमं बलाम् ॥ ३८ ॥
प्रत्येकं कर्षमात्रं स्यात् कुट्टितं क्वाथयेत् जलैः ।
चतुर्गुणं जलं दत्त्वा यावत् पादावशेषितम् ॥ ३९ ॥
अनेन त्रिदिनं भाव्यं पूर्वोक्तं मर्दितं रसम् ।
रुद्ध्वा तद्वालुकायन्त्रे क्षणं मृद्वग्निना पचेत् ॥ ४० ॥
मृतसञ्जीवनो नाम चास्य गुञ्जाचतुष्टयम् ।
दातव्यमनुपानेन चासाध्यमपि साधयेत् ॥ ४१ ॥
षट्प्रकारमतीसारं साध्यासाध्यं जयेत् ध्रुवम् ।
नागरातिविषा मुस्तं देवदारु कणा वचा ॥ ४२ ॥
यमानी बालकं धान्यं कुटजत्वक् हरीतकी ।
धातकीन्द्रयवौ विल्वं पाठा मोचरसं समम् ।
चूर्णितं मधुना लेह्यमनुपानं सुखावहम् ॥ ४३ ॥

मृतसञ्जीवनरसे ।—रसगन्धौ समौ समभागौ, तेन द्वयोर्मिलितयोः कर्षः, विषमर्द्धतोलकम् ; सर्पाक्षी—शालिञ्ची, रास्नेति केचित् । कषायेणेति ।—वक्ष्यमाणधातक्यादिजलेन । धातक्यादिबलान्तानि सप्तदश द्रव्याणि प्रत्येकं कर्षमात्रं गृहीत्वा क्वाथयेत्, तेन क्वाथेन त्रिदिनं विमर्द्य,

अथ प्राणेश्वरो रसः ।—

रसगन्धकमभ्रञ्च टङ्गणं शतपुष्पकम् ।
यमानी जीरकाख्यञ्च प्रत्येकं कर्षयुग्मकम् ॥ ४४ ॥
कर्षमेकं यवक्षारं हिङ्गुपटुकपञ्चकम् ।
विड़ङ्गेन्द्रयवं सर्ज-रसकश्चाग्निसंज्ञितम् ।
घृष्ट्वा च वटिका कार्य्या नाम्ना प्राणेश्वरो रसः ॥ ४५ ॥

ज्वरातीसारलक्षणम् ।—

पित्तज्वरे पित्तभवोऽतिसारस्तथातिसारे यदि वा ज्वरः स्यात् ।
दोषस्य दूष्यस्य समानभावात् ज्वरातिसारः कथितो भिषग्भिः ॥४६॥

[इति ज्वरातीसार चिकित्सा ।]

तत् हण्डिकामध्ये स्थापयेत् ; ततः खल्पशरावेण आच्छाद्य, सन्धिं रुद्ध्वा च बालुकाभिः हण्डिकामापूर्य्य (चणमिति—दण्डचतुष्टयं) पचेदित्यर्थः ॥ ३६—४३ ॥

प्राणेश्वररसे ।—पटुकपञ्चकं—पञ्चलवणं, सर्जरसः,—धूनकः, अग्निसंज्ञितः,—चित्रकः ॥ ४४—४६ ॥

अथ अतीसार-चिकित्सा ।—

अथ अतीसारवारणो रसः ।—

दरदं कृतकर्पूरं मुस्तेन्द्रयवसंयुतम् ।
सर्वातीसारशमनं खाखसीच्चीरभावितम् ॥ १ ॥

अथ पूर्णचन्द्रोदयो रसः ।—

शुद्धञ्च तालकं लौहं गगनञ्च पलं पलम् ।
कर्पूरं पारदं गन्धं प्रत्येकं वटकोन्मितम् ॥ २ ॥
जातीकोषमुरापत्रं शटीतालीशकेशरम् ।
व्योषं चोचं कणामूलं लवङ्गं पिचुसम्मितम् ॥ ३ ॥
भक्षयेत् प्रातरुत्थाय गुरुदेवद्विजार्च्चकः ।
नानारूपमतीसारं ग्रहणीं सर्वरूपिणीम् ॥ ४ ॥
अम्लपित्तं तथा शूलं शूलञ्च परिणामजम् ।
हन्याद्रसायनश्चायं वाजीकरण उत्तमः ॥ ५ ॥

ज्वरोपद्रवस्य अतीसारस्य चिकित्सामभिधाय सम्प्रति स्वतन्त्रस्य अतीसारस्य चिकित्सामाह, दरदमित्यादि ।—कृतकर्पूरं—पक्वकर्पूरम् । खाखसीचीरम्—अहिफेनम् ॥ १ ॥

पूर्णचन्द्रोदयरसे ।—वटकोन्मितमिति—माषकाष्टकपरिमितम् । मुरा—मुरामांसी, पत्रं—तेजपत्रम् । चोचं—गुड़त्वक् । पिचुसम्मितम्—कर्षमानम् ॥ २—५ ॥

अथ कणाद्यं लौहम् ।—

कणानागरपाठाभिस्त्रिवर्गत्रितयेन च ।
विल्वचन्दनह्रीबेरैः सर्व्वातीसारजिद्भवेत् ॥ ६ ॥
सर्वोपद्रवसंयुक्तामपि हन्ति प्रवाहिकाम् ।
नानेन सदृशं लौहं विद्यते ग्रहणीहरम् ॥ ७ ॥

अथ वृहद्गगनसुन्दरो रसः ।—

पारदं गन्धकञ्चाभ्रं लौहञ्चापि वराटकम् ।
रूप्यं चातिविषं कर्षं समभागं प्रकल्पयेत् ॥ ८ ॥
धान्यशुण्ठीकृतक्वाथैर्भावयेच्च पृथक् पृथक् ।
गुञ्जाप्रमाणां वटिकां कारयेत् कुशलो भिषक् ॥ ८ ॥
भक्षयेत् प्रातरुत्थाय गुरुदेवद्विजार्चकः ।
दग्धविल्वं गुड़ेनैव कुर्य्यात् तदनुपानकम् ॥ १० ॥
अजादुग्धेन वा पेयं जम्बूत्वक्साधितं रसम् ।
अतीसारे ज्वरे घोरे ग्रहण्यामरुचौ तथा ॥ ११ ॥
सामे सशूले रक्ते च पिच्छास्रावे भ्रमे तथा ।
शोथे रक्तातिसारे च संग्रहग्रहणीषु च ॥ १२ ॥

लोकनाथो रसः ।—

भस्मसूतस्य भागैकं चतुरः शुद्धगन्धकात् ।
क्षिप्त्वा वराटिकागर्भे टङ्कणेन निरुध्य च ॥ १३ ॥
भाण्डे रुद्ध्वा पुटे पाच्यं स्वाङ्गशीतं समुद्धरेत् ।
लोकनाथरसो नाम क्षौद्रैर्गुञ्जाचतुष्टयम् ॥ १४ ॥

कणाद्यलौहे ।—"त्रिवर्गत्रितयेन च" इति ।—त्रिकटु-त्रिफला-त्रिमदैः ॥ ६—१२ ॥

नागरातिविषामुस्तं देवदारुवचान्वितम्।
कषायमनुपानन्तु सर्व्वातीसारनाशनः ॥ १५ ॥

चिन्तामणिरसः।—

शुद्धसूतं मृतं ताम्रं गन्धकं प्रतिकार्षिकम्।
चूर्णयेद्विषकर्षार्द्धं विषार्द्धं तिन्तिड़ीफलम् ॥ १६ ॥
मर्दयेत् खल्लमध्ये तु चाम्लेन गोलकीकृतम्।
गर्त्तं षड़ङ्गुलं कुर्य्यात् सर्वतो वर्त्तुलं शुभम् ॥ १७ ॥
नागवल्ल्याः क्षिपेत् पत्रमादौ पात्रे च गोलकम्।
आच्छाद्य तच्च पात्रेण रुद्ध्वा गजपुटे पचेत् ॥ १८ ॥
स्वाङ्गशीतं समुद्धृत्य सपत्रञ्च विशेषतः।
कर्षार्द्धं मरिचं दत्त्वा कर्षार्द्धं तिन्तिड़ीफलम् ॥ १९ ॥
गुञ्जामितां वटीं कुर्य्यात् चिन्तामणिरसो महान्।
अतिसारे त्रिदोषोत्थे संग्रहग्रहणीगदे।
अनुपानं विधातव्यं यथादोषानुसारतः ॥ २० ॥

लोकनाथरसे।—चतुर्गुणं गन्धकं दत्त्वा रससिन्दूरं संपिष्य, कपर्दक-गर्भकोटरे निवेशयेत्। मुखानि च तेषाम् अजाक्षीरेण टङ्कणं पिष्ट्वा, तेन निरुन्ध्यात्, ततः गजपुटे पचेत् ॥ १३—१५ ॥

चिन्तामणिरसे।—प्रतिकार्षिकमिति—प्रत्येकं कर्षपरिमितम्। तिन्तिड़ीफलं—पक्वतिन्तिड़ीफलम्; अम्लेन—काञ्जिकेन। पारदादिकं सर्वं काञ्जिकेन मर्दयित्वा वर्त्तुलं पिण्डं कुर्य्यात्। तस्य च पिण्डस्य अभ्यन्तरे षड़ङ्गुलमितं गर्त्तं कृत्वा ताम्बूलपत्रं निदध्यात्; ततः तस्य पिण्डस्य सर्वाङ्गं ताम्बूलदलेन छादयित्वा, मृत्कर्पटाभ्यन्तरे निरुध्य मृदा संलिप्य च गजपुटे पचेत्। अथ स्वाङ्गशीतं समुद्धृत्य सपत्रं पिण्डं चूर्ण-

अहिफेनवटिका।—

अहिफेनं सखर्जूरं दत्त्वा गुञ्जैकमात्रकम्।
रक्तस्रावमतीसारमतिव्रद्धं विनाशयेत्॥ २१॥

महागन्धकं सर्वाङ्गसुन्दरश्च।—

रसगन्धकयोः कर्षं ग्राह्यमेकं सुशोधितम्।
ततः कज्जलिकां कृत्वा मृदुपाकेन साधयेत्॥ २२॥
जातीफलं तथा कोषं लवङ्गारिष्टपत्रके।
सिन्धुवारदलञ्चैव एलावीजं तथैव च॥ २३॥
एषाञ्च कर्षमात्रेण तोयेनाथ विमर्दयेत्।
मुक्तागृहे पुनः स्थाप्यं पुटपाकेन साधयेत्॥ २४॥
घनपङ्कं वहिर्लिप्त्वा पुटमध्ये निधापयेत्।
गुञ्जाषट्कप्रमाणेन प्रत्यहं भक्षयेन्नरः॥ २५॥
एतत् प्रोक्तं कुमाराणां रक्षणाय महौषधम्।
ज्वरघ्नं दीपनञ्चैव बलवर्णप्रसाधनम्॥ २६॥
दुर्वारं ग्रहणीरोगं जयत्येव प्रवाहिकाम्।
सूतिकाञ्च जयेदेतद्रक्तार्शो रक्तसम्भवम्॥ २७॥

यित्वा यथोक्तमानेन मरिचचूर्णेन तिन्तिड़ीफलेन च सह मेलयेत्॥ १६—२०॥

अहिफेनवटिकायाम्।—खर्जूरं—पिण्डखर्जूरम्॥ २१॥

महागन्धके।—रसगन्धकयोः प्रत्येकं कर्षः, जातीफलादीनामपि चतुर्णां प्रत्येकं कर्षः। आदौ कज्जलीं वक्ष्यमाणरसपर्पटीवत् पचेत्, ततः सर्वमेकीकृत्य जलेन पिष्ट्वा एकस्मिन् मुक्तागृहे (शुक्तौ) औषधं

पिशाचा दानवा दैत्या बालानां विघ्नकारकाः।
यत्रौषधवरस्तिष्ठेत् तत्र सीमां न यान्ति ते ॥ २८ ॥
बालानां गदयुक्तानां स्त्रीणाञ्चैव विशेषतः।
महागन्धकमेतद्धि सर्वव्याधिनिसूदनम्।
विना पाकेन सर्वाङ्गसुन्दरोऽयं प्रकीर्त्तितः ॥ २९ ॥
ग्रहण्यां ये रसाः प्रोक्तास्तेऽतीसारे प्रकीर्त्तिताः ॥ ३० ॥
इति रसेन्द्रसारसंग्रहे द्वितीयाध्यायेऽतीसारचिकित्सा।

अथ ग्रहणीरोग-चिकित्सा।—

—०*०—

जातीफलादिग्रहणीकपाटो रसः।—

जातीफलं टङ्कणमभ्रकञ्च धुस्तूरबीजं समभागचूर्णम्।
भागद्वयं स्यादहिफेनकस्य गन्धालिकापत्ररसेन मर्द्यम् ॥ १ ॥
चणप्रमाणा वटिका विधेया यत्नाद्विदध्याद् ग्रहणीगदेषु।
सामेषु रक्तेषु सशूलकेषु पक्केष्वपक्केषु गुदामयेषु ॥ २ ॥

संस्थाप्य, अपरेण आच्छाद्य कदलीपत्रेण वेष्टयित्वा घनपङ्केनालिप्य लघुपुटे करीषाग्निमध्ये प्रक्षिपेत्; यदा बहिरारक्तता भवति, मधुरः पाकगन्धश्च विसर्पति, तदैवाकृष्य ग्राह्यः; तदवस्थयैव वटी कार्य्या। यथा व्याध्यनुपानं षट् रक्तिकाः खाद्याः। बालकानामुदरामयादावति प्रशस्तम् ॥ २२—३० ॥

[इति अतीसाराधिकारः।]

ग्रहण्यतीसारयोः परस्परं कार्य्यकारणभावसम्बन्धादनन्तरं ग्रहणी-

रोगेषु दद्यादनुपानभेदैर्मधुप्रयुक्तां ग्रहणीगदेषु ।
पथ्यं सदध्योदनमत्र देयं रसोत्तमोऽयं ग्रहणीकपाटः ॥ ३ ॥

अपरग्रहणीकपाटो रसः ।—

टङ्कणक्षारगन्धाभ्र-रसं जातीफलं तथा ।
विल्वं खदिरसारञ्च जीरकञ्च मधूलिका ॥ ४ ॥
कपिहस्तकवीजञ्च तथा चोरकपुष्पकम् ।
एषां भागं समादाय सूक्ष्मचूर्णञ्च कारयेत् ॥ ५ ॥
विल्वपत्रककार्पास-फलं शालिञ्च दुग्धिकाम् ।
शालिञ्चमूलं कुटजं तथा कञ्चटपत्रकम् ॥ ६ ॥
सर्वेषां स्वरसेनैव वटिकां कारयेद्भिषक् ।
रक्तिकैकप्रमाणेन खादयेत् दिवसत्रयम् ॥ ७ ॥
दधिमस्तु ततः पेयं पलमात्रप्रमाणतः ।
अपि योगशताक्रान्तां ग्रहणीमुद्धतां जयेत् ॥ ८ ॥
आमशूलं ज्वरं कासं श्वासञ्चैव प्रवाहिकाम् ।
रक्तस्रावकरं द्रव्यं कार्य्यं नैवात्र युक्तितः ॥ ९ ॥
कृष्णवार्त्ताकुमत्स्यञ्च दधि तक्रञ्च शस्यते ।
ज्ञात्वा वायोः कृतिं तत्र तैलं वारि प्रदापयेत् ॥ १० ॥

चिकित्सितमुच्यते ।—तत्र जातीफलादिग्रहणीकपाटरसे ।—समभागचूर्णमिति—प्रत्येकं समभागम् । गन्धालिका प्रसारणी ; गुदामये—अर्शोरोगे ॥ १-३ ॥

अपरग्रहणीकपाटरसे ।—टङ्कणं—टङ्कणलाजाः ; क्षारः,—यवक्षारः ; विल्वं विल्वशलाटुः । मधूलिका मूर्वा, कपिहस्तकबीजं—शूकशिम्बीबीजम् । दुग्धिका—चोरिका । एषां विल्वपत्रादीनां स्वरसः

जातीफलाद्या वटिका।—

अभ्रस्य सूतस्य च गन्धकस्य प्रत्येकशो माषचतुष्टयञ्च।
विधाय शुद्धोपलपात्रमध्ये सुकज्जलीं वैद्यवरः प्रयत्नात्॥ ११॥
जातीफलं शाल्मलिवेष्टमुस्तं सटङ्गणं सातिविषं सजीरम्।
प्रत्येकमेषां मरिचस्य शाण-प्रमाणमेकं विषमाषकञ्च॥ १२॥
विचूर्ण्य सर्वाण्यवलोड्य पश्चात् विभावयेत् पत्ररसैरमीषाम्।
इन्द्राणिकेन्द्राशनकस्य जम्बू जयन्तिका दाड़िम-केशराजौ।
अविद्धकर्णाऽपि च भृङ्ग-राजौ विभाव्य सम्यक् वटिका विधेया॥१३॥
कोलास्थिमानाथ बहुप्रकारं सामं निहन्यादनिलान् गदांश्च।
कुर्य्याद्विशेषादनलप्रवृद्धिं कासञ्च पञ्चात्मकमम्लपित्तम्॥ १४॥
इयं निहन्याद् ग्रहणीमसाध्यां मर्त्यस्य जीर्णग्रहणीं प्रवृद्धाम्।
असारकत्वं त्वतिसारमुग्रं श्वासं तथा पाण्डुमरोचकञ्च॥ १५॥
चिरोद्भवां संग्रहकोष्ठदुष्टिं जयेद्भृशं योगशतैरसाध्याम्।
अनेकसम्भावितमर्त्यलोका नानाविधव्याधि-पयोधि-नौका॥१६॥

सप्ताहं भावयेत्। "जीरकञ्च मधूलिका" इत्यत्र "जीरकं श्वेतधूनकम्" तथा—"तथा चोरकपुष्पकम्" इत्यत्र "तथैव वकपुष्पकम्" इति पाठान्तरम्॥ ४—१०॥

जातीफलाद्या वटिकायाम्।—"अभ्रस्य सूतस्य" इत्यत्र "विशुद्ध-सूतस्य" इति पाठान्तरम्। उपलपात्रमध्ये—पाषाणखल्ले, शाल्मलिवेष्टं—मोचरसं, छन्दोऽनुरोधात् ह्रस्वः। इन्द्राणिका—निर्गुण्डी; इन्द्राशनकः,—विजया; अविद्धकर्णा—अम्बष्ठकी; भृङ्ग-राजौ—भृङ्गराजकेशराजा, असारकत्वम्—अन्नसारकत्वं, तच्च वातातीसारे भवति॥ ११—१६॥

पूर्णकलावटी ।—

रसं गन्धं घनं लौहं धातकीपुष्पविल्वकम् ।
विषं कुटजवीजञ्च पाठा जीरकधान्यकम् ॥ १७ ॥
रसाञ्जनं टङ्गणञ्च शिलाजतु पलं तथा ।
अभ्रांशञ्च फलं ग्राह्यं प्रत्येकं तोलकत्रयम् ॥ १८ ॥
भेकपर्णी पञ्चमूली बलाकञ्चटदाड़िमम् ।
शृङ्गाटं केशरं जम्बू दधिमस्तु जयन्तिका ॥ १९ ॥
केशराजो भृङ्गराजः प्रत्येकं तोलकद्वयम् ।
द्विमाषा वटिका कार्य्या तक्रेण परिषेविता ॥ २० ॥
इयं पूर्णकला नाम ग्रहणीगदनाशिनी ।
शूलघ्नो दाहशमनी वह्निदा ज्वरनाशिनी ।
भ्रमच्छर्दिच्छेदकरी संग्रहग्रहणीं जयेत् ॥ २१ ॥

वज्रकपाटो रसः ।—

पारदं गन्धकञ्चैव अहिफेनं समोचकम् ।
त्रिकटु त्रैफलञ्चैव सममेकत्र कारयेत् ॥ २२ ॥
भङ्गभृङ्गद्रवैस्त्वैतद् भावयेच्च पुनः पुनः ।

पूर्णकलावटिकायाम् ।—घनं—मुस्तकम्, एषामभ्रान्तानां प्रत्येकं कर्षमानम् । फलं—त्रिफला, तच्च प्रत्येकं तोलकत्रयमिति । पञ्चमूली—स्वल्पा पञ्चमूली । केचित्तु घनशब्देनात्र मुस्तकस्थाने अभ्रमिच्छन्ति; तेषां मते—रसो गन्धश्च तोलकपरिमितः, घनादिफलान्तानां तु प्रत्येकं तोलकत्रयमिति दिक् ॥ १७—२१ ॥

रक्तित्रयं ततश्चास्य मधुना सह भक्षयेत्।
असाध्यां ग्रहणीं हन्ति रसो वज्रकपाटकः ॥ २३ ॥

जातीफलरसः।—

पारदाभ्रकसिन्दूरं गन्धं जातीफलं समम्।
कुटजस्य फलञ्चैव धूर्त्तवीजानि टङ्कणम् ॥ २४ ॥
व्योषं मुस्ताऽभया चैव चूतवीजं तथैव च।
विल्वकं सर्जवीजञ्च दाड़िमीफलवल्कलम् ॥ २५ ॥
एतानि समभागानि निक्षिपेत् खल्लमध्यतः।
विजयास्वरसेनैव मर्दयेत् सूक्ष्मचूर्णितम् ॥ २६ ॥
गुञ्जाफलप्रमाणान्तु वटिकां कारयेद्भिषक्।
एकां कुटजमूलत्वक्-कषायेण प्रयोजयेत् ॥ २७ ॥
आमातिसारं हरति कुरुते वह्निदीपनम्।
मधुना विल्वशुण्ठेन रक्तग्रहणिकां जयेत् ॥ २८ ॥
शुण्ठीधान्यकयोगेन चातिसारं निहन्त्यसौ।
जातीफलरसो ह्येष ग्रहणीगदनाशनः ॥ २९ ॥

ग्रहणीगजेन्द्रो रसः।—

रसगन्धकलौहानि शङ्खटङ्कणरामठम्।
शटीतालीशमुस्तानि धान्यजीरकसैन्धवम् ॥ ३० ॥

वज्रकपाटरसे।—मोचकं—शाल्मलीवेष्टकं, सममिति—समभागम्; भङ्गः,—विजया; भावयेच्च पुनः पुनरिति—सप्तवारम् ॥ २२।२३ ॥

जातीफलरसे।—सिन्दूरं—रससिन्दूरम्। चूतवीजम्—आम्रास्थिमज्जा। विजयास्वरसेन इति।—अत्र स्वरसाभावात् सिद्धिकाथेनापि भवितुमर्हति ॥ २४—२९ ॥

धातक्यतिविषा शुण्ठी गृहधूमो हरीतकी ।
भल्लातकं तेजपत्रं जातीफललवङ्गकम् ॥ ३१ ॥
त्वगेला बालकं बिल्वं मेथी शक्राशनं समम् ।
छागीदुग्धेन वटिका रसवैद्येन कारिता ॥ ३२ ॥
गहनानन्दनाथेन भाषितेयं रसायने ।
वटी गजेन्द्रसंज्ञेयं श्रीमता लोकरक्षणे ॥ ३३ ॥
ग्रहणीं विविधां हन्ति ज्वरातीसारनाशिनी ।
शूलगुल्माम्लपित्तानि कामलाञ्च हलीमकम् ॥ ३४ ॥
बलवर्णाग्निजननी सेविता च चिरायुषी ।
कण्डूं कुष्ठं विसर्पञ्च गुदभ्रंशं क्रिमिं जयेत् ॥ ३५ ॥
माषद्वयां वटीं खादेच्छागीदुग्धानुपानतः ।
वयोऽग्निबलमावीक्ष्य युक्त्या वा त्रुटिवर्द्धनम् ॥ ३६ ॥

पीयूषवल्लीरसः ।—

सूतमभ्रं गन्धकञ्च तारं लौहं सटङ्कणम् ।
रसाञ्जनं माक्षिकञ्च शाणमेकं पृथक् पृथक् ॥ ३७ ॥

ग्रहणीगजेन्द्ररसे ।—भल्लातकस्थाने रक्तचन्दनं प्रयोजयन्ति केचित् । शक्राशनं—विजया, तस्या वीजं ग्राह्यम् । "माषद्वयां वटीम्" इति—पूर्णमालापेक्षया । वयोऽग्निबलमिति—रोगिणः वयोऽग्निबलं सम्यक् विविच्य । युक्त्या इति ।—चरकीयविमानाध्यायोक्तविधिना वृद्धवैद्य-व्यवहारोपदेशाभ्यां वा निर्दिष्टाया अपि मात्रायाः ह्रासवृद्धी कर्त्तव्ये ॥ ३०—३६ ॥

पीयूषवल्लीरसे ।—तारं—रौप्यं, माक्षिकं—स्वर्णमाक्षिकम्,

लवङ्गं चन्दनं मुस्तं पाठा जीरकधान्यकम्।
समङ्गाऽतिविषा लोध्रं कुटजेन्द्रयवं त्वचम्॥ ३८॥
जातीफलं विश्वविल्वं कनकं दाड़िमीच्छदम्।
समङ्गा धातकी कुष्ठं प्रत्येकं रससम्मितम्॥ ३८॥
भावयेत् सर्वमेकत्र केशराजरसः पुनः।
चणकाभा वटी कार्य्या छागीदुग्धेन पेषिता॥ ४०॥
अनुपानं प्रदातव्यं दग्धविल्वं समं गुड़ैः।
हन्ति सर्वानतीसारान् ग्रहणीं चिरजामपि॥ ४१॥
आमसम्पाचनो सम्यग् वह्निवृद्धिकरस्तथा।
पीयूषवल्लीनामायं ग्रहणीरोगनाशनः॥ ४२॥

ग्रहणीशार्दूलरसः।—

रसगन्धकयोश्चापि कर्षमेकं सुशोधितम्।
द्वयोः कज्जलिकां कृत्वा हाटकं षोड़शांशतः॥ ४३॥
लवङ्गं निम्बपत्रञ्च जातीकोषफले तथा।
एतेषां कर्षचूर्णेन सूक्ष्मैलां सह मेलयेत्॥ ४४॥
मुक्तागृहे च संस्थाप्य पुटपाकेन साधयेत्।
गुञ्जापञ्चप्रमाणेन प्रत्यहं भक्षयेत् नरः॥ ४५॥

समङ्गा—वराहाक्रान्ता, विश्वं—विल्वशलाटुः। आदौ केशराजरसे सप्तधा विभाव्य, पश्चात् छागीदुग्धेन निष्पिष्य वटिका कार्य्या। "शाणमेकम्" इत्यत्र "कोलमेकम्" तथा "कनकम्" इत्यत्र "बालकम्" इति पाठ-द्वयम् आयुष्कल्पसुहृद्भिरादृतम्॥ ३७—४२॥

ग्रहणीशार्दूलरसे।—मिलितयोः रसगन्धकयोः कर्षमेकं ग्राह्यम्। "हाटकं षोड़शांशतः" इति।—कर्षमानापेक्षया स्वर्णभस्म षोड़शांशम्।

सूतिकां ग्रहणीरोगं हरत्येष सुनिश्चितम् ।
अर्शोघ्नो दीपनश्चैव बलपुष्टिप्रसाधनः ॥ ४६ ॥
कासश्वासातिसारघ्नो बलवीर्य्यकरः परः ।
दुर्वारं ग्रहणीरोगमामशूलञ्च नाशयेत् ।
संसारलोकरक्षार्थं पुरा रुद्रेण भाषितः ॥ ४७ ॥

श्रीवैद्यनाथवटी ।—

शाणं रसस्य संगृह्य काञ्जिकेन तु शोधयेत् ।
चित्रकस्य रसेनापि त्रिफलायाश्च बुद्धिमान् ॥ ४८ ॥
रसार्द्धं गन्धकं शुद्धं भृङ्गराजरसेन वै ।
द्वाभ्यां संमूर्च्छनं कृत्वा स्वरसैः शाणसम्मितैः ॥ ४९ ॥
खल्लयेच्च शिलाखण्डे क्रमशो वक्ष्यमाणकैः ।
निर्गुण्डीमधुकश्वेता-कुठेरग्रीष्मसुन्दरैः ॥ ५० ॥
भृङ्गाब्दकेशराजैश्च जयेन्द्राशनकोल्कटैः ।
सर्षपाभां वटीं कृत्वा दद्यात् तां ग्रहणीगदे ॥ ५१ ॥
सामवातेऽग्निमान्द्ये च ज्वरे प्लीहोदरेषु च ।
वातश्लेष्मविकारेषु तथा श्लेष्मगदेषु च ।
अम्लतक्रादिसेवाञ्च कुर्वीत स्वेच्छया बहु ॥ ५२ ॥

लवङ्गादीनां प्रत्येकं कर्षमानम् ; एतत् सर्वमेकीकृत्य शुक्तिसम्पुटे कृत्वा पुटपाकवत् पचेदित्यर्थः । अत्र महागन्धकयोगवत् लघुपुटे पाकः कार्य्यः, अन्यथा लवङ्गादीनां भस्मसम्भवः, तस्माच्च गुणहानिः ॥४३—४७॥

श्रीवैद्यनाथवटिकायाम् ।—जया—जयन्ती । निर्गुण्ड्यादि उत्कटान्तस्थले क्वचित् पाठान्तरं दृश्यते ; तद्यथा,—"निर्गुण्डी-मण्डूकी-

श्रीमता वैद्यनाथेन लोकानुग्रहकारिणा ।
स्वप्नान्ते ब्राह्मणस्येयं भाषिता लिखितेन तु ॥ ५३ ॥

रसपर्पटिका ।—

याऽम्लपित्ते विधातव्या गुड़िका च क्षुधावती ।
तत्र प्रोक्तविधा शुद्धौ समानौ रसगन्धकौ ॥ ५४ ॥
संमर्द्य कज्जलाभौ तु कुर्य्यात् पात्रे दृढ़ाश्रये ।
ततो बादरवह्निस्थ-लौहपात्रे द्रवीकृतम् ॥ ५५ ॥
गोमयोपरि विन्यस्त-कदलीपत्रपातनात् ।
कुर्य्यात् पर्पटिकाकारमस्य रक्तिद्वयं क्रमात् ॥ ५६ ॥
रक्तिद्वादशकं यावत् प्रयोगः प्रहरार्द्धतः ।
तदूर्द्ध्वं बहुपूगस्य भक्षणं दिवसे पुनः ॥ ५७ ॥
तृतीय एव मांसाज्य-दुग्धाद्यत्र विधीयते ।
वर्ज्यं विदाहि स्त्री रम्भा-मूलं तैलञ्च सार्षपम् ॥ ५८ ॥

श्वेता-कुचेला-ग्रीष्मसुन्दरैः । भृङ्गाह्व केशराजैश्च जयन्तीन्द्राशनोत्कटैः ॥" इति ; तथा "उत्कटैः" इत्यत्र "इत्कटैः" इत्यपि, एवं "श्लेष्मगदेषु च" इत्यनन्तरम् क्वचित्—"दधिमस्तु विनिक्षिप्य मर्दयित्वा यथाबलम् । दातव्या गुटिकाः सप्त रोगिणे ग्रहणीगदे ॥" इत्यधिकः पाठः ॥ ४८—५३ ॥

रसपर्पटीमाह,—याऽम्लेत्यादि । तत्रेति ।—तत्र—क्षुधावत्याम् । प्रोक्तेति ।—या विधा यो रसगन्धकशुद्धिप्रकारो वक्तव्यस्तया शुद्धावित्यर्थः । शुद्धपारद कर्ष १, गन्धक कर्ष १, एतद्द्वयं खल्ले तावद् घर्षणीयं यावत् निश्चन्द्रं कज्जलाभं भवति । ततो लौहदर्व्विकायामेतच्चूर्णं दत्त्वा, बदरा-

कृष्णमत्स्याम्बुजखगंस्त्यक्त्वोन्निद्रः पयः पिबेत् ।
ग्रहणीक्षयकुष्ठार्शः-शोथाजीर्णविनाशिनी ॥ ५९ ॥
रसपर्पटिका ख्याता निबद्धा चक्रपाणिना ॥ ६० ॥

विजयपर्पटी ।—

हाटकं रजतं ताम्रं यद्यत्र परिदीयते ।
विजयाख्या तु सा ज्ञेया सर्वरोगनिसूदनी ॥ ६१ ॥

स्वर्णपर्पटी ।—

रसोत्तमं पलं शुद्धं हेम तोलकसंयुतम् ।
शिलायां मर्द्दयेत् तावत् यावदेकत्वमागतम् ॥ ६२ ॥
गन्धकस्य पलञ्चैकमयःपात्रे ततो दृढ़े ।
मर्दयेत् दृढ़पाणिभ्यां यावत् कज्जलतां व्रजेत् ॥ ६३ ॥
ततः पाकविधानज्ञः पर्पटीं कारयेत् सुधीः ।
रक्तिकादिक्रमेणैव योजयेदनुपानतः ।
ग्रहणीं विविधां हन्ति वृष्या सर्वज्वरापहा ॥ ६४ ॥

ङ्गारोपरि विन्यस्य लौहदण्डेन सञ्चाल्य च यदा द्रवीभूतं भवति, तदा आर्द्रगोमयपिण्डोपरिस्थापितकोमलकदलीपत्रे ढालयित्वा अपरकदलीपत्रेण संपीड्य पर्पटिकाकृतिः कार्य्या। "रक्तिद्वयं क्रमात्" इति।—प्रथमं गुञ्जायुगलं प्रतिदिनमेकैकवृद्धितो भक्ष्यमिति क्रमादित्यस्यार्थः ॥ ५४—६० ॥

विजयपर्पटीमाह, हाटकमित्यादि ।—यदा रसपर्पटिकायां सूततुल्यं स्वर्णं रजतं ताम्रञ्च दीयते, तदा सा विजयाख्या ज्ञेया ॥ ६१ ॥

स्वर्णपर्पटिकायाम् ।—रसोत्तमः,—हिङ्गुलोत्थः पारदः। "पर्पटीं कारयेत्" इति।—रसपर्पटीविधिवत् पचेदित्यर्थः ॥ ६२—६४ ॥

अथ पञ्चामृतपर्पटी।—

अष्टौ गन्धकमाषका रसदलं लौहं तदर्द्धं शुभम्
लौहार्द्धञ्च वराभ्रकं सुविमलं ताम्रं तथाऽभ्रार्द्धिकम्।
पात्रे लौहमये च मर्द्दनविधौ चूर्णीकृतञ्चैकतो
दर्व्या बादरवह्निनाऽतिमृदुना पाकं विदित्वा दले॥ ६५॥
रम्भाया लघु ढालयेत् पटुरियं पञ्चामृता पर्पटी
ख्याता क्षौद्रघृतान्विता प्रतिदिनं गुञ्जाद्वयं वृद्धितः।
लौहे मर्द्दनयोगतः सुविमलं भच्यक्रिया लौहवत्
गुञ्जाऽष्टावथवा त्रिकं त्रिगुणितं सप्ताहमेवं भजेत्॥ ६६॥
नानावर्णग्रहण्यामरुचिसमुदये दुष्टदुर्नामकादौ
छर्द्यां दीर्घातिसारे ज्वरभवकसिते रक्तपित्ते क्षयेऽपि।
वृष्याणां वृष्यराज्ञी बलिपलितहरा नेत्ररोगैकहन्त्री
तत्स्थं दीप्तस्थिराग्निं पुनरपि नवकं रोगिदेहं करोति॥ ६७॥

पाकोऽस्याः त्रिविधः प्रोक्तो मृदुर्मध्यः खरस्तथा।
आद्ययोर्दृश्यते सूतः खरपाके न दृश्यते॥ ६८॥
मृदौ न सम्यग्भङ्गः स्यात् मध्ये भङ्गश्च रौप्यवत्।
खरे लघुर्भवेद्भङ्गो रूक्षः स्निग्धोऽरुणच्छविः।
मृदुमध्यौ तथा खाद्यौ खरस्त्याज्यो विषोपमः॥ ६९॥

पञ्चामृतपर्पटिकायाम्।—"अष्टौ गन्धकमाषका रसदलम्" इति भट्टादिसम्मतः पाठः; पाश्चात्यास्तु माषका इत्यत्र तोलका इति पठन्ति। अन्ये तु—"रसदलम्" इत्यत्र "रसपलम्" इति पठन्ति। ये तु रस-पलमिच्छन्तो गन्धकस्य अष्टमाषकत्वमाहुस्तन्मते पारदबाहुल्यात् पर्पट्येव

अग्निकुमारो रसः ।—

शुद्धसूतं समं गन्धं त्रिकटु पटुपञ्चकम् ।
दशकं तुल्यतुल्यञ्च विजया सर्वसम्मिता ।
भावयेच्चित्रभङ्गोत्थैस्त्रिधा च विजयाद्रवैः ॥ ७० ॥
दीप्ताग्निना तु यामैकं बालुकायन्त्रके पचेत् ।
सञ्चूर्ण्य चार्द्रकद्रावैर्भावयित्वा च भक्षयेत् ॥ ७१ ॥
मधुना शाणमानन्तु रसो ह्यग्निकुमारकः ।
दीप्ताग्निकारकः साम-ग्रहणीदोषनाशनः ॥ ७२ ॥

बड़वामुखो रसः ।—

शुद्धसूतं समं गन्धं मृतताम्राभ्रटङ्कणम् ।
सामुद्रञ्च यवक्षारं सर्जिसैन्धवनागरम् ॥ ७३ ॥
अपामार्गस्य च क्षारं पलाशवरुणस्य च ।
प्रत्येकं सूततुल्यं स्यादम्लयोगेन मर्द्दयेत् ॥ ७४ ॥
हस्तिशुण्डीद्रवैश्चाग्नौ मर्द्दयित्वा पुटेल्लघु ।
माषमात्रः प्रदातव्यो रसोऽयं बड़वामुखः ।
ग्रहणीं विविधां हन्ति संग्रहग्रहणीं ज्वरम् ॥ ७५ ॥

ग्रहणीकपाटो रसः ।—

रसगन्धकयोश्चापि जातीफललवङ्गयोः ।
प्रत्येकं शाणमानञ्च श्लक्ष्णचूर्णीकृतं शुभम् ॥ ७६ ॥

न स्यात् ; तेन गन्धकस्य अष्ट माषकाः, रसस्य च दलमर्द्धभागत्वमित्यर्थः ॥ ६५—६८ ॥

अग्निकुमाररसे ।—पटुपञ्चकं—पञ्चलवणम् ॥ ७०—७२ ॥

बड़वामुखरसे ।—सामुद्रं—करकचलवणं, सर्जिः,—स्वर्जिकाक्षारम् ।

सूर्य्यावर्त्तरसेनैव विल्वपत्ररसेन च ।
शृङ्गाटकसमुद्भूत-स्वरसेन च मर्द्दयेत् ॥ ७७ ॥
चण्डातपेन संशोष्य वटिकां कारयेद्भिषक् ।
विल्वपत्ररसेनैव दापयेद्रक्तिकाद्वयम् ॥ ७८ ॥
दध्ना च भोजनीयोऽसौ ग्रहणीरोगनाशनः ।
पाण्डुरोगमतीसारं शोथं हन्ति तथा ज्वरम् ।
अयञ्च ग्रहणीरोगे कपाटो रस उत्तमः ॥ ७९ ॥

सङ्ग्रहणीकपाटो रसः ।—

मुक्ता सुवर्णं रसगन्धटङ्कं घनः कपर्दोऽमृततुल्यभागः ।
सर्वैः समं शङ्खकचूर्णमत्र भाव्यञ्च खल्लेऽतिविषाद्रवेण ॥ ८० ॥
गोलञ्च कृत्वा मृदुकर्पटस्थं सम्पाच्य भाण्डे दिवसार्द्धकञ्च ।
सर्वाङ्गशीतो रस एष भाव्यो धुस्तूरवङ्गोर्मुषलीद्रवैश्च ॥ ८१ ॥
लौहस्य पात्रे परिभावितश्च सिद्धो भवेत् संग्रहणीकपाटः ।
संसाधितः सद्भिषजा प्रयत्नात् योगस्थितेनार्य्यसमर्च्चितेन ॥८२॥
वातोत्तरायां मरिचाज्ययुक्तः पित्तोत्तरायां मधुपिप्पलीभिः ।
कफोत्तरायां विजयारसेन कटुत्रयेणाज्ययुतो ग्रहण्याम् ॥८३॥
क्षये ज्वरे चार्शसि षट्प्रकारे सामातिसारेऽरुचिपीनसे च ।
मेहे च कृच्छ्रे गतधातुवृद्धौ गुञ्जाद्वयञ्चापि महामयघ्नः ॥ ८४ ॥

"पलाशवरुणस्य च" इति ।--पलाशस्य वरुणस्य च क्षारः । अम्लयोगेन —काञ्जिकेन ॥ ७३—७६ ॥

सङ्ग्रहणीकपाटरसे ।—घनः, अभ्रम् । अमृतं—विषम् ॥ ८०—८४ ॥

अन्यग्रहणीकपाटो रसः ।—

गिरिजाभववीजकज्जलीं परिमृद्याद्रेरसेन शोषितां ।
कुटजस्य तु भस्मना पुनर्द्विगुणेनाथ विमृद्य मिश्रिता ॥ ८५ ॥
मर्द्दयित्वा प्रदातव्यमस्य गुञ्जाचतुष्टयम् ।
अजाक्षीरेण दातव्यं क्वाथेन कुटजस्य वा ॥ ८६ ॥
यूषं देयं मसूरस्य वारिभक्तञ्च शीतलम् ।
दध्ना सह पुनर्देयं रक्तादौ रक्तिकाद्वयम् ॥ ८७ ॥
वर्द्धयेद्दशपर्य्यन्तं ह्रासयेत् क्रमशस्तथा ।
निहन्ति ग्रहणीं सर्वां विशेषात् कुक्षिमार्दवम् ॥ ८८ ॥

विजयावटिका ।—

हाटकं रजतं ताम्रं यद्यत्र परिदीयते ।
विजयाख्या तु सा ज्ञेया सर्वरोगनिसूदनी ॥ ८९ ॥

ग्रहणीकपर्दपोट्टली ।—

कपर्दतुल्यं रसकन्तु गन्धं लौहं मृतं टङ्गणकञ्च तुल्यम् ।
जयारसेनैकदिनं विमर्द्य चूर्णेन संवेष्ट्य पुटेच्च भाण्डे ।
ददीत तत् पोट्टलिकाऽभिधानं वातप्रधानग्रहणीनिवृत्त्यै ॥ ९० ॥

अन्यग्रहणीकपाटरसे ।—गिरिजावीजं—गन्धकं, भववीजं—पारदः । रक्तादाविति—रक्तातीसारादौ । "रक्तादौ" इत्यत्र "ग्रासादौ" इति पाठान्तरम् ॥ ८५—८८ ॥

ग्रहणीकपर्दपोट्टलिकायाम् ।—कपर्दतुल्यमिति—वराटभागतुल्यम् ॥ ९० ॥

हंसपोट्टली।—

दग्धान् कपर्दकान् पिष्ट्वा त्र्यूषणं टङ्कणं विषम्।
गन्धकं शुद्धसूतञ्च तुल्यं जम्बीरजैर्द्रवैः॥ ८१॥
मर्दयेत् भक्षयेन्माषं संलिह्यान्मरिचार्द्रकम्।
निहन्ति ग्रहणीरोगं पथ्यं तक्रौदनं हितम्॥ ८२॥

अन्यग्रहणीकपाटः।—

तुल्यं कान्तं रसं तालं माक्षिकं टङ्कणं तथा।
सपादनिष्कं प्रत्येकं पञ्चनिष्कं वराटकम्।
द्विनिष्कं गन्धकं सर्वं पिष्ट्वा जम्बीरजैर्द्रवैः॥ ८३॥
अर्द्धभागकरीषेण पुटितं भस्म शोभनम्।
प्रदद्यात् ग्रहणीगुल्म-क्षयकुष्ठप्रमेहके॥ ८४॥

महाग्रहणीकपाटो रसः।—

रसाभ्रगन्धान् क्रमवृद्धियुक्तान् जङ्घारसेन त्रिदिनं विमर्द्य।
जयन्तिका-भृङ्गकलम्बिनीरैः दिनं यवक्षारसटङ्कणञ्च॥ ८५॥
क्षिप्त्वा तु गन्धस्य च तुल्यभागं वातारितैलेन युतं पुटित्वा।
गुडूचिका-शाल्मलिकारसेन जयारसेनापि विमर्द्य शाणम्॥८६॥
मरीचसार्द्धं मधुना समेतं ददीत पथ्यं दधिभक्तकञ्च।
शिवेन प्रोक्तो जगतां हिताय महारसोऽयं ग्रहणीकपाटः॥८७॥

हंसपोट्टलिकामपि ग्रहणीकपर्दपोट्टलीवत् पचेत्॥ ८१।८२॥

अन्यग्रहणीकपाटे।—कान्तं—कान्तलोहम्। अर्द्धभागकरीषेणेति —करीषेणार्द्धभागपूरिते गर्त्ते इत्यर्थः॥ ८३।८४॥

महाग्रहणीकपाटरसे।—जङ्घारसेन—काकजङ्घारसेन। वातारितैलेन—एरण्डतैलेन॥ ८५—८७॥

ग्रहणीवज्रकपाटो रसः।—

सूतं गन्धं यवक्षारं जयन्त्युग्राऽभ्रटङ्कणम्।
जयन्तीभृङ्गजम्बीर-द्रवैः पिष्ट्वा दिनत्रयम्॥ ९८॥
यामार्द्धं गोलकं स्वेद्यं मन्देन पावकेन च।
शीते जयारससमैः शाल्मलीविजयाद्रवैः॥ ९९॥
भावयेत् सप्तधा वज्र-कपाटः स्यात् रसोत्तमः।
माषद्वयं त्रयं वाऽस्य मधुना ग्रहणीं जयेत्॥ १००॥

प्रकारान्तरो ग्रहणीवज्रकपाटः।—

तारमौक्तिकहेमानि सारश्चैकैकभागिकः।
द्विभागो गन्धकः सूतस्त्रिभागो मर्दयेदिमान्॥ १०१॥
कपित्थस्वरसैर्गाढ़ं मृगशृङ्गे ततः क्षिपेत्।
पुटेत् मध्यपुटेनैव तत उद्धृत्य मर्दयेत्॥ १०२॥
बलारसैः सप्तधैवमपामार्गरसैस्त्रिधा।
लोध्रप्रतिविषामुस्ता-धातकीन्द्रयवामृताः॥ १०३॥
प्रत्येकमेतत्स्वरसैर्भावना स्यात् त्रिधा त्रिधा।
माषमात्रो रसो देयो मधुना मरिचैस्तथा॥ १०४॥
हन्यात् सर्वानतीसारान् ग्रहणीं सर्वजामपि।
कपाटो ग्रहणीरोगे रसोऽयं वह्निदीपनः॥ १०५॥

ग्रहणीवज्रकपाटरसे।—उग्रा—वचा, भृङ्गः,—भृङ्गराजः॥ ९८—१००॥

प्रकारान्तरग्रहणीवज्रकपाटे।—सारः,—लौहम्; तारादिसर्वं कपित्थकस्वरसैः संमर्द्य मृगशृङ्गान्तरे कृत्वा मध्यविधपुटेनैव पचेत्; ततः बलारसादिभिर्भावयेत्। बला—"वेड़ेला" इति वङ्गभाषा,

पानीयभक्तवटी ।—

कृष्णाभ्रलौहमलशुद्धविड़ङ्गचूर्णं
प्रत्येकमेव पलिकं विधिवद्विधाय ।
चव्यं कटुत्रयफलत्रयकेशराज-
दन्तीपयोदचपलानलखण्डकर्णाः ॥ १०६ ॥
माणीलकन्दवृहतीत्रिवृताः ससूर्य्या-
वर्त्ताः पुनर्नविकया सहितास्त्वमीषाम् ।
मूलं प्रति प्रति विशोधितमत्रमेकं
चूर्णं तदर्द्धरसगन्धकमेकसंस्थम् ॥ १०७ ॥
कृत्वाऽऽर्द्रकीयरससंवलितञ्च भूयः
संपिष्य तस्य वटिका विधिवत् विधेया ।
हन्त्यम्लपित्तमरुचिं ग्रहणीमसाध्यां
दुर्नामकामलभगन्दरशोथगुल्मान् ॥ १०८ ॥
शूलञ्च पाकजनितं सतताग्निमान्द्यं
सद्यः करोत्युपचितिं चिरनष्टवह्नेः ।
कुष्ठं निहन्ति पलितञ्च बलिं प्रवृद्धां
श्वासञ्च कासमपि पाण्डुगदं निहन्ति ॥ १०९ ॥

प्रतिविषा—आतइच, धातकी—धातकीपुष्पम् । अमृता—गुडूची ॥ १०१—१०५ ॥

पानीयभक्तवटिकामाह, कृष्णाभ्रेत्यादि ।—शुद्धविड़ङ्गमिति—तुषवर्जितविड़ङ्गं, पयोदः,—मुस्ता । चपला—पिप्पली, अनलः,—चित्रकः, खण्डकर्णः,—"खारकोन" इति ख्यातः । पुनर्नविका—पुनर्नवा । तदर्द्धं

वार्य्यन्नमांस-दधिकाञ्जिकतक्रमत्स्य-
द्रवाम्लतैलपरिपक्वभुजो यथेष्टम् ।
शृङ्गाटविल्वगुड़कञ्चटनारिकेल-
दुग्धानि सर्वविदलानि विवर्जयेत् तु ॥ ११० ॥

शम्बूकादिवटी ।—

दग्धशम्बूकसिन्धूत्थं तुल्यं क्षौद्रेण मर्द्दयेत् ।
निष्ककेण निहन्त्याशु वातसङ्ग्रहणीगदम् ॥ १११ ॥

हिरण्यगर्भपोट्टलीरसः ।—

एकांशो रसराजस्य ग्राह्यो द्वौ हाटकस्य च ।
मुक्ताफलस्य चत्वारो भागाः षड् दीर्घनिस्वनात् ॥ ११२ ॥
त्र्यंशं बलेर्वराट्याश्च टङ्कणो रसपादिकः ।
पक्वनिम्बुकतोयेन सर्वमेकत्र मर्दयेत् ॥ ११३ ॥
मूषामध्ये न्यसेत् कल्कं तस्य वक्त्रं निरोधयेत् ।
गर्त्तेऽरत्निप्रमाणे तु पुटेत् त्रिंशद्वनोपलैः ॥ ११४ ॥
साङ्गशीतलतां ज्ञात्वा रसं मूषोदरात् नयेत् ।
ततः खल्लोदरे मर्द्यः सुधारूपं समुद्धरेत् ॥ ११५ ॥
एतस्यामृतरूपस्य दद्यात् गुञ्जाचतुष्टयम् ।
घृतमाध्वीकसंयुक्तमेकोनत्रिंशदूषणैः ॥ ११६ ॥

रसगन्धकमिति ।—मिलितरसगन्धकं कर्षार्द्धम् ; अन्ये तु प्रत्येकं कर्षार्द्धमाहुः । गुञ्जाद्वयमाना वटिका कार्य्या ; वार्य्यन्नं—पर्य्युषितान्नं, द्रवाम्लं—मद्याऽऽर्द्रकम् ॥ १०६—१११ ॥

हिरण्यगर्भपोट्टलिकायाम् ।—दीर्घनिस्वनं—कांस्यं, बलेः,—गन्ध-

मन्दाग्नौ रोगसङ्घे च ग्रहण्यां विषमज्वरे।
गुदाङ्कुरे महाशूले पीनसे श्वासकासयोः ॥ ११७ ॥
अतीसारे ग्रहण्याञ्च श्वयथौ पाण्डुके गदे।
सर्वेषु कुष्ठरोगेषु यकृत्प्लीहोदरेषु च ॥ ११८ ॥
वातपित्तकफोत्थेषु द्वन्द्वजेषु त्रिजेषु च।
दद्यात् सर्वेषु रोगेषु श्रेष्ठमेतत् रसायनम् ॥ ११९ ॥

रसाभ्रवटी।—

शुद्धसूतस्य कर्षैकं कर्षैकं गन्धकस्य च।
द्वयोः कज्जलिकातुल्यं व्योमचूर्णं प्रदापयेत् ॥ १२० ॥
केशराजस्य भृङ्गस्य निर्गुण्ड्याश्चित्रकस्य च।
ग्रीष्मसुन्दरमण्डूकी-जयन्तीन्द्राशनस्य च ॥ १२१ ॥
श्वेतापराजितायाश्च स्वरसं पर्णसम्भवम्।
रसतुल्यं प्रदातव्यं चूर्णञ्च मरिचोद्भवम् ॥ १२२ ॥
देयं रसार्द्धभागेन चूर्णं टङ्कणसम्भवम्।
संमर्द्य वटिकां कुर्य्यात् कलायसदृशीं बुधः ॥ १२३ ॥
हन्ति कासं क्षयं श्वासं वातश्लेष्मभवां रुजम्।
ज्वरे चैवातिसारे च सिद्ध एष प्रयोगराट् ॥ १२४ ॥
चातुर्थके ज्वरे श्रेष्ठो ग्रहण्यातङ्कनाशनः।
दधि चावश्यकं देयं प्राह नागार्जुनो मुनिः ॥ १२५ ॥

कस्य। अत्र "लंशम्" इत्यत्र "हंशम्" तथा "पक्वनिम्बुक" इत्यत्र "पक्वतिन्दुक" इति पाठान्तरम्। गुदाङ्कुरः,—अर्शः ॥११२—११६॥

अन्योऽग्निकुमारः ।—

रसं गन्धं विषं व्योषं टङ्गणं लौहभस्मकम् ।
अजमोदाऽहिफेनञ्च सर्वतुल्यं मृताभ्रकम् ॥ १२६ ॥
चित्रकस्य कषायेण मर्दयेद् यामसप्तकम् ।
मरिचाभां वटीं खादेदजीर्णं ग्रहणीं तथा ।
नाशयेन्नात्र सन्देहो गुह्यमेतच्चिकित्सितम् ॥ १२७ ॥

नृपतिवल्लभो रसः ।—

जातीफललवङ्गाब्द-त्वगेलाटङ्गरामठम् ।
जीरकं तेजपत्रञ्च यमानीविश्वसैन्धवाः ॥ १२८ ॥
लौहमभ्रं रसो गन्धस्ताम्रं प्रत्येकशः पलम् ।
मरिचं द्विपलं दत्त्वा छागीक्षीरेण पेषयेत् ॥ १२९ ॥
धात्रीरसेन वा पेष्यं वटिकाः कुरु यत्नतः ।
श्रीमद्गहननाथेन विचिन्त्य परिनिर्मितः ॥ १३० ॥
सूर्य्यवत् तेजसा चायं रसो नृपतिवल्लभः ।
अष्टादशवटीं खादेत् पवित्रः सूर्य्यदर्शकः ॥ १३१ ॥
हन्ति मन्दानलं सर्वमामदोषं विसूचिकाम् ।
प्लीहगुल्मोदराष्ठीला-यकृत्पाण्डुत्वकामलाम् ॥ १३२ ॥
सर्वानेव गदान् हन्ति चण्डांशुरिव पापहा ।
बलवर्णकरो हृद्य आयुष्यो वीर्य्यवर्द्धनः ॥ १३३ ॥
परं वाजीकरः श्रेष्ठः पटुदो मन्त्रसिद्धिदः ।
अरोगी दीर्घजीवी स्याद्रोगी रोगाद्विमुच्यते ॥ १३४ ॥

रसाभ्रवटिकायाम् ।—व्योषचूर्णं—कृष्णाभ्रचूर्णम् ॥ १२०—१२७ ॥

रसस्यास्य प्रसादेन बुद्धिमान् जायते नरः।
बदरास्थिप्रमाणेन वटिकां कारयेत् भिषक्॥ १३५॥

राजवल्लभो रसः।—

जातीफललवङ्गाब्द-त्वगेलाटङ्करामठम्।
जीरकं तेजपत्रञ्च यमानी विश्वसैन्धवम्॥ १३६॥
लौहमभ्रं सताम्रञ्च रसगन्धकमेव च।
मरिचं त्रिवृता रूप्यं प्रत्येकं द्विपलोन्मितम्॥ १३७॥
धात्रीरसे वटीं कुर्य्यात् द्विगुञ्जाफलमानतः।
हन्ति शूलं तथा गुल्ममामवातं सुदारुणम्॥ १३८॥
हृच्छूलं पार्श्वशूलञ्च चक्षुःशूलं हलीमकम्।
शिरःशूलं कटीशूलमानाहञ्चाष्टशूलकम्॥ १३९॥
क्रिमिकुष्ठानि दद्रूणि वातरक्तं भगन्दरम्।
उपदंशमतीसारं ग्रहण्यर्शःप्रवाहिकाम्।
राजवल्लभनामाऽयं महेशेन प्रकाशितः॥ १४०॥

वृहन्नृपवल्लभः।—

रसगन्धकलौहाभ्रं नागं चित्रं त्रिवृत्समम्।
टङ्कं जातीफलं हिङ्गु त्वगेलाब्दलवङ्गकम्॥ १४१॥
तेजपत्रमजाजी च यमानी विश्वसैन्धवम्।
प्रत्येकं तोलकं चूर्णं मरीचतारयोस्तथा॥ १४२॥
निरुत्थकं मृतं हेम तथा द्वादशरत्तिकम्।
आर्द्रकस्य रसेनैव धात्र्याश्च स्वरसेन च॥ १४३॥
भावयित्वा प्रदातव्यो माषद्वयप्रमाणतः।

भक्षयेत् प्रातरुत्थाय पथ्यं भक्षेत् यथेप्सितम् ॥ १४४ ॥
अग्निमान्द्यमजीर्णञ्च दुर्नामग्रहणीं जयेत् ।
आमाजीर्णप्रशमनः सर्वरोगनिसूदनः ।
नाशयेदौदरान् रोगान् विष्णुचक्रमिवासुरान् ॥ १४५ ॥

महाराजनृपतिवल्लभो रसः ।—

कर्षत्रयं मृतं कान्तं मृताभ्रं मृततास्रकम् ।
मृतं तारं माक्षिकञ्च कर्षं कर्षं प्रदापयेत् ॥ १४६ ॥
मृतं स्वर्णं मृतं तारं टङ्कणं शृङ्गमेव च ।
वशिरं दन्तिमूलञ्च मरिचं तेजपत्रकम् ॥ १४७ ॥
यमानीं बालकं मुस्तं शुण्ठकञ्च सधान्यकम् ।
सिन्धूद्भवं सकर्पूरं विड़ङ्गं चित्रकं विषम् ॥ १४८ ॥
पारदं गन्धकञ्चैव तोलमानं प्रदापयेत् ।
तोलद्वयं त्रिवृच्चूर्णं लवङ्गं तच्चतुर्गुणम् ॥ १४९ ॥
जातीकोषफलञ्चैव तत्समं स्याद्दराङ्कम् ।
सर्वेषामर्द्धभागन्तु विड़कं तत्र मिश्रयेत् ॥ १५० ॥
सर्वमेकीकृतं यद्यत् त्रुटिचूर्णञ्च तत्समम् ।
भावना च प्रदातव्या छागोदुग्धेन सप्तधा ॥ १५१ ॥
मातुलुङ्गरसैः पश्चात् भावयेत् सप्तवारकम् ।
छायाशुष्कां वटीं कृत्वा भक्षयेद्दशरक्तिकाम् ॥ १५२ ॥

नृपतिवल्लभे ।—अब्दः,—मुस्तकम् । 'मरिचं द्विपलम्" इत्यत्र "मरिचं त्रिपलम्" इति पाठान्तरम् ॥ १२८—१४५ ॥

महाराजनृपतिवल्लभे ।—कान्तं—कान्तलौहं, शृङ्गी—कर्कटशृङ्गी,

मन्दानलं संग्रहणीं प्रवृद्धामामानुबन्धां क्रिमिपाण्डुरोगम्।
छर्द्यम्लपित्तं हृदयामयञ्च गुल्मोदरानाहभगन्दरञ्च ॥ १५३ ॥
अर्शांसि वै पित्तकृतानशेषान् सामं सशूलाष्टकमेव हन्ति।
साजीर्णविष्टम्भविसर्पदाहं विलम्बिकाञ्चाप्यलसं प्रमेहम् ॥१५४॥
कुष्ठान्यशेषाणि च कासशोषं हन्यात् सशोथं ज्वरमूत्रकृच्छ्रम्।
मतान्तरे सर्वसुभद्रनामा महेश्वरेणैव विभाषितोऽयम् ॥ १५५ ॥

अन्यो महाराजनृपतिवल्लभो रसः।—

माक्षिकं लौहमभ्रञ्च वङ्गं रजतहाटकम्।
ग्रन्थिः यमानिका चोचं ताम्रं नागरटङ्कणम् ॥ १५६ ॥
सैन्धवं बालकं मुस्तं धन्याकं गन्धकं रसम्।
शृङ्गी कर्पूरकञ्चैव प्रत्येकं माषकोन्मितम् ॥ १५७ ॥
माषद्वयं रामठं स्यात् मरिचानां चतुष्टयम्।
जातीकोषं लवङ्गञ्च पत्रञ्च तोलकोन्मितम् ॥ १५८ ॥
नाभिशङ्खं विडङ्गञ्च शाणं माषद्वयं विषम्।
कर्षषट्कं सत्रिमाषं सूक्ष्मैलानां ततः क्षिपेत् ॥ १५९ ॥
विड़ं कर्षद्वयं सर्वं छागीक्षीरेण पेषयेत्।
चतुर्गुञ्जमितं खादेत् सानाहग्रहणीं जयेत् ॥ १६० ॥
शम्भुना निर्मितो ह्येष पूर्ववत् गुणकारकः।
नाम्ना महाराजपूर्वो नृपवल्लभ उच्यते ॥ १६१ ॥

[इति ग्रहणीरोग-चिकित्सा।]

वशिरं—गजपिप्पली। तोलमानमिति—प्रत्येकं तोलकमानम्। त्रुटि-चूर्णञ्च तत्सममिति।—मिलितसर्वचूर्णसमं सूक्ष्मैलाचूर्णमित्यर्थः ॥ १४६—१६१ ॥ इति ग्रहणीरोग-चिकित्सा।

अथार्शः-चिकित्सा।

—–०*०—–

चक्रेश्वरो रसः।—

चतुर्भागं शुद्धसूतं पञ्च टङ्कणमभ्रकम्।
त्रिदिनं भावयेद् घर्म्मे द्रवैः श्वेतपुनर्नवैः॥ १॥
द्विगुञ्जं भक्षयेन्नित्यं वातदुर्नामशान्तये।
सिद्धश्चक्रेश्वरो नाम रसश्चार्शःकुलान्तकः॥ २॥

तीक्ष्णमुखो रसः।—

मृतसूतार्कहेमाभ्रं तीक्ष्णं मुण्डञ्च गन्धकम्।
मण्डरञ्च समं ताप्यं मर्द्यं कन्याद्रवैर्दिनम्॥ ३॥
अन्धमूषागतं सर्वं ततः पाच्यं दृढाग्निना।
चूर्णितं सितया सार्धं खादेत् तच्चार्शसां हितम्।
रसस्तीक्ष्णमुखो नाम चासाध्यमपि साधयेत्॥ ४॥

अर्शःकुठारो रसः।—

शुद्धसूतं द्विधा गन्धं मृतलौहञ्च ताम्रकम्।
प्रत्येकं द्विपलं दन्ती त्र्यूषणं शूरणं तथा॥ ५॥

पूर्वोक्तसङ्गत्यैव ग्रहण्यनन्तरमर्शश्चिकित्सितमुच्यते। तत्र प्रथमं चक्रेश्वररसमाह, शुद्धसूतमिति।—सूतश्चात्र सूतभस्म, अथवा समानो गन्धको देयः॥ १।२॥

तीक्ष्णमुखरसे।—तीक्ष्णं मुण्डञ्चेति—तीक्ष्णलौहं मुण्डलौहञ्च; ताप्यं—स्वर्णमाक्षिकम्॥ ३।४॥

शुभाटङ्कयवक्षार-सैन्धवं पलपञ्चकम्।
पलाष्टकं स्नुहीक्षीरं द्वात्रिंशच्च गवां जलैः॥ ६॥
आपिण्डितं पचेदग्नौ खादेत् माषद्वयं ततः।
रसश्चार्शःकुठारोऽयं सर्वरोगकुलान्तकः॥ ७॥

चक्राख्यो रसः।—

मृतसूताभ्रवैक्रान्तं ताम्रं कांस्यं समं समम्।
सर्वतुल्येन गन्धेन दिनं भल्लातकैर्द्रवैः॥ ८॥
मर्दयेत् यत्नतः पश्चात् वटीं कुर्य्यात् द्विगुञ्जिकाम्।
भक्षणाद्गुदजान् हन्ति द्वन्द्वजान् सर्वजानपि॥ ९॥

नित्योदितो रसः।—

मृतसूताभ्रलौहार्क-विषं गन्धं समं समम्।
सर्वतुल्यन्तु भल्लात-फलमेकत्र चूर्णयेत्॥ १०॥
द्रवैः शूरणकन्दोत्थैः खल्ले मर्द्यं दिनत्रयम्।
लिह्यादाज्यैर्माषमात्रं रसश्चार्शांसि नाशयेत्।
नित्योदितो रसो नाम गुदोद्भवकुलान्तकः॥ ११॥

अर्शःकुठाररसे।—शुभा - वंशलोचना॥ ५—७॥

चक्राख्यरसे।—वैक्रान्तं—दग्धहीरकं, तत्र भल्लातकस्यापि भागैकं ग्राह्यम्॥ ८।९॥

नित्योदितरसमाह, मृतसूतेत्यादि।—मृतसूतस्थाने शुद्धसूतेति केचित् पठन्ति। सूतादि-गन्धान्तानि षट् द्रव्याणि समभागानि। भल्लातं—भल्लातकफलं, तच्च सर्वतुल्यं ज्ञेयम्, अभावे रक्तचन्दनम्। तन्त्रान्तरेऽस्य गुदजान्तकसंज्ञा ज्ञातव्या॥ १०।११॥

चन्द्रप्रभागुड़िका।—

क्रिमिरिपुदहनव्योष-त्रिफलासुरदारुचव्यभूनिम्बः।
मागधीमूलमुस्तं सशटी वचा धातुमाक्षिकञ्चैव।
लवणक्षारनिशायुग-कुस्तुम्बुरुगजकणाऽतिविषा॥ १२॥
कर्षांशकान्येव समानि कुर्य्यात् पलाष्टकं चाश्मजतोर्विदध्यात्।
निष्पत्रशुद्धस्य पुरस्य धीमान् पलद्वयं लौहरजस्तथैव॥ १३॥
सिताचतुष्कं पलमत्र वांश्या निकुम्भकुम्भौत्रिसुगन्धियुक्ताम्।
चन्द्रप्रभेयं गुड़िका विधेया अर्शांसि निर्णाशयते षड़ेव॥ १४॥
भगन्दरं कामलपाण्डुरोगं विनष्टवह्नेः कुरुते च दीप्तिम्।
हन्त्यामयान् पित्तकफानिलोत्थान् नाड़ीगते मर्मगते व्रणे च॥१५॥
ग्रन्थ्यर्बुदे विद्रधिराजयक्ष्म-मेहे भगाख्ये प्रदरे च योज्या।
शुक्रक्षये चाश्मरिमूत्रकृच्छ्रे मूत्रप्रवाहेऽप्युदरामये च॥ १६॥
तक्रानुपानं त्वथ मस्तुपानमाजो रसो जाङ्गलजो रसो वा।
पयोऽथवा शीतजलानुपानं बलेन नागस्तुरगो जवेन॥ १७॥
दृष्ट्या सुपर्णः श्रवणे वराहः कान्त्या रतीशो धिषणश्च बुद्ध्या।
न पानभोज्ये परिहार्य्यमस्ति न शीतवातातपमैथुनेषु।
शम्भुं समभ्यर्च्य कृतप्रणामैः प्राप्ता गुड़ी चन्द्रमसः प्रसादात्॥१८॥

चन्द्रप्रभागुड़िकायाम्।—क्रिमिरिपुः,—विड़ङ्गः, दहनः,—चित्रकः, सुरदारु—देवदारु, भूनिम्बः,—"चिरेता" इति ख्यातः, मागधीमूलं—पिप्पलीमूलं, धातुमाक्षिकं—स्वर्णमाक्षिकम्। निशायुगं—हरिद्राद्वयम्, अश्मजतु— शिलाजतु। "निष्पत्रशुद्धस्य पुरस्य" इति।—विशुद्धगुग्गुलोः। वांशी— वंशलोचना, निकुम्भः,—दन्ती, कुम्भी—त्रिवृत्। "वृद्धवैद्योप-

शुक्रदोषान् निहन्त्याशु प्रमेहानपि दारुणान्।
वलीपलितनिर्मुक्तो वृद्धोऽपि तरुणायते ॥ १९ ॥

माणाद्यं लौहम्।—

माणशूरणभल्लात-त्रिवृद्दन्तीसमन्वितम्।
त्रिकत्रयसमायुक्तं लौहं दुर्नामनाशनम् ॥ २० ॥

चञ्चत्कुठारो रसः।—

रसगन्धकलौहानां प्रत्येकं भागयुग्मकम्।
त्रिकटुदन्तिकुष्ठैकं षड्भागं लाङ्गलस्य च ॥ २१ ॥
क्षारसैन्धवटङ्गाणां प्रत्येकं भागपञ्चकम्।
गोमूत्रस्य च द्वात्रिंशत् स्नुहीक्षीरं तथैव च।
यावच्च पिण्डितं सर्वं तावन्मृद्वग्निना पचेत् ॥ २२ ॥
माषद्वयं ततः खादेत् दिवास्वप्नादि वर्जयेत्।
रसश्चञ्चत्कुठारोऽयमर्शसां कुलनाशनः ॥ २३ ॥

शिलागन्धकवटकः।—

शिलागन्धकयोश्चूर्णं पृथग्भृङ्गरसाप्लुतम्।
सप्ताहं भावयेत् सर्पिर्मधुभ्याञ्च विमर्दयेत् ॥ २४ ॥

द्वैशेन पलाद्धं रसगन्धकम्। केवलं मूर्च्छितं वाऽपि पलं वा दापयेद्रसम् ॥ अभ्रकञ्च क्षिपेत् किञ्चित् पलमानं भिषग्वरः। संमर्द्य मधुसर्पिर्भ्यामादौ रक्तिचतुष्टयम् ॥ भक्ष्यं वृद्ध्या यथायुक्ति यावन्माषचतुष्टयम्। त्रिवृद्दन्तीत्रिजातानां कर्षमानं पृथक् पृथक् ॥" केचित्तु इदं श्लोकत्रयमधिकं पठन्ति ॥ १२—१९ ॥

माणाद्यलौहे।—लौहं सर्वचूर्णसमम् ॥ २०—२३ ॥

अर्शसश्चानुलोम्यार्थं हताग्निबलवर्द्धनम् ।
रक्तिकाद्वितयं खादेत् कुष्ठादिरहितो नरः ॥ २५ ॥

जातीफलादिवटी ।—

जातीफलं लवङ्गञ्च पिप्पली सैन्धवं तथा ।
शुण्ठी धुस्तूरवीजञ्च दरदो टङ्कणं तथा ॥ २६ ॥
समं सर्वं विचूर्ण्याथ जम्बनीरेण मर्दयेत् ।
वटी जातीफलाद्येयमर्शोऽग्निमान्द्यनाशिनी ॥ २७ ॥

पञ्चाननवटी ।—

मृतसूताभ्रलौहानि मृतार्कगन्धकैः सह ।
सर्वाणि समभागानि भल्लातं सर्वतुल्यकम् ॥ २८ ॥
वन्यशूरणकन्दोत्थैर्द्रवैः पलप्रमाणतः ।
मर्दयेत् दिनमेकञ्च माषमात्रं पिबेद् घृतैः ॥ २९ ॥
भक्षणात् हन्ति सर्वाणि चार्शांसि च न संशयः ।
असाध्येष्वपि कर्त्तव्या चिकित्सा शङ्करोदिता ।
कुष्ठरोगं निहन्त्याशु मृत्युरोगविनाशिनी ॥ ३० ॥

अष्टाङ्गो रसः ।—

गन्धं रसेन्द्रं मृतलौहकिट्टं फलत्रयं त्र्यूषणवह्निभृङ्गम् ।
कृत्वा समं शाल्मलिका-गुडूची-रसेन याममत्रितयं विमर्द्य ॥ ३१ ॥

शिलागन्धकवटके ।—शिला—मनःशिला ॥ २४।२५ ॥
जातीफलादिवट्यां शुद्धीभूतं धुस्तूरवीजम् । दरदः—शोधितहिङ्गुलं.
टङ्कणं—तत्रम् तलाजाः । जम्बनीरेण—जम्बीररसेन ॥ २६—३० ॥

निष्कप्रमाणं गदितानुपानैः सर्वाणि चार्शांसि हरेद्रसस्य।
लोकोपकृत्यै करुणामयेन रसोऽयमुक्तस्त्रिपुरान्तकेन॥ ३२॥

[इति अर्शोऽधिकारः।]

अथाजीर्ण-चिकित्सा।—

महोदधिवटी।—

एकैकं विषसूतञ्च जातीटङ्कं द्विकं द्विकम्।
कृष्णात्रिकं विश्वषट्कं द्विकं गन्धं कपर्दकम्॥ १॥
देवपुष्पं बाणमितं सर्वं संमर्द्य यत्नतः।
नाम्ना महोदधिवटी नष्टमग्निं प्रदीपयेत्॥ २॥

अग्नितुण्डीरसः।—

शुद्धसूतं विषं गन्धमजमोदा फलत्रिकम्।
सर्जिक्षारं यवक्षारं वह्निसैन्धवजीरकम्॥ ३॥

अष्टाङ्गरसे।—लौहकिट्टं—मण्डूरं, फलत्रयं—त्रिफला। "रसस्य" इत्यत्र "सुपीतम्" इति पाठान्तरम्॥ ३१।३२॥

इति अर्शश्चिकित्सा।

अर्शःकार्य्यत्वात् तदनन्तरम् अग्निमान्द्यादिचिकित्सामाह, एकैकमित्यादि।—जाती—जातीफलम्; देवपुष्पं—लवङ्गम्। बाणमितमिति पञ्चभागमित्यर्थः। "द्विकं गन्धं कपर्दकम्" इत्यत्र "दग्धं कपर्दकं तथा" इति पाठान्तरम्॥ १।२॥

सौवर्चलं विड़ङ्गानि सामुद्रं त्र्यूषणं तथा ।
विषमुष्टिसमं सर्वं जम्बीराम्लेन मर्दयेत् ।
मरिचाभां वटीं खादेत् वह्निमान्द्यप्रशान्तये ॥ ४ ॥

बड़वानलो रसः ।—

शुद्धसूतस्य कर्षैकं गन्धकं तत्समं मतम् ।
पिप्पली पञ्चलवणं मरिचञ्च फलत्रयम् ॥ ५ ॥
क्षारत्रयं समं सर्वं चूर्णं कृत्वा प्रयत्नतः ।
निर्गुण्ड्याश्च द्रवेणैव भावयेद्दिनमेकतः ।
बड़वानलनामाऽयं मन्दाग्निञ्च विनाशयेत् ॥ ६ ॥

हुताशनो रसः ।—

गन्धेशटङ्कणैकैकं विषमत्र त्रिभागिकम् ।
अष्टभागन्तु मरिचं जम्बाम्भोमर्दितं दिनम् ॥ ७ ॥
तद्वटीं मुद्गमानेन कृत्वाऽऽर्द्रेण प्रयोजयेत् ।
शूलारोचकगुल्मेषु विसूच्यां वह्निमान्द्यके ।
अजीर्णे सन्निपातादौ शैत्ये जाड्ये शिरोगदे ॥ ८ ॥

वृहत्-हुताशनो रसः ।—

एकद्विकद्वादशभागयुक्तं योज्यं विषं टङ्कणमूषणञ्च ।
हुताशनो नाम हुताशनस्य करोति वृद्धिं कफजित् नराणाम् ॥९॥

अग्नितुण्डीरसे ।—अजमोदा—यमानी, वह्निः,—चित्रकः ॥ ३।४ ॥
बड़वानलरसे ।—क्षारत्रयं—यवक्षार-सर्जिक्षार-टङ्कणक्षारम् ॥५।६॥
हुताशनरसे ।—ईशः,—पारदः ॥ ७—९ ॥

अमृतकल्पवटी।—

शुद्धौ पारदगन्धौ च समानौ कज्जलीकृतौ।
तयोरर्द्धं विषं शुद्धं तत्समं टङ्कणं भवेत्॥ १०॥
भृङ्गराजद्रवैर्भाव्यं त्रिदिनं यत्नतः पुनः।
मुद्गप्रमाणा वटिका कर्त्तव्या भिषजां वरैः॥ ११॥
वटीद्वयं हरेत् शूलमग्निमान्द्यं सुदारुणम्।
अजीर्णं जरयत्याशु धातुपुष्टिं करोति च॥ १२॥
नानाव्याधिहरा चेयं वटी गुरुवचो यथा।
अनुपानविशेषेण सम्यक् गुणकरी भवेत्॥ १३॥

अग्निकुमारो रसः।—

रसेन्द्रगन्धौ सह टङ्कणेन समं विषं योज्यमिह त्रिभागम्।
कपर्दशङ्खाविह नेत्रभागौ मरीचमत्राष्टगुणं प्रदेयम्॥ १४॥
सुपक्वजम्बीररसेन घृष्टः सिद्धो भवेदग्निकुमार एषः।
विसूचिकाऽजीर्णसमीरणार्त्तौ दद्याद् द्विवल्लं ग्रहणीगदे च॥१५॥

बृहदग्निकुमारो रसः।—

शुद्धसूतं द्विधा गन्धं गन्धतुल्यञ्च टङ्कणम्।
फलत्रयं यवक्षारं व्योषं पञ्च पटूनि च॥ १६॥
द्वादशैतानि सर्वाणि रसतुल्यानि दापयेत्।
संमर्द्य सप्तधा सर्वं भावयेदार्द्रकद्रवैः॥ १७॥

अमृतकल्पवटिकायाम्।—तत्समर्मिति विषसमम्॥ १०—१३॥

अग्निकुमाररसे।—भागत्रयमित्येकभागापेक्षया, एवं सर्वत्र। कपर्दशङ्खं दग्ध्वा जम्बीररसे प्रक्षिप्य शोधयन्ति वृद्धाः। "घृष्टः" इत्यत्र "घस्रम्" इति पाठान्तरम्॥ १४।१५॥

शोष्य चूर्णयित्वा तु भक्षयेदार्द्रकाम्बुना ।
शाणमात्रं वयो वीक्ष्य नानाऽजीर्णप्रशान्तये ॥ १८ ॥
रसश्चाग्निकुमारोऽयं महेशेन प्रकाशितः ।
महाग्निकारकश्चैव कालभास्करतेजसः ॥ १९ ॥
अग्निमान्द्यभवान् रोगान् शोथं पाण्ड्वामयं जयेत् ।
दुर्नामग्रहणी-साम-रोगान् हन्ति न संशयः ।
यथेष्टाहारचेष्टस्य नास्यत्र नियमः क्वचित् ॥ २० ॥

अपरो बृहदग्निकुमारो रसः ।—

व्योषं जातीफले द्वे च लवङ्गञ्च वराङ्गकम् ।
पत्रं शृङ्गी कणा टङ्कं यमानी जीरकद्वयम् ॥ २१ ॥
सैन्धवञ्च विड़ं हिङ्गु रसं गन्धञ्च रौप्यकम् ।
लौहमभ्रं समं सर्वं जम्बीररसमर्दितम् ॥ २२ ॥
अजीर्णशान्तये खादेच्चतुर्गुञ्जां वटीं नरः ।
अत्यग्निकारकश्चायं रसश्चाग्निकुमारकः ॥ २३ ॥
संग्रहग्रहणीञ्चैव वातपित्तकफोद्भवाम् ।
नाशयेदामदोषञ्च त्रिदोषजनितञ्च यत् ।
शूलदोषं विसूचीञ्च भास्करस्तिमिरं यथा ॥ २४ ॥

बृहदग्निकुमाररसे ।—रसापेक्षया द्विगुणं गन्धं टङ्कणञ्च, पटूनि—लवणानि । द्वादशैतानोति ।—फलत्रयादिपञ्चपट्वन्तानि द्रव्याणि प्रत्येकं रसतुल्यानि ॥ १६—२० ॥

अपरबृहदग्निकुमाररसे ।—जातीफले द्वे इति ।—जातीफल-जातीकोषौ, वराङ्गं—गुड़त्वक्, टङ्कं—टङ्कणलाजाः, हिङ्गु—रामठं, रसः—पारदः ॥ २१ – २४ ।

बृहन्महोदधि वटी ।–

लवङ्गं चित्रकं शुण्ठी जयपालः समं समम् ।
टङ्गणञ्च प्रदातव्यं वृद्धदारस्य कार्षिकम् ॥ २५ ॥
चतुर्दश भावनाश्च दन्तीद्रावैः प्रदापयेत् ।
लिम्पाकेन त्रिधा देया वृद्धदारेण पञ्चधा ॥ २६ ॥
रसं गन्धञ्च गरलं मेलयित्वा विभावयेत् ।
आर्द्रकस्य रसेनैव चित्रकस्य रसेन वा ॥ २७ ॥
मुद्गप्रमाणां वटिकां कृत्वा खादेत् दिने दिने ।
क्षुत्प्रबोधकरी चेयं जीर्णज्वरविनाशिनी ॥ २८ ॥

रामबाणरसः ।—

पारदामृतलवङ्गगन्धकं भागयुग्ममरिचेन मिश्रितम् ।
जातिकाफलमथार्द्धभागिकं तिन्तिड़ीफलरसेन मर्दितम् ॥२९॥
माषमात्रमनुपानयोगतः सद्य एव जठराग्निदीपनः ।
वह्निमा -द्यवक्तनाशनो रामबाण इति विश्रुतो रसः ॥३०॥

बृहन्महोदधिवटिकायाम् ।—लवङ्गादि सर्वं कर्षपरिमितं गृहीत्वा दन्त्यादिद्रावैः भावयेत् ।—दन्तीकाथैर्निम्बुरसैर्वृद्धदारककाथैश्च यथोक्त-वारान् भावयेत् ; ततः रसगन्धककृतां कज्जलीं शोधितं विषञ्च एकीकृत्य आर्द्रकादिरसैर्भावयेत् । अत्र परिशोधितं जयपालबीजं तथा गरलं काष्ठविषं ग्राह्यं, तदपि सर्वथा गोमूत्रादिशोधितमिति बोद्धव्यम्, अन्यथा प्राणहानिशङ्का। वटिकामपि मुद्गात् क्षुद्रतमां कृत्वा आतुरस्य शक्तिं विविच्य प्रयोजयेत् ॥ २५—२८ ॥

रामबाणरसे।—रसादिगन्धान्तानां चतुर्णां समभागः, मरिचञ्च